Barcode : 99999990293328
Title - Astangahardaya of Vahata Part II
Author - Shri Das Pandit
Language - sanskrit
Pages - 371
Publication Year - 1950
Barcode EAN.UCC-13

अनन्तशयनाविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १७५.



वाहटकृतम्

अष्टाङ्गहृदयं

श्रीदासपण्डितविरचितहृदयबोधिकाख्यया

व्याख्ययोपेतम् ।

द्वितीयो भागः ।

(सूत्रस्थाने १६–३० अध्यायाः ।)

सम्पादकः

डाक्टर् पि. के. नारायणपिळ्ळै, एम्. ए., पिएच्. डि.

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयनम् ।

इदं च

अनन्तशयने

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

१९५०.

मूल्यं ४ रूप्यकाणि ।

INTRODUCTION.

The second part of the *Aṣṭāṅgahṛdaya* with the commentary *Hṛdayabodhikā* of Śrīdāsapaṇḍita is now issued as No. 155 in the Trivandrum Sanskrit Series. The first part was published by the Director of Ayurveda in 1940, when there was a separate section under the Ayurveda Department for publishing ancient works in Indian medicine. But later on that section was abolished and the publication of Ayurvedic works was entrusted to the University Manuscripts Library. The first part comprises the first fifteen chapters and the second comprises the remaining fifteen chapters in the *Sūtrasthāna*. Thus the first and the second parts cover the *Sūtrasthāna* for the exposition of which Vāgbhaṭa stands distinguished among the authors of medical works in Sanskrit[1].

The *Aṣṭāṅgahṛdaya*, one of the outstanding and popular works on Āyurveda[2], came to be commented on by various scholars of repute in different parts of India. The following is a list of commentaries on the work in Sanskrit;

1 Kairalī.
2 Nidānacintāmaṇi (on the Nidānasthāna only?) by Kaṇha Prabhu Todaramalla.
3 Pathya.
4 Bālabodhinī.
5 Vyākhyāsāra.
6 Hṛdyā.
7 Commentary by a disciple of Nārāyaṇa Yogīndra.
8 Sarvāṅgasundarī by Aruṇadatta.
9 Uddyota by Āśādhara.

1. निदाने माधव श्रेष्ठ सूत्रस्थाने तु वाग्भट: ।
शारीरे सुश्रुत: प्रोक्तश्चरकस्तु चिकित्सिते ॥

2 This is the most popular medical work in Kerala.

10 Śaśilekhā by Indu.
11 Padārthacandrikā by Candranandana.
12 Saṅketamañjarī by Dāmodara.
13 Hṛdayabodhikā by Śrīdāsapaṇḍita.
14 Vāgbhaṭakhaṇḍanamaṇḍana by Bhaṭṭa Narahari or Nṛsiṁhakavi.
15 Vākyapradīpikā by Parameśvara.
16 Dīpikā by Purandara *alias* Udayāditya
17 Commentary by Rāmanātha.
18 Vaiḍūryakabhāṣya by Vāgbhaṭa himself(?)
19 Ṭīkā by Vāgbhaṭa himself(?) (Different from the above ?)
20 Dīpikā by Viṭṭhala Paṇḍita.
21 Vijñeyārthaprakāśikā by Viśveśvara Paṇḍita.
22 Lalitā by Śaṅkara, son of Nārāyaṇa Śarman.
23 Dīpikā by Haṭakāṅka.
24 Āyurvedarasāyanī by Hemādri.
25 Pañcikā[3].

Of these Pāṭhya, Hṛdya, Vyakhyāsāra, Hṛdayabodhikā, Lalitā, Kairalī, Vākyapradīpikā and Pañcikā are written by scholars of Kerala. In addition to these there are also a few Malayalam commenturies (including the Alpabuddhiprabodhanam of Śrīkaṇṭha) written by Kerala authors[4].

The Commentary.

In the colophons found at the end of the various sections of the commentary, the work is referred to as Hṛdayabodhikā. But in certain MSS. the work is also referred to as

3. The commentary Pañcikā is not noticed in the New Catalogus Catalagorum. It is referred to by Śrīdāsapaṇḍita (vide p. 154 of the present volume).

4. There are also a few unidentified and incomplete manuscripts of Aṣṭāṅgahṛdaya which might be different from any of the above

हृदयबोधिनी[5] (MS T 1448)

In his commentary Lalitā on the Aṣṭāṅgahṛdaya, Śaṅkara of Planthol Illam (Vāyaskara) refers to Hṛdaya-bodhikā in the following words

सुन्दर्यादिप्यवैशद्यादर्यानामल्पचेतसाम् ।
विस्तरादर्थगाम्भीर्याद्व्याख्या कर्तुं यतामहे ॥
हृद्येन्दुपाठ्यव्याख्यानमतभेदमदर्शिनीम् ।
समालम्ब्य गभीरार्थां व्याख्यां हृदयबोधिकाम् ॥

This encomium paid to the work stands fully justified, for the Hṛdayabodhikā quotes and discusses the views expressed in earlier commentaries such as Sarvāṅgasundarī, Indu, Padārtha Pathyam, Hṛdyā, Vyākhyāsāra and Dīpikā It also draws much on the original works like Caraka, Suśruta, Aṣṭāṅgasaṅgraha, Bhojasaṃhitā, Kharanāda, Āgama, Āśvinasaṃhitā, Nandikeśvarasaṃhitā, etc, for elucidating various technical points

Commentaries like Sarvāṅgasundarī pay more attention to textual interpretation than explaining the technical points and pointing out the practical ways for treatment and the preparations of medicines But Hṛdayabodhikā is of great help to physicians in medical practice as well as in preparing medicines It is with this purpose in mind that the commentator has extracted materials from various other works on Indian medicine

The fact that the commentary gives the Malayalam equivalents of technical words has made it very useful to physicians of Kerala Here it may be pointed out that physicians in all parts of India are very often put to great difficulties in identifying the medicinal plants mentioned in the standard works on Ayurveda In the commentary on Sūtrasthāna itself the Malayalam equivalents of not less than 800 Sanskrit terms are given[6].

5 Aufrecht in his Catalogus Catalogorum notices the work as Hṛdayaprabodhikā In the New Catalogus Catalogorum the title Hṛdayabodhikā is omitted.

6 Vide Appendix IV

The Author.

From the stanza with which the commentary opens it can be gathered that the author was known as Paṇḍita and that one Vasudeva[7] was his teacher. The stanza runs as follows:

आयुर्वेदाचार्यान् ब्रह्मादीन् वासुदेवमाचार्यम् ।
नत्वा पण्डितनाम्ना व्याक्रियते हृदयबोधिका टीका ॥

In the colophons at the end of the various chapters the author is mentioned by the name Sridāsapaṇḍita. The colophon at the end of the first chapter is given below:

इति श्रीदासपण्डितविरचितायां हृदयबोधिकायां सूत्रस्थाने प्रथमोऽध्यायः ।

From this it may be inferred that Sridāsapaṇḍita was the commentator's full name and that he was popularly known as Paṇḍita.

Śrīdāsapaṇḍita was a colleague of the author of Vyākhyāsāra, another Keralīya commentary on the Aṣṭāṅgahṛdaya. This is evident from the fact that the same passages are seen quoted in the Vyākhyāsāra and in Hṛdayabodhikā as taken from the work of the teacher of the commentators

Eg. 1. Vyākhyāsāra:—

अहनि गोसर्गे मध्यंदिनेऽर्धरात्रे पर्वदिनेष्वनभ्रेऽपि चेति सङ्ग्रहदर्शनात् पूर्वोक्त एवार्थो युक्त इत्यस्मद्गुरूणां सिद्धान्तः । सू० VII. 70.

Hṛdayabodhikā:—

अहनि गोसर्गे मध्यंदिनेऽर्धरात्रे पर्वदिनेष्वनभ्रेऽपि चेति सङ्ग्रहदर्शनात् (पूर्वमु)क्त एवार्थो युक्त इत्यस्मद्गुरूणां सिद्धान्तः । सू० VII.70.

7. Vāsudeva, the author of Navakhaṇḍa, an ancient Malayalam work on medicine, might be the teacher of Sridāsapaṇḍita.

2. Vyākhyāsāra :—

नात्र यथासङ्ख्यं पार्श्वकक्ष्यास्तनानामन्तर इत्यस्मद्गुरवः । सू० XXVII-13.

Hṛdayabodhikā .—

नात्र यथासङ्ख्यं पार्श्वकक्ष्यास्तनानानन्तर इत्यस्मद्गुरवः । सू० XXVII. 13

Śrīdāsapaṇḍita has quoted from Vyākhyāsāra profusely. A few quotations may be given here :

1. सारङ्गस्तु त्वेवमाह — वृत्तं गोपुच्छाकारादि शेषं पूर्वोक्तमत्र वेद्यम् । पुष्पवृन्तोपमं तत्र न युज्यते, यतो मूत्रस्रोतःपरीणाह हि तद् विधातव्यं पुरुषलिङ्गाकारमिति । XIX. 78

2. खपुरः कुन्दुरुष्कादिनिर्यास इति सारङ्गस्तु । XX. 5.

3. सारङ्गस्त्वाह — आपूयदर्शनात् सङ्गदेव न्यसेत् । आहरेच्चेति पूयदर्शनानन्तरं तत्र न स्थाप्यमित्यर्थः । तत्र न पाटनं कुर्यादिति पिण्डितार्थः । XXIX 18.

4. सारङ्गस्त्वेवमाह — ' एते माषादयो मर्माश्चान्दं पक्षमवलम्ब्य मोक्षा इति गम्यन्ते । III 1.

Paṇḍita as a rule quotes and discusses the views of other authors and expresses his own independent views on points at issue. Where he gives his own view, he introduces it in the words पण्डितस्त्वाह । In the following passages Paṇḍita expresses his views —

पण्डितस्त्वाह — शिरोहृदयवस्त्यादिमर्माण्यस्थिसन्धय इति नाम्नोच्यन्ते । तन्निबद्धाः शिरोहृदयवस्त्यादिसंश्रिताः सिरास्नाय्वादयश्चास्थिसन्धय इत्युच्यन्ते । अस्थिसन्धय इति संज्ञा । स मध्यमो रोगमार्ग इति ।

(Sūtrasthāna Ch. XII, verse 4).

पण्डितस्त्वाह — रागादीनामागन्तुत्वमनुपपन्नं, 'रागादिरोगान् सततानुषक्तान्' इत्यनेन सहजत्वनिर्देशादिति । अत्र ब्रूमहे — आद्यशब्दे-

नादिभवां गृह्णन्ते 'आयमादिभवे खाये' इति वैजयन्ती । रागद्वेषमयादिभवा ज्वरादय इति ।

(Sūtrasthāna. Ch. IV, verse 31).

पण्डितास्त्वाह — तदा शरीरमनवस्थितासृक् अग्निर्विशेषादनवस्थितः तस्माद् रक्षितव्यः पुरुषः इति ।

(Sūtrasthāna Ch. XXVII, verse 52).

Date.

The Alpabuddhiprabodhana, a Malayalam commentary on the Aṣṭāṅgahṛdaya by Śrīkaṇṭha follows closely Vyākhyāsāra and Hṛdayabodhikā. In certain places in his commentary, Śrīkaṇṭha has even translated these commentaries into Malayalam for instance:—

Hṛdayabodhikā.

Sūtrasthāna, Ch. I, verse 9

यद्यपि च सर्वशरीरव्यापित्वाच्चे सदैव शुक्लार्तवस्थाः स्युः तथापि इह शुक्लार्तवस्यैरिति कृतं विशेषवचनार्थं गर्भस्य । पित्रोरानन्दावस्थायां अन्त्यधातुनिषेककाले विशेषेण यथा शुक्लार्तवस्थाः ते स्युरिति ।

... ...

... ...

समसंदोषादनेन च त्रिदोषजत्वं सर्वासां प्रकृतीनां ज्ञापयत्याचार्यः । अन्यथा त्रिदोषप्रकृतिः श्रेष्ठेति ब्रूयात् ।

(Printed edn. p. 34)

Alpabuddhiprabodhanam.

ഇവിടെക്കാരം കരളിലെയാരുതയിലിക്കു ന്ന ശ്ലേഷ്മത്തുകൾ വ്യാപിക്കുമാരം എ ന്നിരിക്കേനടത്തു ശുക്ലാർത്തവങ്ങൾക്കു സ്ഥിതിചെയ്യുന്നു(ന്ന)തിനുചാട്ടു. അപ്പോൾതന്നെയുള്ളൊടയും ഈ ന്നാവസ്ഥയിലും ശുക്ലം സ്ഥിരമ ന്നുമാരം വിചാരിച്ചു ഈവാദം ശ്ര ദ്ധിക്കുന്നു എന്നതിനെ അറിയിപ്പാൻ

... ...

Nidānasthāna, Ch. VIII.

Introduction.

ज्वरगुल्मालसारामप्रदरशोफपाण्डु
भिः क्षणात् कुपितेन वायुना पायो-
र्बस्तिपु दुष्टासु जायन्तेऽर्शांसीत्युक्तं, अस्मि-
न्नप्यायेऽपि अर्शोभिः स्नेहविभ्रमादिभिश्च
कुपितोऽनिलः अनलं मन्दीकृत्य पुरीषं
दृढतां नयन्नतीसाराय कल्पते इति
वक्ष्यति, एतेनार्शांसो हेतुर्ग्रहण्यतिसारो
ग्रहण्यतिसारयोर्हेतुः अर्शांसीति परस्पर-
हेतुहेतुमद्भावः सम्बन्धः ।
(Transcript No. 1458, p. 129)

ജ്വരഗുല്മാലസാരാമപ്രദരശോഫപാണ്ഡു
ഭിഃ ക്ഷണാത് കുപിതേന വായുനാ പായോ-
ർബസ്തിഷു ദുഷ്ടാസു ജായന്തേഽർശാംസീത്യുക്തം, അസ്മി-
ന്നപ്യായേഽപി അർശോഭിഃ സ്നേഹവിഭ്രമാദിഭിശ്ച
കുപിതോഽനിലഃ അനലം മന്ദീകൃത്യ പുരീഷം
ദൃഢതാം നയന്നതീസാരായ കല്പതേ ഇതി
വക്ഷ്യതി, ഏതേനാർശാംസി ഹേതുർഗ്രഹണ്യതിസാരോ
ഗ്രഹണ്യതിസാരയോർഹേതുഃ അർശാംസീതി പരസ്പര-
ഹേതുഹേതുമദ്ഭാവഃ സമ്ബന്ധഃ ।
(Tran. No. 1475, p. 228).

This praves beyond doubt that Hṛdayabodhikā is earlier than Srīkaṇṭha's Alpabuddhiprabodhana. Thus Śrīkaṇṭha may be identified with the Śrīkaṇṭha well versed in Āyurveda[8] and the teacher of Rāghava, the author of Padārthacintana, a commentary on Yudhiṣṭhiravijaya. Rāghava in his commentary refers to Srīkaṇṭha as follows:

श्रीकण्ठाख्याः समाख्याताः श्रीकण्ठाकुण्ठधीगुणाः ।
सुश्रुता विश्रुता लोके गुरवो मम रक्षकाः ॥

This Rāghava was the teacher of Śaṅkara, the author of Śrīkṛṣṇavijayam. In that kāvya Rāghava is referred to with deep respect in the stanza :

8. See History of Sanskrit Literature in Kerala, Part I, p. 180.

विभाति तस्मिन् गिरिजाकटाक्ष-
पात्रीभवन् कश्चन सूरिवर्य ।
श्रीकोलभूपालकुलप्रसिन्धु-
राकाशशी राघवनामधेय ॥

Rāghava is mentioned in Candrotsava[9], a Manipravāla-kāvya of the 14th century and Śaṅkara is referred to in Kokilasandeśa by Uddaṇḍa[10], who flourished in the beginning of the 15 century A. D So Śrīkaṇṭha may be placed in the latter half of the 14th century and it may be tentatively accepted that Śrīdāsapaṇḍita whose work the former has drawn upon much, migh have flourished earlier than 1300 A D

Manuscript No C 977 is the basis of this edition. In reading the proof and preparing the indices given at the end Messrs Sivamani M Madhavan Unni and M. P. Parameswaran Namputiri have been of great help to me and I acknowledge their services with thanks.

P. K. Narayana Pillai.

---

9 vide *Candrotsava* IV 92
10 vide *Kokilasandeśa* I 60

विषयः	पुटम्	श्लोक
प्राग्भक्तादिस्नेहोपयोगफलम्	१५	२१,२२
स्नेहोपयोगोत्तरमुष्णवारिपानम्	१६	,,
दौरवारुष्करे तत्पाननिषेधः	,,	२३
अजीर्णशङ्कायां पुनःपानविधिस्तत्फलं च	,,	२३,२४
स्नेहस्यान्नपानप्रकारः	१७	२४,२५
पीतस्नेहस्योष्णोदकोपचारादिविधिः	,,	२५—२७
स्वेदादिषु व्याधिक्षीणेषु च पूर्वोक्तस्य विनियोगः	,,	२८
शमनस्नेहोपयोगे विरिक्तवदुपचारः	,,	,,
अच्छपाने दिनपरिमाणम्	१८	२९
सम्यक्स्निग्धास्निग्धयोर्लक्षणम्	,,	३०
अतिस्निग्धलक्षणम्	१९	३१
अमात्रादितः स्नेहोपयोगस्य शोफादिकरत्वम्	,,	३१,३२
स्नेहव्यापदि भेषजानि	,,	३३,३४
विरूक्षणे लङ्घनवल्लक्षणकथनम्	,,	३५
स्निग्धे विरेचनवमनयोर्विधिः	२०	३५,३६
मांसलादीनां स्नेह्यत्वे पूर्वं रूक्षणम्	,,	३७
तत्फलानि	२१	३८
बालवृद्धादिषु सद्य स्नेहविधिः	,,	३९
सद्यःस्नेहाना नामतो निर्देशः	,,	४०,४१
लवणोल्वणस्य सद्यःस्नेहने हेतुः	२२	४२
कुष्ठग्रादीनां स्नेहने गुडादिनिषेधः	,,	४३
तेषा स्नेहनप्रकारः	,,	४४
आमयक्षीणानां स्नेहनानि	,,	४५
स्नेहोपसेवाया फलानि	२३	४६
स्वेदविध्यध्यायः	**१७**	
स्वेदस्य चातुर्विध्यम्	२३	१
तापस्वेदलक्षणम्	,,	,,

विषयः	पुटम्	श्लोकः
उपनाहस्वेदलक्षणम्	२४	२
केवले संसृष्टे च पवने उपनाहस्य द्रव्यविशेषकथनम्	२५	३,४
उपनाहस्य बन्धनप्रकारः	२७	४,५
ऊष्माख्यस्वेदविधिः	,,	६,७
द्रवस्वेदविधिः	२९	७—१०
अवगाहस्वेदविधिः	,,	११
स्वेदे देशादि	,,	१२
व्याध्याद्यपेक्षया स्वेदप्रकारः	,,	,,
कफग्रस्तस्य स्वेदाचरणम्	,,	१३
वायुकफयोः स्थितिविशेषात् स्वेदे विशेषः	३०	११,१२
व्रणादौ स्वेदे विशेषः	,,	१४
सम्यक्स्विन्नस्य लक्षणं तत्सानन्तरकरणीयानि च	३१	१५
अतिस्विन्नलक्षणम्	,,	१६,१७
स्वेदातियोगे विषादौ च स्तम्भनौषधविधिः	३२	१७,१८
स्वेदनस्तम्भनयोर्लक्षणम्	३२,३३	१८—२०
सम्यक्स्तम्भितलक्षणम्	३३	२०
अतिस्तम्भितलक्षणम्	,,	२०,२१
अतिस्थूलादीनां स्वेदनिषेधः	,,	२२—२५
अवश्यस्वेद्याः	३७	२५—२७
अनाग्नेयस्वेदस्य विषयः, तत्प्रकाराश्च	३८	२७,२८
स्वेदस्य फलम्	,,	२९
वमनविरेचनविध्यध्यायः	**१८**	
कफपित्तयोर्वमनविरेचने	४०	१
विशेषतो नवज्वरादीनां वमनम्	,,	२,३
गर्भिण्यादीनां वमननिषेधः	,,	३—६
निषिद्धानामपि विषादिव्यवहारे वमनम्	४१	६
मद्यक्लमध्यादिषु धूमान्तकर्मणां निषेधः	,,	७

विषयः	पुटम्	श्लोकः
विरेकवमनसाध्यानां परिगणनम्	४२	८—१०
नवज्वर्यादीनां विरेचननिषेधः	४२	१०,११
वमनप्रयोगक्रमः	४३—४५	१२—२१
दोषभेदेन वमनद्रव्यभेदः	४५	२१,२२
वमनावधिः	४६	२२
हीनवेगस्य क्वाथादिभिः पुनर्वमनम्	,,	२३
वमनायोगे लक्षणानि व्याधयश्च	,,	२३,२४
सम्यग्योगलक्षणानि	,,	२५
वमनातियोगे लक्षणानि व्याधयश्च	,,	२५,२६
सम्यग्वमितस्य धूमस्निग्धचर्याविधिः	४७	२७
तदूर्ध्वं सायंभुञ्जानस्य पेयादिक्रमः	,,	२८
पेयादिक्रमरूपम्	४८	२९
पेयादिक्रमशीलनस्य फलम्	५२	३०
वमनविरेकयोर्वेगसङ्ख्या, विरेके दोषपरिमाणं च	,,	३१
वमनविरेकयोः पित्तकफान्तता	५४	३२
वमनविरेकयोर्दोषप्रमाणप्रकारः	५५	,,
वमितस्य स्नेहस्वेदपूर्वं विरेकः	,,	३३
मृदुक्रूरकोष्ठयोर्लक्षणं विरेचनद्रव्यं च	५६	३४
पित्तादौ कषायादिभिर्विरेचनम्	५७	३५
विरेकाप्रवृत्तावुष्णाम्बुपानादि	,,	३५,३६
अल्पप्रवृत्तौ पुनर्विरेचनादि	,,	३६
अदत्तस्नेहकोष्ठस्य दशाहादूर्ध्वं विरेकादि	,,	३७,३८
विरेकायोगसम्यग्योगलक्षणम्	५७,५८	३८,३९
विरेकातियोगलक्षणम्	५८	४०—४२
सम्यग्विरिक्तस्य धूमदर्जे वमितवच्चर्या	५८,५९	४२,४३
पीतभेषजस्य वह्निमान्द्यादौ लङ्घनम्	५९	४४

विषयः	पुटम्	श्लोकः
लङ्घनगुणाः	५९	४१
संशोधनादौ पेयादिक्रमाचरणे हेतुः	,,	४५,४६
सुतात्पपित्तादेः पेयानिषेधादि	६०	४६,४७
वमनस्य पाकप्रतीक्षायां हेतुः	,,	४७,४८
दुर्बलादीनां भेदनीयभोज्यविधिः	,,	४८,४९
मृद्वल्पौषधैर्विरेचनीयाः	६०, ६१	४९,५०
पूर्वोक्तौषधस्य फलकीर्तनम्	६१	५०,५२
मन्दाग्न्यादेः शोधने विशेषः	६२	५२,५३
रूक्षानिलादीनां वस्तिपूर्वकं स्निग्धं विरेचनम्	६२,६३	५३ ...५५
पित्तादिषु विरेके विशेषः	६३	५६,५७
वमनादीनां मध्ये मध्ये स्नेहस्वेदप्रयोगः	६३	५७, ५८
एवंविधाने कारणम्	६४	५८, ५९
स्नेहस्वेदानभ्यासेन संशोधने दोषः	,,	५९
संशोधनफलानि	,,	६०

वस्तिनिरूपणाध्यायः १९

वस्तिविषयाः	६५	१
तस्य त्रैविध्यम्	,,	१, २
निरूहवस्तिसाध्याः	६६	२, ३
अतिस्निग्धादीनां निरूहनिषेधः	,,	४, ६
अनुवासनसाध्याः	६७	६, ७
अनुवासननिषेधविषयाः	६७, ६८	७—९
निरूहानुवासनयोर्मात्रस्य लक्षणम्	६८	९, १०
वयोभेदेन मात्रस्य प्रमाणविधिः	६९, ७०	१०—१२
मात्रस्य मृन्नाम्नोः परिणाहः	७०	१२
मृन्नाम्नोः छिद्रस्य परिणाहः	७०, ७१	११, १४
वस्तिपुटशोधनार्थं कर्णिकाकरणम्	७२	१४, १५
कर्णिकाद्विदलेऽवादिवस्तिशोधना	७२	१५—१७

विषयः	पुटम्	श्लोकः
वस्तेरभावे अन्नपादादियोजनम्	७३	१७
निरूहमात्राक्रमनम्	७४	१८, १९
अनुवासनमात्राक्रथनम्	,,	२०
निरूहात्पूर्वमन्वासनं तस्य कालश्च	,,	२०, २१
अन्वासनकालविषयो मतभेदः	,,	२१
अन्वासनप्रयोगरीतिः	७४—७७	२२—२६
दत्तान्वासनस्य स्फिजोः पीडनम्	७७	२७
तस्याश्चाहननादि	,,	२८
स्नेहस्य शीघ्रनिवृत्तौ पुनःप्रयोगस्तत्कारणं च	,,	२९
अन्वासितस्याहारकालादि	७८	३०
स्नेहनिवृत्तिकालः	,,	३०, ३१
स्नेहानिवृत्तौ कार्याणि	,,	३१
अतिरौक्ष्यात्स्नेहानिवृत्तौ विशेषः	,,	३२, ३३
तृतीयादौ दिने पुनरन्वासनम्	७८, ७९	३३, ३४
ततः शोधनाय निरूहः	७९	३५
ततो वस्तिप्रकल्पनम्	७९, ८०	३६—३८
निरूहक्काथकल्पनाप्रकारः	८०	३८
क्काथे स्नेहकल्कादियोजनाप्रकारः	८१	३९—४१
वस्तेर्गुदे मणधनम्	८२	४२, ४३
क्काथे स्नेहादियोजनायां मतान्तरम्	८३	४३—४५
निरूहमिश्रणक्रमविधिः	,,	४५, ४६
निरूढे रोगिणः स्थितिः	८४	४६, ४७
निरूहप्रतिनिवृत्तिकालः	,,	४७
अनिवृत्तौ करणीयानि	,,	४८, ४९
स्वयंनिवृत्तौ पुनर्वस्तिकल्पनम्	८५	४९, ५०
निरूढस्य सम्यग्योगादिलक्षणम्	,,	५०
सम्यग्योगे भोजनम्	,,	,,
कोष्णसलिलेन स्नानम्	,,	५१

विषयः	पुटम्	श्लोकः
वातार्दितस्य भूयोऽनुवासनम्	८६	५२
अनुवासनस्य सम्यग्योगादिलक्षणम्	८७	५३, ५४
श्लेष्मादिविकारेषु केइवास्तिसङ्ख्या	,,	५४, ५५
कफादिषु यूषादिभोजनम्	,,	५६
अनिले वस्तिप्रकारः	८८	५६, ५७
पित्ते वस्तिप्रकारः	८९	५७, ५८
कफे वस्तिप्रकारः	,,	५८, ५९
सन्निपाते वस्तित्रयम्	,,	५९
वस्तिसङ्ख्यायां मतभेदः	८९, ९०	६०, ६१
स्वमतकथनम्	९०	६२
कर्मकालयोगाख्या वस्तिविशेषाः	९०, ९१	६३—६५
वस्तिकर्मणस्त्रिदोषजित्त्वम्	९१	६६, ६७
मात्रावस्तिलक्षणम्	,,	६७, ६८
बालादीनां मात्रावस्तेर्हितत्वम्	९२	६८, ६९
उत्तरवस्तिविषयाः	,,	७०
पुरुषेषु नेत्रपरिमाणादि	,,	७१, ७२
योजनीयवस्तिलक्षणम्, औषधमात्रा च	९३	७३
उत्तरवस्तिदानप्रकारः	,,	७३—७६
सम्यग्योगादिकमन्वासनवत्	९४	७७
स्त्रीणामुत्तरवस्तिविधाने कालः	,,	७७, ७८
स्त्रीबालयोर्नेत्रप्रमाणादि	९५, ९६	७९, ८०
स्त्रीबालानां वस्त्यौषधमात्रा	९७	८०
स्त्रिया उत्तरवस्त्यावसानम्	९८	८१
त्रिदिनपर्यन्तं विलम्ब्य पुनर्विधानम्	,,	८२
विरेकादीनां संक्षेपतः कालक्रमकथनम्	,,	८३
वस्तेर्दोषनिर्हरणे दृष्टान्तः	९९	८४
रोगाणामुत्पत्तौ वायोर्हेतुत्वम्	१००	८५
वायोः शमनाय वस्तिरेव भेषजम्	,,	८६
तस्माद्वस्तेरभिक्ष्णार्थित्वम्	१०१	८७

विषयः	पुटम्	श्लोकः
नस्यविध्यध्यायः २०		
ऊर्ध्वजत्रुविकारेषु नस्यविधिः	१०३	१
नासया प्रयोगे हेतुकथनम्	,,	,,
विरेचननस्यविषयाः	१०४	२
बृंहणविषयाः	,,	३
शमनविषयाः	,,	४
विरेचननस्यसाधनानि	,,	४, ५
बृंहणसाधनानि	१०५	५
शमनसाधनानि	,,	६
नस्यस्नेहस्य मात्राभेदेन संज्ञाभेदः	१०६	६
अवपीडाख्यं मूर्धरेचनं नस्यम्	,,	७
ध्मानाख्यं नस्यम्	,,	,,
तस्य नासायां प्रयोगप्रकारः	,,	७, ८
मर्शस्य मात्राः	१०७	९, १०
कल्कादेर्मात्राः	,,	१०
नस्येऽयोग्याः	१०८	१०—१२
नस्यकालनियमः	१०८, १०९	१२, १३
स्वस्थस्य नस्यकालनियमः	१०९	१४
रोगभेदेन नस्यकालभेदः	,,	१५, १६
नस्यदानप्रकार	११०,१११	१६—२०
नस्ये मूर्च्छाया प्रतीकारः	११२	२१
रेचननस्यान्ते दोषाद्यपेक्षया स्नेहननस्यम्	,,	,,
नस्यान्ते स्थितिः	,,	२२
ततो धूमकोष्णाम्बुकवलविधिः	,,	,,
सम्यक्स्निग्धे शिरसि लक्षणानि	११३	२३
रूक्षे शिरसि लक्षणानि	,,	२४
अतिस्निग्धे शिरसि लक्षणानि	,,	,,
सम्यग्विरिक्ते शिरसि लक्षणानि	,,	२५

विषयः	पुटम्	श्लोकः
दुर्विरिक्ते शिरसि लक्षणानि	११३	२५
प्रतिमर्शस्य विषयाः	११४	२६
प्रतिमर्शनिषेधविषयाः; निषेधे हेतुश्च	,,	२६, २७
प्रतिमर्शस्य मात्रा निशान्तादिषु तदुपयोगविधिश्च	,,	२८, २९
तत्र तदुपयोगे स्रोतःशुद्ध्यादिफलकथनम्	११५	२९, ३०
नस्यधूमकवलशुद्धीनां पुरुषविशेषे नियमः	,,	३०, ३१
प्रतिमर्शस्य विशेषतो हितकरत्वम्	,,	३२, ३३
नस्ये तैलस्यैव श्रेष्ठत्वम्	११६	३३, ३४
मर्शप्रतिमर्शादीनां आशुकृत्त्वचिरकृत्त्वादि-विशेषकथनम्	,,	३४—३६
नस्यार्थम् अणुतैलयोगकथनम्	११७	३७, ३८
नस्याभ्यासफलानि	११८	३९

धूमपानविध्यध्यायः २१.

धूमपानसाध्या विकाराः धूमपानाधिकारी च	११८	१
धूमस्य स्निग्धादिभेदास्तेषां विनियोगश्च	११९	२
रक्तपित्तादिषु धूमपाननिषेधः	,,	२—३
अकालपीतातिपीतयोर्धूमयो रक्तपित्तादिकृत्त्वम्	,,	४,५
रक्तपित्तादौ शीतविधिः	१२०	५
त्रयाणां धूमानां प्रयोगकालः	,,	५—७
धूमनेत्रलक्षणम्	,,	७,८
स्निग्धादिधूमभेदेन नेत्रस्य प्रमाणभेदः	१२१	८,९
धूमपाने स्थितिः	,,	९,१०
धूमपाने नासामुखयोः पौर्वापर्यम्	१२२	१०,११
धूमोत्सर्गप्रकारः	,,	११
धूमपानप्रकारः	,,	,,

विषय	पुटम्	श्लोकः
स्निग्धादिधूमाना पानसङ्ख्या	१२३	१२,१३
स्निग्धधूमार्थद्रव्याणि	,,	१३—१५
शमनधूमार्थद्रव्याणि	१२४	१६,१७
शोधनधूमार्थद्रव्याणि	,,	१७,१८
धूमपानविधानम्	,,	१९—२१
धूमपाने विशेषः	१२५	२१
धूमपानफलम्	१२६	२२

गण्डूषादिविंशोऽध्यायः १२.

गण्डूषस्य स्निग्धादिभेदेन चातुर्विध्यम्	१२७	१
तेषां योजना	,,	१,२
तेषां साधनानि	१२७,१२८	२,३
क्षीरादीनां गण्डूषे योगः	१२८	३,४
दन्तपीडौ गण्डूषाय तिलकल्कोदकविधानम्	,,	५
नित्यगण्डूषाय तैलमासरसयोर्विधिः	,,	६
ज्वरादाह्यन्वितपाकादौ सर्पिः पयो वा	१२९	६,७
मधुगण्डूषधारणगुणाः	,,	७,८
धान्याम्लगण्डूषधारणगुणाः	,,	८
लवणधान्याम्लगण्डूषधारणगुणाः	,,	९
क्षारोदकगण्डूषधारणगुणाः	,,	,,
सुखोष्णोदकगण्डूषधारणगुणाः	,,	१०
गण्डूषधारणप्रकारः	,,	१०,११
गण्डूषधारणविधिः	१३०	११
गण्डूषकवलयोर्विशेषः	,,	,,
कवलधारणसाध्या रोगाः	१३१	१२
प्रतिसारणस्य त्रैविध्यम्	,,	१३
नस्य कफरोगेषु योजना	,,	,,

विषयः	पुटम्	श्लोकः
मुखालेपस्य त्रैविध्यं, दोषविशेषे विनियोगश्च	१३१	१७
तस्य प्रमाणानि	१३२	१५
मुखालेपस्य स्थित्यादिप्रकारः	,,	१५,१६
मुखालेपिनो दिवास्वप्नादिनिषेधः	,,	१६
पीनसादौ मुखालेपनिषेधः	,,	१७
तन्याकालपलितादिनाशकत्वम्	,,	१७,१८
ऋतुभेदेन लेपनद्रव्यविधिः	१३२,१३३	१८—२१
मुखालेपफलम्	१३३	२२
मूर्धतैलस्य चातुर्विध्यं, तेषूत्तरोत्तरस्य बहुगुणत्वं च	,,	२३
तेषां प्रयोगविषयाः	,,	२४—२६
शिरोवस्तेः प्रयोगविधानम्	१३४,१३५	२६—३१
कर्णपूरणप्रयोगविधिः	१३५	३१,३२
कालमात्रालक्षणम्	,,	३२
मूर्धतैलोपयोगफलम्	१३६	३३

आश्च्योतनाञ्जनविध्यध्यायः २३.

आश्च्योतनविषयाः	१३७	१
मरुदादावुष्णाद्याश्च्योतनम्	,,	२
आश्च्योतनविधिः	१३७,१३८	२—४
अत्युष्णाद्याश्च्योतनस्य रुगादिकृत्त्वम्	१३८	५,६
नेत्रे प्रयुक्तस्यौषधस्य मलाकर्षणप्रकार	१३९	७
अञ्जनप्रयोग	,,	८,९
अञ्जनस्य लेखनादिप्रकारत्रय तत्साधनानि च	१४०	१०,११
अञ्जनार्थशलाकालक्षणम्	१४१	११,१२
दोषस्य गुरुत्वाद्यपेक्षया अञ्जनस्य पिण्डादिभेदकल्पनम्	,,	१३

विषयः	पुटम्	श्लोकः
पिण्डाद्यञ्जनानां मात्राः	१४१	१३,१५
रात्र्यादावञ्जनप्रयोगनिषेधस्तद्धेतुश्च	१४२	१५,१६
अञ्जनप्रयोगकालः	१४३	१६
तीक्ष्णाञ्जनप्रयोगकालविषयकमाचार्यान्तरमतम्	१४४	१७,१८
तत्र स्वमतकथनं तद्धेतुश्च	१४४,१४५	१९,२०
रात्र्यञ्जनेन सम्भाव्यमाना दोषाः	१४५	२१
अञ्जननिषेधविषयाः	१४६	२२,२३
अतितीक्ष्णाद्यञ्जनस्य प्रयोगनिषेधः	,,	२४
नेत्रेऽञ्जिते करणीयानि	१४६,१४७	२५—२९
कण्ड्वादौ तीक्ष्णाञ्जनधूमयोर्विधानम्	१४७	२९
तीक्ष्णाञ्जनाभिसन्तप्ते प्रत्यञ्जनम्	,,	,,

विषयः	पृष्ठम्	श्लोकः
पुटपाकस्करणप्रकारः	१५२	१७–१९
पुटपाकधारणमात्रादि	१५२,१५३	१९,२०
नस्यानंतं तर्पणपुटपाकयोर्निषेधः	१५३	२१
कृततर्पणदेः स्थितिः	,,	,,
नेत्रबलाय नस्यादिभिर्मलस्यावश्यकर्तव्यत्वम्	१५४	२२

यन्त्रविध्यध्यायः २५.

यन्त्रसामान्यलक्षणम्	१५५	१–४
कङ्कतुरादियन्त्रविशेषलक्षणम्	१५६,१५७	४,५
स्वस्तिकयन्त्रस्य लक्षणं प्रयोजनं च	१५७	५,६
सन्दंशयन्त्रयोर्लक्षणप्रयोजने	,,	७,८
मुचुण्डीयन्त्रस्य लक्षणं प्रयोजनं च	,,	९
द्वितालकैकतालकयोर्लक्षणं प्रयोजनं च	१५८	१०
नालीयन्त्राणां लक्षणम्	,,	११,१२
अन्तःकण्ठशल्यावलोकनार्थनालीलक्षणम्	१५९	१२
वारुणसङ्ग्रहार्थनालीयन्त्रलक्षणम्	,,	१३–१५
शल्यनिर्घातिन्या लक्षणम्	१६०	१५,१६
अर्शोयन्त्रयोर्लक्षणम्	,,	१६–१८
अर्शोऽपीडनाय शमीयन्त्रं, तल्लक्षणं च	,,	१९
भगन्दरयन्त्रलक्षणम्	,,	,,
घ्राणार्बुदार्शसोर्नाडीयन्त्रस्य लक्षणम्	१६१	२०
वाङ्मुलिका कयन्त्रलक्षणम्	,,	२१
योनिनिक्षणयन्त्रलक्षणम्	१६२	२२,२३
नाडीव्रणशल्योद्धरणार्थं यन्त्रे, तयोर्लक्षणं च	,,	२३,२४
उदकोदरे जलस्रावणार्थं नालीयन्त्रं, तल्लक्षणं च	१६३	२५
रक्तादिचूषणार्थकयन्त्रलक्षणम्	,,	२६

विषयः	पुटम्	पृष्ठम्
अलाबुलक्षणम्	१६३	२७
घटीलक्षणम्	,,	२८
शलाकायन्त्राणां सामान्यरक्षणम्	,,	२८,२९
गण्डूपदमुखयोर्लक्षणम्	,,	२९
मसूरदलवक्त्रयोर्लक्षणम्	१६३,१६४	२९,३०
अहिफणावक्त्रयोः शङ्कोर्लक्षणम्	१६४	३०,३१
शरपुङ्खर्मुखयोः शङ्कोर्लक्षणम्	,,	३१
नडिशाकृत्योः शङ्कोर्लक्षणम्	,,	,,
गर्भशङ्कुलक्षणम्	,,	३२
अश्मर्याकर्षणदन्तनिर्घातनयोर्लक्षणम्	१६५	३३
प्रमार्जनार्थं शलाकाविशेषा	१६५,१६६	३४–३८
अनुयन्त्राणि	१६७	३९,४०
यन्त्राणा कर्माणि	,,	४१
यन्त्रेषु कङ्कमुखस्य प्राधान्यम्	१६८	४२

शस्त्रविध्यध्यायः २६.

षड्विंशति शस्त्राणि, तेषा करणे सामान्यविधि.	१६९	१–४
मण्डलाग्रस्य लक्षणमुपयोगश्च	१७०	५
वृद्धिपत्रलक्षणम्	१७०,१७१	६,७
उत्पलाध्यर्धधारयोर्लक्षणप्रयोजने	१७१	७
सर्पास्यस्य उपयोज्य लक्षणम्	१७१,१७२	८,९
वेतसपत्रार्धाग्रसदृशकूर्चकाणां लक्षणम	१७२	९
मुखादाबदनान्तर्मुखमीलिताना लक्षणम्	,,	१०,११
कुठारीमुखस्य लक्षणम्	१७३	१२
तालव्याः शलाकाया अङ्गुलिकस्य च लक्षणम्	,,	१३–१५
नखशस्त्रलक्षणम्	१७४	१६
करपत्रलक्षणम्	,,	१६,१७

विषयः	पुटम्	श्लोकः
कर्तरीलक्षणम्	१७४	१७
नखच्छेदलक्षणम्	,,	१८
दन्तलेखनशस्त्रस्य लक्षणम्	१७५	१९
सूचीशस्त्राणां लक्षणम्	,,	१९–२१
कूर्चशस्त्रलक्षणम्	१७६	२२,२३
राजास्य लक्षणम्	,,	२३,२४
आरादलक्षणम्	,,	२४–२६
कर्णवेधिनीसूच्या लक्षणम्	,,	२६
जलौकःप्रभृतीन्यनुशस्त्राणि	१७७	२७,२८
शस्त्राणां कर्माणि	,,	२८,२९
शस्त्रदोषाः	१७८	२९,३०
शस्त्रग्रहणप्रकारः	१७९	३०–३२
शस्त्रकोशलक्षणम्	,,	३१,३२
जलौकसामुपयोगः	१८०	३५
दुष्टजलौकसां लक्षणम्	१८१	३६,३७
मदुपयोगाज्जायमाना व्याधयस्ताश्चिकित्सितं च	,,	३७
शुद्धजलौकसां लक्षणम्	१८२	३८
रक्तमत्तजलौकसा लक्षणं त्यागविधिश्च	,,	३९
जलौकसां योजनप्रकारः	,,	४०,४१
तासा दुष्टस्रोणिवादानसामर्थ्यम्	१८३	४१
तासा मोक्षणकालः	,,	४२
तासां वमनप्रकारः	,,	४३,४४
पुनःसप्ताहं यावत्तासां योजने निषेधः	,,	४४
सम्यग्वान्तजलौकसां लक्षणम्	,,	,,
दुर्वान्तजलौकसां लक्षणम्	१८४	४५
जलौकसां रक्षणम्	,,	४५,४६
अशुद्धौ दंशानां स्रावणादिविधिः	,,	४७
दुष्टरक्तापगमलक्षणम्	,,	४८

विषयः	पुटम्	श्लोकः
अशुद्धरक्तस्य पुनःसावणे हेतुः	१८५	४१
अलाब्वादीनां विषयभेदेन याजन विधिनिषेधौ	,,	४०,-४१
प्रच्छानप्रकारः	,,	५२
प्रच्छनादिना रक्तमोक्षणस्य विषयाः	१८५,१८६	५३–५५
सुतरक्तस्य शोफशमनार्थमुष्णसर्पि-स्सेचनम्	,,	५६
सिराव्यधविध्यध्यायः २७.		
शुद्धरक्तस्य लक्षणं तद्दोषे हेतुश्च	१८७	१,२
रक्तदोषेण जायमाना व्याधयः	१८७,१८८	२–४
रक्तस्रावार्थं सिराव्यधविधिः	१८८	५
सिराव्यधनिषेधविषयाः	१८९	६–७
दोषविशेषेण व्यधनीयसिराविशेषाणां निर्देशः	१८९,१९०	९–१७
निर्दिष्टानामदर्शने व्यधनीयाः सिराः कण्ठोपरिस्थानामन्तर्मुखनर्जना	१९०	१७,१८
सिराणां यन्त्रणप्रकारः	१९१	१८–२२
व्यधनविधिः	१९२	२३–२५
उपनासिकाया. सिराया व्यधनविधिः	,,	२५
जिह्वाधःस्थितायाः सिराया व्यधनविधिः	१९४	२६
ग्रीवासिराणां यन्त्रणव्यधप्रकारः	,,	२६,२७
हस्तसिराव्यधप्रकारः	,,	२८,२९
पार्श्वसिराव्यधप्रकारः	,,	२९
मेहनजङ्घास्थसिराव्यधप्रकारः	,,	३०–३२
व्रीहिमुखकुठारिकयोर्विषयप्रदर्शनम्	१९६	३३
सम्यग्विद्धत्वादिलक्षणानि	,,	३४,३५
रक्तस्रुतिर्नातिबन्धे हेतवः	१९६,१९७	३५,३६
रक्तस्यासम्यक्स्रावे सम्यक्स्रावे च करणीयानि	१९७,१९८	३६,३७

॥ श्रीः ॥

श्रीमद्वाग्भटविरचितम्

अष्टाङ्गहृदयम् ।

श्रीदासपण्डितविरचितया हृदयबोधिकाख्यया व्याख्यया समेतम् ।

द्वितीयो भागः ।

अथ षोडशोऽध्यायः ।

षोधनादिगणसंग्रहाध्यायादनन्तरं स्नेहाध्यायारम्भः । यत षोधनं स्नेहस्वेदावन्तरेण न सम्भवति । वक्ष्यति हि — 'स्नेहस्वेदावनभ्यस्ये'त्यादि ।

अथातः स्नेहविधिमध्यायं व्याख्यास्यामः ।

स्नेहस्य दोषमार्दवकरणप्राधान्यादग्रे पाठः । स्नेहस्य सर्पिरादेः स्नेहने वा विधिः स्नेहविधिः, तं व्याख्यास्यामः । स्नेहाद्युपयोगार्थं देशादिवैपरीत्येन तद्व्यापच्छमनाय पूर्वमेव घृतादीन् शरीरोदश्वनादीन् व्यापच्छमनयोगद्रव्याणि च विनुयात् ॥

स्नेहनद्रव्याणां लक्षणमाह —

गुरुशीतसरस्निग्धमन्दसूक्ष्ममृदुद्रवम् ।
औषधं स्नेहनं प्रायो विपरीतं विरूक्षणम् ॥ १ ॥

गुर्वित्यादि । गुर्वादिगुणयुक्तं यद्द्रव्यं तत् स्नेहनं भवति । क्षीरमेवंगुणं स्नेहनम् । विपरीतमतो यल्लघूष्णस्थिररूक्षतीक्ष्णस्थूलकठिनसान्द्रगुणोपेतं तद्विरूक्षणम् । प्रायोग्रहणं विरूक्षणे स्नेहने च योज्यं व्यभिचारज्ञापनार्थम् । गुर्वी वल्मीकमृत्तिका रूक्षणी । सरा हरीतकी रूक्षणी । न च स्निग्धस्य स्नेहने व्यभिचारः । मन्दमृदुशीतं शष्पमांसं रूक्षणम् । गुरुशीतसरादिगुणो यवो रूक्षणः । तथा राजमाषोऽपि । सूक्ष्मो वातो रूक्षणः । द्रवं काश्मिकं रूक्षणम् । एवं विरूक्षणेऽपि । तीक्ष्णोष्णं तैलं स्नेहनम् । लघु सर्षपतैलं छागं

विषयः	पृष्ठम्	श्लोकः
अशुद्धरक्तस्य पुनःस्रावणे हेतुः	१८५	४१
अलाब्वादीनां विषयभेदेन योजन- विधिनिषेधौ	,,	४२–५१
प्रच्छानम् प्रः	,,	५२
प्रच्छनादिना रक्तमोक्ष य विधयः	१८५,१८६	५३–५५
सुतरक्तस्य शोफशमनार्थमुपसर्पि- स्सेचनम्	,,	५६

सिराव्यधविध्यध्यायः २७.

शुद्धरक्तस्य लक्षणं तद्दोषे हेतुश्च	१८७	१,२
रक्तदोषेण जायमाना व्याधय	१८७,१८८	३–५
रक्तस्रावार्थं सिराव्यधविधिः	१८८	५
सिराव्यधनिषेधविषयाः	१८९	६–८
दोषविशेषेण व्यधनीयासिराविशेषाणां निर्देशः	१८९,१९०	९–१७
निर्दिष्टानामङ्गुष्ठे व्यधनीयाः सिराः	१९०	१७,१८
कण्ठोपरिस्थानामन्तर्मुखवर्जाना सिराणां यन्त्रणप्रकार.	१९१	१८–२२
व्यधनविधिः	१९२	२३–२५
उपनासिकाया. सिराया व्यधनविधिः	,,	२५
जिह्वाऽस्थिनायाः सिराया व्यधनविधिः	१९४	२६
ग्रीवासिराणां यन्त्रणव्यधप्रकारः	,,	२६,२७
हस्तसिराव्यधप्रकारः	,,	२८,२९
पार्श्वसिराव्यधप्रकारः	,,	२९
मेढ्रगत्र सासिराव्यधप्रकारः	,,	३०–३२
ग्रीवासिरोत्थारिक्तमोक्षविषयप्रदर्शनम्	१९६	३३
सम्यग्विद्धसिरालक्षणानि	,,	३४,३५
रक्तस्रावनिषेधे हेतवः	१९६,१९७	३५,३६
रक्तस्रावप्रवृत्तौ सम्यक्स्रावे च करणीयानि	१९७,१९८	३६,३७

गुणाघानमित्यर्थः । पाकसंयोगादिः संस्कारः । येन द्रव्यादिना सर्पिः संस्क्रियते तस्य गुणान्नादाय स्वगुणानत्यजदेव तिष्ठति । तैलादयस्तु स्वगुणान् विहाय संस्कारगुणान् भजन्ते । संस्कारस्यानुरूपावृत्तिरनुवृत्तिः । अनेकशक्तिसम्पत्त्वान्माधुर्यादविद्याहित्वाच्च तदन्तःसात्म्यत्वाच्च घृतस्तुतिरियमित्यर्थः । इति ॥ २ ॥

पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरम् ।

पित्तघ्ना इत्यादि । यो यः पूर्वो यथापूर्वम् । यो य उत्तरो यथोत्तरम् इति 'यथा सादृश्ये' इत्ययीभावः । उत्तरमपेक्ष्य पूर्वः, पूर्वमपेक्ष्योत्तरः । तेन चतुर्णां स्नेहानां यथानिर्दिष्टानां सर्पिरादीनां त्रय एव स्नेहाः वसामज्जसर्पिःसंज्ञका यथापूर्वत्वेन संबध्यन्ते, न तु तैलाख्योऽपि स्नेहस्तस्य पूर्वत्वाभावात् । नह्यन्योऽस्मात् कश्चिदुत्तरोऽस्ति, यदपेक्षयैव पूर्वत्वमात्मन आसादयेत् । तस्मात् पूर्वत्वसम्बन्धस्तैलस्य । तदेवं यथापूर्वं पित्तघ्नत्वं वसामज्जसर्पिषाम् । वसा पित्तघ्नी, मज्जा पित्तघ्नतरः, घृतं पित्तघ्नतममित्यर्थः । इतरौ वातकफौ पित्तापेक्षया तौ घ्नन्ति पराकुर्वन्ति इतरघ्नाः । यथोत्तरं त्रयः स्नेहाः मज्जावसातैलाख्या वातश्लेष्मघ्नाः । मज्जा वातश्लेष्मघ्नः, वसा वातश्लेष्मघ्नतरा, तैलं वातश्लेष्मघ्नतममित्यर्थः । हाटकस्त्वाह — ते च सर्पिरादयः स्नेहा यथापूर्वं पित्तघ्नाः । यथोत्तरमितरघ्नाः । श्लेष्मणि स्नेहप्रतिषेधादितरघ्नशब्देन सामान्योक्तावपि वातश्लेष्मघ्ना इति गम्यते । अथ वा द्रव्यान्तरसंस्कृतसर्पिराद्यपेक्षया इतरशब्देन कफघ्यापि ग्रहणम् । तेनैव तैलस्यापि पित्तघ्नत्वं सिद्धम् । अक्षादीनां वा तैलस्य पित्तघ्नत्वमिति । यो यस्मात् पूर्वः, स तस्मात्पित्तघ्नः । यो यस्मादुत्तरः, स तस्माद् वातघ्नः । तैलस्य पूर्वत्वासम्भवात् पित्तघ्नत्वाभावः । न च, सर्पिरितरत्र तस्योत्तरत्वाभावात् । वसामज्नोस्तु यत्र मांसानुगस्वरूपत्वेन पित्तघ्नत्वं सम्भवति, तत्र पित्तघ्नत्वम् । अत्र च सर्पिषः पित्तघ्नत्वमस्वमात्रोपेतस्य वक्ष्यमाणस्य बृंहणाख्यस्य । न तु शोधनस्य मध्यमात्रोपेतस्य वा ॥

"न सर्पिः केवलं पित्ते पेयं श्लेष्मणि वा पुनः ।
सर्वं ह्यनुभजेद् देहं हत्वा मर्म च मारयेत् ॥"

इति वचनात् । पित्ते केवलमद्यं सर्पिर्न पेयम् । श्लेष्मणि पित्ते विशेषतः केवले पित्ते सर्पिषि पीते पित्तं स्नेहरूपेण सर्वं देहमनुभजेत् । ततश्चाधिकं रोगं सम्भारयेत् । श्लेष्मस्नेहरूपेण पित्तं श्लेष्मपित्तेन संज्ञां हत्वा मारयेत् । वृद्ध

च दुग्धं जाङ्गलं च मांसं स्नेहनम् । उष्णं मत्स्यमहिषमांसं च स्नेहनम् । कठिनमक्षोटनालिकेरादिफलं स्नेहनमिलादि द्रष्टव्यम् । अप्रतिज्ञातस्य स्वरूपकथनं विरूक्षणस्य कथमिति चेदुच्यते । विरूक्षणज्ञानमपि स्नेहनविज्ञानाय स्यादिति स्नेहव्यापत्प्रतीकारत्वाच्च शोधनाङ्गत्वाच्च लक्षणस्योक्तिः । हाटकोऽपि स्नेहने प्रकृते विरूक्षणोपन्यासोऽन्वयव्यतिरेकेण सुतरां स्नेहनस्य सम्यक् प्रतिपादनार्थमित्याह ॥ १ ॥

इदानीं स्नेहेषु मुख्यतम चतुष्टयमाह —

सर्पिर्मज्जा वसा तैलं स्नेहेषु प्रवरं मतम् ।
तत्रापि चोत्तमं सर्पिः संस्कारस्याऽनुवर्तनात् ॥ २ ॥

सर्पिरित्यादि । सर्पिषो ज्यायस्त्वादग्रेऽभिधानम् । सर्पिरादिचतुष्टयं स्नेहेषु सर्वस्नेहद्रव्येषु क्षीरमांसामिषादिषु मध्ये प्रकर्षेण वरं श्रेष्ठम् । आशु स्वकार्यकरणात् । स्थावराणा तिलातसीक्षौद्रादीनां यः स्नेहस्तत् तैलमित्युच्यते । जङ्गमानां स्नेह सर्पिः । मांसस्नेहो वसा । अस्थ्यन्तर्गत स्नेहो मज्जा । स्नेहेषु सर्पिरादिषु चतुर्ष्विति न वाच्य निर्धारणानुपपत्तेः । तत्रापि च तेष्वपि मध्ये सर्पिरुत्तमम् कुत. संस्कारस्यानुवर्त्तनात् । ननु यदि संस्कारमनुरुध्यते सर्पिस्तदानीं मरिचचित्रकादिभिर्द्रव्यैरभिसंस्कृतस्य घृतस्य शैत्यादिगुणविपर्यासः प्राप्त । न चेदं दृष्टमिष्ट वा यदस्य शैत्यादयो गुणा विनश्यन्त्यौष्ण्यादयश्चोत्पद्यन्त इति । अत्रोच्यते । अनुशब्दोऽत्र सहार्थे । अनेकार्थत्वान्निपातानाम् । अतोऽयमर्थः — सर्पिषो गुणाः संस्कारगुणै सह वर्तन्ते न तु तैलादीनाम् । तैलवसामज्जानो हि संस्कारवशात् स्वगुणास्त्यजन्तीति । अत्र चोदाहरणं चन्दनाद्यं तैलम् । अतो द्रव्यान्तरैर(न)भिभूतगुणत्वात् सर्पिष, इतरेषां च तैलादीनां द्रव्यैरभिभूतगुणत्वादुत्तमत्वम् । अत एव च वातपित्तज्वरादिषु घृतसाध्येषु भेषजं तैलं नेष्टमनिष्टसम्पादनात् । तैलसाध्येषु विकारेषु तदुपशान्त्यर्थं तथाविधद्रव्यसंस्कृत घृतमभीष्टम् । तद्धि न तथानिष्टहेतु. । तस्मात् सर्वस्नेहेभ्य सर्पिरेवोत्तमं सस्कारस्यानुवर्तनात् । हाटकोऽप्याह — संस्कारस्यानुवर्तनाद्, येन द्रव्येण संस्क्रियते तमनुवर्तते । स्वगुणानजहत् सस्कारगुणान् गृह्णातीति संस्कारानुवर्तनम् । एतत् तैलादिषु न सम्भवति । तथा हि—चन्दनादितैलादीना विपरीतैर्द्रव्यान्तरैरौष्ण्यादिनाशो भवतीति । न तु स्नेहनाशः । तस्य बहुत्वाद् । ह्यपाकारोऽप्याह — सस्कारो नामातिशय-

गुणाधानमित्यर्थः । पाकसंयोगादिः संस्कारः । येन द्रव्यादिना सर्पिः संस्क्रियते तस्य गुणान्नादाय स्वगुणानत्यजदेव तिष्ठति । तैलादयस्तु स्वगुणान् विहाय संस्कारगुणान् भजन्ते । संस्कारस्यानुरूपावृत्तिरनुवृत्तिः । अनेकशक्तिसम्पन्नत्वान्माधुर्यादविदाहित्वाच्च तदन्तःसात्म्यत्वाच्च घृतस्तुतिरियमित्यर्थः । इति ॥ २ ॥

पित्तघ्नास्ते यथापूर्वमितरघ्ना यथोत्तरम् ।

पित्तघ्ना इत्यादि । यो यः पूर्वो यथापूर्वम् । यो य उत्तरो यथोत्तरम् इति 'यथा-सादृश्ये' इत्यव्ययीभावः । उत्तरमपेक्ष्य पूर्वः, पूर्वमपेक्ष्योत्तरः । तेन चतुर्णां स्नेहानां यथानिर्दिष्टानां सर्पिरादीनां त्रय एव स्नेहाः वसामज्ज-सर्पिःसंज्ञका यथापूर्वत्वेन संबध्यन्ते, न तु तैलाख्योऽपि स्नेहस्तस्य पूर्वत्वाभावात् । नह्यन्योऽस्मात् कश्चिदुत्तरोऽस्ति, यदपेक्षयैव पूर्वत्वमालम्ब्य आसादयेत् । तस्मात् पूर्वत्वसम्बन्धशून्यस्य । तदेवं यथापूर्वं पित्तघ्नत्वं वसामज्जसर्पिषाम् । वसा पित्तघ्नी, मज्जा पित्तघ्नतरः, घृतं पित्तघ्नतममित्यर्थः । इतरौ वातकफौ पित्तापेक्षया तौ घ्नन्ति पराकुर्वन्ति इतरघ्नाः । यथोत्तरं त्रयः स्नेहाः मज्जावसा-तैलास्त्र्यो वातश्लेष्मघ्नाः । मज्जा वातश्लेष्मघ्नः, वसा वातश्लेष्मघ्नतरा, तैलं वातश्लेष्मघ्नतममित्यर्थः । हाटकस्त्वाह — ते च सर्पिरादयः स्नेहा यथापूर्वं पित्तघ्नाः । यथोत्तरमितरघ्नाः । श्लेष्माणि स्नेहमतिपेधादितरघ्नशब्देन सामान्योक्तावपि वातश्लेष्माण इति गम्यते । अथ वा द्रव्यान्तरसंस्कृतसर्पिराद्यपेक्षया इतरशब्देन कफघ्न्यापि ग्रहणम् । तेनैव तैलस्यापि पित्तघ्नत्वं सिद्धम् । अक्षादीनां वा तैलस्य पित्तघ्नत्वमिति । यो यस्मात् पूर्वः, स तस्मात्पित्तघ्नः । यो यस्मादुत्तरः, स तस्माद् वातघ्नः । तैलस्य पूर्वत्वासम्भवात् पित्तघ्नत्वाभावः । न च सर्पिरितरघ्नं तस्योत्तरत्वाभावात् । वसामज्जोस्तु यत्र मांसानुगस्वरूपत्वेन पित्तघ्नत्वं सम्भवति, तत्र पित्तघ्नत्वम् । अत्र च सर्पिषः पित्तघ्नत्वमस्वमात्रोपेतस्य वक्ष्यमाणस्य बृंहणाख्यस्य । न तु शोधनस्य मध्यमात्रोपेतस्य वा ॥

"न सर्पिः केवलं पित्ते पेयं श्लेष्मणि विशेषतः ।
सर्वं वानुवजेद् देहं हत्वा मन्दाग्निं च मारयेत् ॥"

इति वचनात् । पित्ते केवलेऽल्पे सर्पिर्न पेयम् । श्लेष्मणि पित्ते विशेषतः केवले पित्ते सर्पिषि पीते पित्तं श्लेष्मस्थानं सर्वं देहमनुव्रजेत् । ततश्चाधिकं रोगं कुर्यात् । श्लेष्मण्येहसहिते पित्ते स्रोतःविधानेन मन्दाग्निं हत्वा मारयेत् । तीव्र

णस्य द्रव्यान्तरेण सह प्रयोगादनपायित्वमिति । कृष्णाकारत्वाद् — ते सर्पिरादयः स्नेहा यथापूर्वं पूर्वानतिक्रमेण पित्तघ्नाः । उत्तरानतिक्रमेण इतरघ्नाश्च । इतरशब्देन वातो गृह्यते । श्लेष्मणि स्नेहनिषेधात् । कफहरद्रव्यसिद्धस्य स्नेहस्य कफहरत्वमस्तीति इतरशब्दः कफेऽपि वर्तत इत्येके । ननु सर्पिर्मज्जवसातैलानां पित्तघ्नत्वे सति यथापूर्वं पित्तघ्ना इति शक्यते वक्तुम् । वसामज्ज्ञोस्तु पित्तकर्तृत्वं कफपित्तबलप्रदाविति च । उच्यते । पित्तहरद्रव्यसिद्धानां स्नेहानां पित्तहर्तृत्वमित्यदोषः । सिद्धानां स्नेहानामुक्तिरिति कथं ज्ञायते । ब्रूमः । शुद्धयङ्गत्वेन स्नेहानामुक्तेः सिद्धानामिति गम्यते । न हि स्नेहनार्थमसिद्धस्नेहानां विधिः । कफमांसबलप्रदाविति पाठश्चेन्नायं दोषः । अक्षनिम्बादितैलानां पित्तहर्तृत्वकीर्तनादेवमुक्तिः, तिलोद्भूतमद्यवच्चेन पित्तघ्नदिति ॥

घृतात्तैलं गुरु वसा तैलान्मज्जा ततोऽपि च ॥ ३ ॥

घृतादित्यादि । घृताद् गुरुणः सकाशाद् तैलं गुरुतरमित्यर्थः । वसा तैलाद् गुरुतमा । ततोऽप्यतिशयेन मज्जा गुरुतमः । एतच्च प्रयोगवाक्येषूपयुज्यते इत्युच्यते ॥ ३ ॥

इदानीं यमकस्नेहलिङ्गितस्नेहः महास्नेह इति तत्र तत्रोच्यते । ते च यं जानन्ते इति तज्ज्ञापनार्थं नामानि परिभाषते —

द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्निग्धतो महान् ।

द्वाभ्यामित्यादि । सर्पिरादिभ्यो द्वाभ्यां स्नेहाभ्यां संयुक्ताभ्यां यमकस्नेहो भवति । यथा सर्पिस्तैलाभ्यां, सर्पिर्मज्जाभ्यामित्यादि । एवं त्रिभिः स्नेहैः चतुर्भिस्निग्धतो भवति । सर्वैः पुनर्महास्नेहः । अत्र, उच्यते इति शेषः इत्यन्ये ॥

इदानीं स्नेहानस्नेहांश्च निरूपयति —

स्नेह्यसंशोध्यमध्यस्नैर्न्यायामासक्त्वाचिन्तकाः ॥ ५ ॥
मृदुबालाऽबलकृशा रूक्षाः क्षीणासृगेतसः ।
वातार्तस्यन्दतिमिरदारुणप्रतिबोधिनः ॥ ५ ॥
स्नेहाः

स्नेह्येत्यादि । स्नेहाद्यः स्नेहा स्नेहयोग्या । न स्नेहोहितः स्नेह्य इत्यर्थः । यश्च संशोध्यः स प्रथमं स्नेहः । अर्हार्थे कृत्यप्रत्ययोऽत्र प्यत् । आसक्तशब्दस्य मद्यादित्रयेण सम्बन्धः । अनल्पा अत्यल्पा इत्यर्थः । क्षीणस-

न्वस्यास्थरेतोभ्यां मध्यन्धः। क्षीणरुधिराः क्षीणशुक्राः। वातार्तांश्च। स्यन्दादिषु प्रत्येकमिनियोज्यः। स्यन्दोऽभिष्यन्दोऽक्षिरोगः। दारुणप्रतिबोधः कृच्छ्रो-न्मीलो वर्त्मरोगविशेषः। एते स्नेह्याः स्नेहार्हाः ॥ ४, ५ ॥

नत्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः।
ऊरुस्तम्भातिसाराऽऽमगलरोगगरोदरैः ॥ ६ ॥
मूर्च्छाच्छर्यरुचिश्लेष्मलृष्णागयैश्च पीडिताः।
अपप्रसूता युक्ते च नस्ये वस्तौ विरेचने ॥ ७ ॥

नेत्यादि। अतिमन्दाग्न्यादयो न स्नेह्याः। अतिशब्दो यावत् प्रत्येकं दुर्बलान्तेषु योज्यः। सेनातिदुर्बलो न स्नेह्य इत्यर्थः। अत एवाल्पबलाः स्नेह्याः न त्वतिदुर्बला इति न पूर्वापरविरोधः। अतिमन्दाग्नेः स्नेहजरणाशक्ते-र्निषेधः। अतितीक्ष्णाग्नेरत्यग्निवृद्धिकरत्वात्। अतिस्थूलस्यामिमेदोवृद्धिभयात्। अत्यल्पबलानां जरणाशक्तेर्मन्दाग्निवत् स्नेहव्यापद् जायते। ऊरुस्तम्भादीनां मध्यान्तानां पीडितशब्देन सम्बन्धः। एषु शोधनप्रसङ्गेऽप्यस्नेहनं स्नेहव्याप-द्भयात्। स्नेहनं विना शोधनमिति यावत्। अपप्रसूता स्रुतगर्भा न स्नेह्येति लिङ्गवचनविपरिणामः। प्रयुक्ते च नस्यादिकर्मणि आदोषसाम्यात् सर्व एव न स्नेह्याः ॥ ६, ७ ॥

साम्प्रतं चतुर्णां स्नेहानां मध्ये यो येभ्यो हितः तं दर्शयन्नाह। स्नेहद्रव्येण स्नेहानां प्रयोगविषयं दर्शयतीति द्रव्याकारः —

तत्र घीस्मृतिमेधादिकांक्षिणां शस्यते घृतम्।
ग्रन्थिनाडीकृमिश्लेष्ममेदोमारुतरोगिषु ॥ ८ ॥
तैलं लाघवदार्ढ्यार्थिक्रूरकोष्ठेषु देहिषु।

तत्रेत्यादि—तत्र तेषु स्नेहेषु मध्ये घीपस्मृतिकाङ्क्षिणां स्नेहप्रसङ्गे सति घृतं शस्यते। तस्य तथाशक्तित्वात्। धीर्बुद्धिर्व्यवसायात्मिका। पूर्वविज्ञान-जनितसंस्कारसम्भूतं ज्ञानं स्मृतिः। मेधा प्रज्ञा आशुग्रहणसामर्थ्यं वा प्रत्या-ययोः। आदिशब्देन स्वरायुर्वर्णबलपुष्ट्यादिपरिग्रहः। केचिदमिकाङ्क्षिणा-मिति पठन्ति। ग्रन्थ्यादिरोगिषु, लाघवदार्ढ्यवत्त्वार्थिषु, क्रूरकोष्ठेषु च प्राणिषु तैलं शस्यते इति सम्बन्धः ॥

वातातपाध्वभारस्त्रीव्यायामक्षीणधातुषु ॥ ९ ॥
रूक्षक्लेशक्षमाऽत्यग्निवाताद्यनपथेषु च ।
शेषौ

वातेत्यादि । वातादीनां क्षीणधातुना प्रत्येकं सम्बन्धः । वातादिभिः षड्भिः कारणैः क्षीणधातुषु च रूक्षादिषु च । शेषौ स्नेहौ घृततैलाभ्यामन्यौ वसामज्जानौ शस्येते । क्लेशक्षमस्य मज्जवसयोर्विधानादक्लेशक्षमे पुरुषे सर्पिस्तैलयोरेव प्रयोगः सिध्यति । क्लेशक्षमः क्लेशसहः । अत्यग्निषु महाबलवदमिष्विति द्रष्टव्यम् । अन्यथात्यग्निषु स्नेहनिषेधात् पूर्वापरविरोधः स्यात् । अथवात्यग्निष्वपि वसामज्जानौ अनुज्ञे अपवादवाक्यत्वाद् । अत एवात्यग्नेः स्नेहनिषेधोऽपि मज्जवसाव्यतिरेकेण । अत्रानयोरनुज्ञानादित्यवगन्तव्यम् । अथवात्यग्निविहितं वराहादिमांसम् । तथा तज्जयोर्वसामज्जोरेवोपयोगे मांसानुगस्वरूपाविति वचनात् । कुपितेन वातेनावृता रुद्धाः पन्थानो देहस्रोतांसि येषां ते वातावृतपथास्तेषु ॥

मज्जवसयोः समानं विषयं प्रदर्श्येदानीं वसाया विषयान्तरमप्याह—

वसा तु सन्ध्यस्थिमर्मकोष्ठरुजासु च ॥ १० ॥
तथा दग्धाहतभ्रष्टयोनिकर्णशिरोरुजि ।

वसेत्यादि । वसा तु तुशब्दो विशेषे । सन्ध्यादिस्थानजातासु रुजासु व्याधिषु प्रायशः । चशब्दः समुच्चये । वक्ष्यमाणेषु च दग्धरुगाहतरुग्भ्रष्टयोनिरुग्कर्णरुक्शिरोरुक्षु च शस्यते ॥

शोधनार्हस्य स्वस्थस्य स्नेहविषये स्नेहनियमः कालनियमश्च क्रियते । इत्याचारोऽपि सर्वत्र सर्वस्नेहप्रायो विषयभेदो दर्शितः । इदानीं सर्वस्मिन् काले सर्वस्नेहप्रायौ स्नेहकालयोर्नियमं दर्शयतीत्याह । अनन्तरं स्वस्थस्य शोधनार्हं च स्नेहानाश्रुत्याविशेषेण नियमप्रदर्शनायमाहेति हाटकः । कालमुद्दिश्य स्नेहौचित्यमाहेति पाठ्यकारः—

तैलं प्रावृषि वर्षान्ते सर्पिरन्यौ तु माधवे ॥ ११ ॥

तैलमित्यादि । प्रावृट्शब्देन पूर्वोक्तः श्रावणमासो गृह्यते । एवं शेषयोरपि । प्रावृषि श्रावणे मासि स्नेहनप्रसङ्गे वातजयाय तैलं शस्तम् । योज्यमिति वा । वर्षान्ते शरदि कार्तिके मासे घृतं पित्तजयाय । अन्यौ तु वसामज्जानौ माधवे वसन्ते चैत्रे मासे कफोत्क्लेशाय । तुशब्दो विशेषे । वसामज्जो-

दोषकालयोस्तुल्यत्वेऽपि उत्क्लेशनार्थं प्रयोगो न विरुध्यत इत्यर्थः। अयं चोत्सर्गविशेषणोक्तः सर्वस्नेहः शोध्यस्याशोध्यस्य च ॥ ११ ॥

ऋतौ साधारणे स्नेहः शस्तोऽह्नि विमले रवौ।

ऋतौ साधारणे श्रावणकार्तिकचैत्राख्ये स्नेहः शस्तः। हेतौ सप्तमी। अत्युष्णवर्षशीतेषु ग्रीष्मवर्षाहिमागमेष्वेवं प्रयोगो नेष्यते। श्रावणादीनां साधारणत्वादेवं विचिरित्यर्थः। ऋतौ साधारण इति (कथमुक्तं? एतदुक्तं)भवति। सङ्क्षिप्ते साधारणे ऋतौ यथा पूर्वं शोधनस्योक्तं तथेदानीमपि स्नेहने क्रियमाणे तथाविध एव साधारणऋतुः सङ्क्षेप्यः। तत्रापि नियमं दर्शयति— अह्नि दिवसे न निशायाम्। रवौ च विमले निर्मले मेघादिभिरनावृते सातपे शस्तः स्नेहः सर्वोऽपि दिवस एव प्रयोज्यः। ऋत्वेकदेशो ऋत्वभिधानमुपचारात्॥

शीतोष्णयोः स्नेहप्रतिषेधादिदमुच्यते तैलं त्वरायामित्यादि। इत्याचार्यस्तु तैलं प्रावृषीत्यादिस्वग्रन्थविषयमुक्त्वेदानीं दोषादिभेदादपि स्नेहभेदं दर्शयति तैलं त्वरायामित्यादिना। अस्मद्गुरवस्तु तैलं प्रावृषीत्यादिना शोधनार्हस्य स्वस्थस्य स्नेहविषये स्नेहनियमकालनियमश्च, ऋतावित्यादिना शोध्यस्याशोध्यस्य चातुरस्य स्वस्थस्य च स्नेहनियमकालनियमश्च,। शीतोष्णयो स्नेहप्रतिषेधादिदमुच्यते तैलं त्वरायामित्यादीत्याहुः—

तैलं त्वरायां शीतेऽपि

तैलं त्वरायामित्यादि। त्वरायां सत्यां स्नेहविषयव्याध्युपशमाय त्वरमाणे शीते हेमन्तशिशिराख्ये ऋतावपि दिवा तैलं योजयेत्। अपिशब्दात् केवलं वर्षासु। अथ वा तैलं त्वरायामिति, शीघ्रसम्पाद्ये स्नेहकार्ये हेमन्ते शिशिरे च काले तैलं स्नेहनार्थं प्रयोज्यम्। स्नेहकार्यं द्रुतं जनयति। अपिशब्देन प्रावृष्येवेति न नियम इत्यर्थः।

सर्पिषोऽपि कालभेदमाह सर्वस्य स्नेहस्यादि उपयोगात्, रात्रावप्रयोग प्राह इत्याह—

घर्मेऽपि च घृतं निशि ॥ १२ ॥

घर्मेऽपीत्यादि। न केवलं शरदि घृतं प्रयुञ्जीत। यावद् घर्मेऽपि ग्रीष्मेऽपि उष्णकाले त्वरायां सत्यां निशि रात्रौ घृतं प्रयुञ्जीत। दाहार्तानां सर्पिषो नोपदेशाद्। अन्यत्तु रात्रावेव सर्पिरेव च ॥ १२ ॥

दोषतोऽप्याह—

निश्येव पित्ते पवने संसर्गे पिच्चवत्यपि।

निश्येवेत्यादि । तथा केवले पित्ते, कुपिते पवने च कुपिते, तथा पित्तवति संसर्गे पित्तानिले पित्तकफे च निश्येव यथार्हस्नेहो योज्यः । अथवा पित्तादिषु निशि घृतं योज्यम् । न केवलं घर्मकाल एव सर्पिर्निशि योज्यं, किन्तु पित्ते दोषे पित्तजनिते रोगे च, पवने पवनजनिते रोगे च निशि घृतं योज्यमित्यर्थः ॥

निश्यन्यथा वातकफाद्रोगाः स्युः पित्ततो दिवा ॥ १३ ॥

निश्यन्यथेत्यादि । अन्यथा शीते काले निशि घृतोपयोगाद् वातकफाद्धेतो रोगाः स्युः । पित्ततो दिवा, उष्णे काले दिवा तैलोपयोगात् पित्तनिमित्ता रोगाः स्युरिति सम्बन्धः । हृदाकारोऽप्याह — निश्यन्यथा, विहितप्रकारादन्यप्रकारेण घृतप्रयोगे, वातकफयोः कोपः, उष्णकाले दिवा तैलोपयोगे पित्तकोपः स्यात् । उक्तवांश्च —

"सर्वं सर्वस्य च स्नेह युञ्ज्याद् मास्वति निर्मले ।
ऋतौ साधारणे दोषसाम्येऽनिलकफे कफे ॥
दिवा निश्यनिले पित्ते संसर्गे पित्तवत्यपि ।
स्वरमाणे तु शीतेऽपि दिवा तैलं प्रयोजयेत् ॥
उष्णेऽपि रात्रौ सर्पिश्च दोषादीनां वीक्ष्य चान्यथा ।
निश्यश्नुते वातकफाद् रोगानह्नि पित्ततः ॥

इति । अन्यत्रापि —

न प्रावृष्येव तिलजं हेमन्ते शिशिरे दिवा ।
स्नेहनार्थं प्रयुञ्जीत विकारे कफवातयोः ॥
न शरद्येव सर्पिः स्यादुष्णकाले तु पैत्तिके ।
विकारे निशि युञ्जीत संसर्गे पित्तवत्यपि ॥
उष्णकाले दिवा तैलप्रयोगात् पित्ततो भयम् ।
शीतकाले निशि घृते युक्ते वातकफाद् भयम् ॥"

इति ।

सर्पिः शरदि पातव्यं वसा मज्जा च माधवे ।
तैलं प्रावृषि नात्युष्णशीते स्नेहं पिबेन्नरः ॥
वातपित्ताधिको रात्रावुष्णे चापि पिबेन्नरः ।
श्लेष्माधिको दिवा शीते पिबेद्योमलभास्करे ॥

अल्पाग्नेर्वा दिवा पीतो वातपित्ताधिकेन वा ।
मूर्छां पिपासामुन्मादं कामिलां वा समीरयेत् ॥
पीते रात्रौ पिबन् स्नेहं सद्यः श्लेष्माधिकोऽपि वा ।
आनाहमरुचिं शूलं पाण्डुतां वा समृच्छति ॥
जलमुष्णं घृते पेयं यूष तैलेऽनुशस्यते ।
वसामज्जोऽस्तु मण्डः स्यात् सर्वमुष्णमथाम्बु वा ॥

इति चाद्यं । श्लेष्मानुबन्धादिभ्यो दोषेभ्यः शरदि वसन्ते च सर्पिरादीनां पानमयुक्तम् । ब्रूमः । शरदि तत्साध्यस्य सर्पिषः श्लेष्मानुबन्धपरिहारार्थं तिक्तस्य पानं विहितम् । मधौ तु वसामज्जानौ कफं वर्धयत एव । एवं च सति वमनं सुखेन क्रियते । माधवे प्रतिश्यपिता (ना ? मा) वातघ्नस्यात् तच्छमनार्थं प्रयुज्यते । तैलस्य प्रावृषि पित्तानुबन्धेऽपि तत्सदृक्षौषधसंस्कृतस्यागमयित्वमिति न्यासे । अरुणदत्तोऽप्याह — तैलं प्रावृषीत्यादि । तैलं प्रावृषि शस्यते इति सम्बन्धः । एवमुत्तरत्रापि । स्नेहनार्थं सर्वस्यैव स्नेहस्य प्रसङ्गे नियमोऽयं क्रियते । तैलं प्रावृष्येव । वर्षान्त एव सर्पिः । वसामज्जानौ माधव एव इति । वर्षासु तैलं वर्षान्ते सर्पिः वसामज्जानौ माघ इति योऽयं नियमः स किञ्चिदपेक्ष्यैव वर्तते आहोस्विदनपेक्ष्येत्यस्मिन् पर्यनुयोग इदमाह — ऋतावित्यादि । श्रावणादावृतौ साधारणे संशोधनात् पूर्वं स्नेहनार्थं स्नेहस्तैलादिकः शस्तः । तयाँहि वासरे न निशायां तथा विमले रवौ जलदनीहारादिना चास्थगिते स्वराद्यो स्नेह इति । सामान्यशब्दप्रयोगात् सर्वस्नेहा सर्पिरादिचतुष्प्रकारो गृह्यते । तैलमित्यादि । स्वरायां सत्यां व्याधिक्रियां प्रति प्राप्तकाले स्नेहयोग्यतायां सत्यां शीते हेमन्तशिशिराख्ये काले नलं संशोधनात् पूर्वं स्नेहनार्थं शस्तम् । नान्यः स्नेहः । अपिशब्दान्न केवलं वर्षासु शस्तमित्यर्थः । सर्वस्य स्नेहस्याहन्युपयोगाद् रात्रौ विप्रयोगः प्रायः इत्याह — धर्मेऽपि चेत्यादि । न केवलं शरदि घृतं प्रयुञ्जीत । न च धर्म एव निश्युपयुञ्जीत । यावत् पित्ते कुपिते तज्जे वा विकारे, तथा पवने कुपिते स्नेहसाध्ये धर्मे घृतं निश्युपयुञ्जीत । न दिवा न च तैलवसामज्जानौ वा, नवा पित्तवति पित्ताधिके संसर्गसान्निपातिकाख्ये, श्लेष्मपित्ताधिक्ये च कुपिते, तज्जे वा विकारे स्नेहसाध्ये धर्मे घृतमेव निश्युपयुञ्जीत । पित्ते पवन इत्येतद्दोषविकारोभयोपलक्षणार्थं वेदितव्यम् ।

पित्तवतीति भूम्नि मतुप् । निश्चयन्यथेत्यादि । अन्यथोक्तप्रकाराद्यपरेण प्रकारेण यथा शीतकाले निशि घृतोपयोगाद् वातरुग्भ्यो रोगा भवेयुः, तथा दिवा उष्णकाले तैलोपयोगाद् पित्ताद् रोगा स्यु. । वसामज्जोस्त्वनिश्चितरूपत्वात् तयोर्नोष्णकाले, नापि शीते त्वराया सत्यामुपयोगस्तन्त्रान्तरे दर्शित । तथा चोक्तम् —

यथासत्त्वं तु (स²शै)त्योष्णे वसामज्जोस्तु निर्दिशेत् ।

इति ॥ १३ ॥

स्नेहस्य कालनियममुक्त्वा कथं स्नेहं उपयुञ्जत इति योजना दर्शयति—स्नेहानां प्रयोगकालमुक्त्वा इदानीं प्रयोगभेद दर्शयतीति हृदाकार । यक्ष्येत्यादिना सर्वस्नेहाना मवचारण मूत इति पाठ्यकार ।

युक्त्यावचारयेत्स्नेहं भक्ष्याद्यन्नेन वस्तिभिः ।
नस्याभ्यञ्जनगण्डूषमूर्धकर्णाक्षितर्पणैः ॥ १४ ॥

युक्त्येत्यादि । युक्तिर्योग उपयोगलक्षण युक्त्या मात्राकालक्रियाभूमिदेहदोषस्वभावानुगुणया स्नेह सर्वं सर्पिराद्यमवचारयेदुपयुञ्जीत । केन सहेत्याह भक्ष्यादिनान्नेन सह । भक्ष्य शशाङ्कक्रिणादि । भक्ष इति वा पाठ. । आदिशब्देन भोज्यलेह्यपेयस्य त्रिविधस्याप्यन्नस्य ग्रहणम् —

"भक्ष्य भोज्य तथा पेय लेह्य चान्न चतुर्विधम् ।

इति । देशादीन् निरूप्य युक्त्या कस्यचिद् भक्ष्येण कस्यचिदन्नेन सहेति पाठ्यकार. । युक्त्या यथायोग्य देशकालाद्यानुकूल्येन भक्ष्यादिभिर्युक्त्या योगेन सहेति हृदाकार । तथा, वस्तिभि बहुवचननिर्देशात् निरूहानुवासनोत्तरवस्तिभि सह ।। तथा नस्यादिभिश्च । मूर्धतर्पण शिरोवस्ति । एव भक्ष्यादिना प्रयुज्यमानस्य स्नेहस्य चतुष्पष्टिसङ्ख्या विचारणा भवन्ति ॥ १४ ॥

कथमित्याह—

रसभेदैककत्वाभ्या चतुष्पष्टिविचारणा ।
स्नेहस्यान्याभिभूतत्वादल्पत्वाच्च क्रमात्स्मृताः ॥ १५ ॥

रसभेदेत्यादि । रसभेदश्चैकत्व च ताभ्या रसभेदैकत्वाभ्यां स्नेहस्यायचार्यगणस्य चतुष्पष्टिविचारणा भवन्ति । * उच्यन्ते । त्रिषष्टि रसभेदै सह स्वय चेति चतु षष्टिका विचारणा भवेयुः । अथवा विविध

* अत्र रसभेदा एकैकद्रव्यगा इत्यादिग्रन्थेन त्रिषष्टिरेव भवेत्याहु । ते सहोपयुक्तस्य तथा एकस्य एक एव कालस्नेह इत्यप । अस्य भाव एकत्व तेन सहोपयुक्तस्य चतु षष्टिविचारणाः ।

धार्यते प्रयुज्यतेऽनया स्नेह इति विचारणा। अथवा विलम्ब्य चारणा विचारणा। अथवा विर् ईषदर्थे चर प्रतियत्ने प्रतिपल. संस्कारः ईषत् सस्कारहेतवः। प्रयोगविशेषा विचारणा अल्पमात्रा कल्पना इत्यर्थोलभ्यते। तस्माद् मद्यायले रसभेदसम्भव'। एको य स्नेहः केवलप्रयुज्यते। न च पीयते। एकशब्देन वस्तिनस्याभ्यञ्जनादिकं गृह्यते। कथमेता एव विचारणा उच्यन्ते नाच्छपेय इत्याह। स्नेहस्येत्यादि। क्रमाद् यथासङ्ख्यं स्नेहस्यान्याभिभूतत्वादन्येन भक्ष्यादिना बहुना तथा रसभेदेन च सहोपयुक्त्या अभिभूतत्वात् तथाल्पत्वाच्च अल्पोपयोगित्वात् मूर्धकर्णाक्षितर्पणस्या(द्दि?दि)वु हि पान इव प्रभूतस्यावचारयितुमशक्यत्वाच्च चतुःषष्टिर्विचारणाः स्मृता., आयुर्वेदविद्भिर्मुनिभिरिति शेषः। रसभेद. सह प्रयुक्ते अन्याभिभूतत्वात् केवलप्रयोगेऽल्पत्वाच्चेति क्रमार्थः। मद्यप्रहणमच्छपानशमनबृंहणादीनां विचारणासंज्ञा नेति सूचयितुम्। विचारणासंज्ञा कथं क्रियते इति चेत् स्नेहमवचारयेद् इति यत्रोक्तं तत्राल्पमात्रा कार्येति सूचयितुम्। यत्र पुनरच्छ इति व्यवहारः तत्रैव बहुमात्रा कल्पना कार्येति॥ १५॥

यथोक्तहेत्वभावाच्च नाच्छपेये विचारणा।
स्नेहस्य कल्पः श्रेष्ठः स्नेहकर्माशुसाधनात्॥ १६॥

यथोक्तेत्यादि। स्नेहस्य विचारणासंज्ञात्वे यथानिर्दिष्टो यो हेतुः तस्य यथोक्तस्य हेतोरन्याभिभूतत्वादिलक्षणस्य चाभावाद् अविद्यमानत्वाद् योऽच्छपेयः केवल एव तस्मिन्नच्छपेये केवलस्नेहपाने न विचारणासंज्ञा, केवलोपयोगित्वात् बहूपयोगित्वाच्चेत्यर्थः। अन्याभिभूतत्वमल्पत्वं च न विद्यतेऽच्छपेये तत्र पानसंज्ञैव। यत्र पिबेदिति वक्ष्यति तत्र बहुमात्रा। यत्रावचारयेदिति तत्र भक्ष्यादिभिः सह वा, केवलं स्नेहनादिकं वा कार्यमिति सूचयति। नन्विह केवलः स्नेहो न विचारणेत्युच्यते। प्राक् च केवलस्यैव स्नेहस्य वस्त्युपयोगो विचारणेत्यभ्यधायि। तदेतत् पूर्वापरव्याहतमिव मन्यामहे। नैतदस्ति। अच्छपेय इत्यस्य त्वयमर्थः। अच्छः केवलो यः स्नेहः पीयते स विचारणा न भवति। केवलस्नेहपानं विचारणेति न स्मर्यते। मूर्धाक्षितर्पणादिना तु केवलस्य स्नेहस्य य उपयोग. सा विचारणेति। उक्तं च मुनिना—

ओदनश्च विलेपी च रसो मांसं पयो दधि।
यवागूः सूपशाकौ च यूषः काम्बलिकः खलः॥

सक्तुवस्तिलपिष्टे च मद्य स्नेहास्तथैव च ।
मध्यमभ्यञ्जन बस्तिस्तथैवोत्तरवस्तयः ॥
गण्डूष' घृतैतैल च नस्त कर्माक्षितर्पणम् ।
चतुर्विंशतिरित्येता स्नेहस्य प्रविचारणा ॥
यच्छ्रेयस्तु य स्नेहो न तामाहुर्विचारणाम् ।

इत्यादि ॥

स्नेहस्येत्यादि । स्नेहस्य सोऽच्छपेयाख्य कल्प प्रयोग श्रेष्ठ' प्रशस्ततम' । कुत इत्याह स्नेहकर्मणां तर्पणमार्दवादीना आशुसाधनात शीघ्र-सम्पादनात् ॥ १६ ॥

प्रयोगभेदगुक्त्वदानीं अरुच्छेयभेदस्य मात्रागेद त्रिविध मात्रालक्षण चाधिकृत्याह —

द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् ।
ह्रस्वमध्योत्तमा मात्रास्तास्ताम्यश्च ह्रसीयसीम् ॥ १७ ॥

कल्पयेद्दोष्य दोषादीन् प्रागेव तु ह्रसीयसीम् ।

द्वाभ्यामित्यादि । द्वाभ्या यामाभ्यामग्निबलापेक्षयोपयुक्ता या स्नेहमात्रा आठरानलत्वशात् जरा याति सा तस्य मात्रा, ह्रस्वा । याम प्रहर. । या चतुर्भिर्यामैर्जीर्यति सा मध्यमा । या अष्टाभिर्यामैर्जीर्यति सा उत्तमा मात्रा । एव क्रमाद् यथाक्रम ता ह्रस्वमध्योत्तमा मात्रा कल्पयेदिति वाक्यशेष । दोषदूष्याद्यानुगुण्येन नाम्यश्च तिसृभ्यो ह्रसीयसी-मतिशयेन ह्रस्वां चतुर्थीमपि कल्पयेद् वैद्य इति शेष । नो' जरणकाल्यनुक्ते-र्दोषादिपारतन्त्र्योक्तेश्च ह्रसीयस्या बहुविधमानत्व दर्शितम । 'ह्रस्वमध्योत्तमा' इति निर्देशो 'ह्रस्वापोरित्या'दिना ह्रस्व । ह्रस्वा मात्रा यावद्द्रव्यलक्षणा । ततोऽप्यर्धमात्रेण या जरा गच्छति सा ह्रसीयसी । दोषादीनि दोषदूष्यरोगव देशकालबलशरीराहारसत्त्वसात्म्यवयसा वीक्ष्यानुक्तस्य । द्विविधो हि याम — उक्त च मौहूर्तिके ॥

"यादो यास्तु चतस्र स्युर्याम रात्रावपि नाडिका यास ।
पूर्व प्रहरकनामा तस्यार्धं ऋषिभो दोष ।

इति ।

अथ महतो यामस्य प्रमाणम् । तथा चोक्तम्—

"अहोरात्रस्य सूक्ष्मस्यांह प्र

प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति ॥

अल्पामयादीनामल्पो यामो भाव । तदर्थं ह्रसीयसीमिति । ह्रस्वतमा ह्रसीयसी । अगेव तु ह्रसीयसीमिति — यत्राप्यन्यतमा मात्रा योज्या, तत्राप्यज्ञातकोष्ठत्वात् प्राक् प्रथममेव ह्रसीयसीं कल्पयेत् ।

अज्ञातकोष्ठे हि बहु कुर्याज्जीवितसंशयम् ।

इति वचनात् । अज्ञातकोष्ठे पुरुषे उत्तममात्राविषयेऽपि पूर्वं ह्रसीयसीमेव कल्पयेत् । ततो ह्रस्वामनन्तरं मध्यमामनन्तरमुत्तमाम् । एवं मध्यममात्राविषये ह्रसीयसीं, ह्रस्वमात्राविषयेऽपि ह्रसीयसीं प्रकल्पयेत् । अतिप्रत्यवायतया । एवकारोऽवधारणे । तु शब्दो यथोत्तरमिति क्रमनिर्देशार्थे । तुशब्दोऽवधारणे इतीन्दु । ह्रस्वाकारोऽप्याह — महायामविषयेऽपि प्रथमं ह्रसीयसीमेव प्रयुञ्जीत कोष्ठादिपरिज्ञानार्थम् । उक्तं च सारमुष्टौ—

उत्तमाविषये मध्यां मध्यमादिषयेऽवराम् ।
स्नेहमात्रां प्रयुञ्जीत भिषक् कोष्ठादिवित्तये ॥

इति । अन्यैस्तु पलद्वयपलचतुष्टयपलषट्कमद्ध्यावच्छिन्ना मात्रा उक्ता । नैतद् युज्यते । यतो जाठरानलशक्तिमनपेक्ष्य स्नेहमात्रा प्रयुज्यमाना अनर्थायैव । मुनेरपि नैतन्मतम् । तद्ग्रन्थो हि — अहोरात्रमह कृत्स्नमित्यादिना पठित ॥ १७ ॥

अधुना शोधनवमनबृंहणमदात् त्रिविधस्य स्नेहस्य कालमात्रावयवमविदुषाह । अथवाधुना ह्रस्वादिमात्राणां विषमभेदेन शोधनवमनबृंहणं नेदं किं कुर्यादित्याह

अस्तने जीर्ण एवान्ने स्नेहोऽच्छः शुद्धये बहुः ॥ १८ ॥

अस्तन इत्यादि । अस्तनेऽह्नि पूर्वदिनाहारे जीर्ण एव जीर्णमात्र एव न त्व(ना)भिलषे सति । न बहुत्वमपेक्ष्य । एवकार कालातिक्रमपरिहारार्थं शुद्धये शोधनार्थं शोधनाय स्नेहनायेत्यर्थं । न च स्नेहेनैव शुद्धिरभिप्रेता । बहुरुत्तमया मात्रया स्नेहोऽच्छ केवल मेयत्वेन गम्यते । सञ्जातबुभुक्षेण तु पीतो जाठरानलस्य दीप्तत्वात् शोधनकार्यमकुर्वाणस्तद्योग्यतामनुत्पादयन्नाशयेव जरामुपैति । वमनमपि बुभुक्षितस्य न सम्पद्यते कफापत्तिते पूर्वोक्तादोषात् । ह्रस्वाकारस्त्वाह — बहुरिति ह्रस्वा मात्रा, नोत्तमा अहोरात्रजरणरक्षणा । अथ कथं बहुरिति ह्रस्वमात्रा गम्यते इति चेत् उच्यते । समानत्वादवगम्यते—

स्वस्थस्य स्नेहने मात्रा या ह्रस्वा सा विधीयते
अहरर्धेन जीर्णायां तस्यां लघु च भोजनम् ॥

इति ॥ १८ ॥

शमनः क्षुद्वतोऽनघो मध्यमात्रश्च शस्यते ।

शमन इत्यादि । शमनो यो रोगस्य शमनायोपयुज्यते, स्नेह स क्षुद्वत सञ्जातबुभुक्षस्य पुरुषस्य शस्यते । क्षुद्वत इत्यनेन जाताया बुभुक्षाया न जीर्णमात्र एव अन्ने । शोधन इव शमनो हि स्नेहो यत्र तत्रस्थ दोष कुपित शमनरूपत्वाच्छमयति । यदि पुनर्जीर्णमात्र एवाहारे स्नेहोऽयमनुभुक्षितस्यैवोपयुज्यते, तदानीं सोतसां कफाद्युपलेपानिवर्तनात् तत्सम्पृक्तोऽसौ स्नेहो न सर्व शरीरमनुयात् । अप्राप्नुवश्च न तं दोष शमयेत् । तस्मात् क्षुद्वत एवाय शस्यते । तत स्नेहे जीर्णेऽन्न शस्यते । तत्राप्यनन्न एवान्नवर्जित केवल एव मद्यादिविचारणारहित । अच्छ एव पेय इत्यर्थ. । अनेन सहापि कुपि तदोषशमनाय प्रयुज्यते इति प्राहो निषेध । सोऽपि मध्यमात्रश्च शस्यते । मध्यमया मात्रया । चशब्दादुत्तमया मात्रया च शस्यते । *उत्तमा मात्रापि शमनार्थं प्रयुज्यते । यथाक्पीडके दर्शिता । बहुमात्रस्य न प्रचुरमयोग इति चशब्दे नोक्ति । अत्र चोत्तमया मात्रया स्नेहपाने दिनान्तरे पथ्य कार्यम् । पुन स्ने हप्रयोग । पुनरन्यस्मिन्नहनि पथ्य कार्यम् । मध्यमया मात्रया स्नेहपाने तु लघुगो-(जं'जि)नो नाऽर्धयाममात्रे अन्नकाश्या भवति । तदा रात्र्यारम्भे त्रियामार्धे वा गते लघ्वन्नप्राय द्रवप्राय भोजन भोज्य मात्रयैव । अन्यकारो हि शमने स्वल्पभोजनमेवानुजज्ञे । वक्ष्यति हि —

उपचारस्तु शमने कार्य स्नेहे विरिक्तवत् ।

इति । सुश्रुते चोक्तम्—

परिषिच्याद्धिरण्याभिर्जीर्णस्नेह ततो नरम् ।
यवागूं पाययेदुष्णां सुकृतामल्पतण्डुलाम् ॥
ज्ञेयो यूषो रसो वा स्यादकृत सौरभान्वित ॥
कृतो वाप्यल्पसर्पिष्को विलेपी वा विधीयते ।

इति ॥

बृंहणो रसमद्याद्यैः समक्तोऽल्पः

बृंहण इत्यादि । यस्तु स्नेहो बृंहण शमनविशेष स रसमद्याद्यै सह उक्त । समोजनो भोज्य इति । 'रस इत्यविशेषोक्तौ ज्ञेयो मांसरसो बुधै. ।' आदिशब्देन क्षीरगुडादेर्द्रवरूपस्य ग्रहणम् । तथा च सह मद्येन गोदन्न दिन।

इति वर्तते । समक्तश्च शस्यते । यस्तु बृंहणः स रसमध्याद्यैः समक्त समाज्ञनो योज्य इति हाटकः । एष च स्नेहोऽल्पो ह्रसीयसीतोऽपि मात्रातोऽल्प । अल्पमात्रया योज्यः ॥

हितः स च ॥ १९ ॥

बालवृद्धपिपासार्तस्नेहद्विण्मद्यशीलिषु ।
स्त्रीस्नेहनित्यमन्दाग्निसुखितक्लेशभीरुषु ॥ २० ॥
मृदुकोष्ठाल्पदोषेषु काले चोष्णे कृशेषु च ।

हितश्च स इत्यादि । स च बृंहणः स्नेहो बालवृद्धादिभ्यो हितः । हितयोगे चतुर्थ्यां प्रायिकत्वात् षष्ठी । बालादीनामितरेतरद्वन्द्वः । पिपासार्तः प्रसक्तवृडार्त प्रसक्तवृट्पीडित । स्नेहद्विषः स्नेहद्वेषिणो ये स्वभावेन स्नेहं द्विषन्ति । स्त्रीस्नेहयोश्च नित्यशब्देन सम्बन्धः, स्त्रीनित्येषु स्नेहनित्येषु चेत्यर्थः । उष्णे ग्रीष्मादौ काले च । कृशेषु नरेषु हित ॥

स च बृंहण स्नेह उपयुक्त यदि कुर्यादित्याह प्राङ्मध्योत्तरभक्तोऽसावधोमध्योर्ध्वदेहजान् ॥ २१ ॥ बृंहणस्य भविष्यं भूत इति पाठ्यकार ।

व्याधीन् जयेद् बलं कुर्याद्यथाक्रमम् ॥

प्राङ्गित्यादि । प्राक् च मध्यं च उत्तरं च प्राङ्मध्योत्तरं भक्तं यस्मिन् स्नेहे स एवम् । हाटकोऽपि प्राक् च मध्यं च उत्तरं च भक्त यस्मिन् स्नेहे स एवमित्याह । तेनायमर्थः—भक्तस्यान्ते उपयुक्तोऽधोदेहजान् व्याधीन् जयेत्, मध्ये उपयुक्तो मध्यदेहजान्, भक्तस्य प्रागुपयुक्त ऊर्ध्वदेहजानित्यरुणदत्त । हाटकस्त्वाह— भक्तस्यादावधोदेहजान् व्याधीन् जयेत् । एवं मध्ये मध्यजान् अन्ते चोर्ध्वजान् यथाक्रम जयेत् । यथाक्रमं चाङ्गानां शरीरावयवानामधो मध्योर्ध्वसञ्ज्ञकाना बल कुर्यादिति । इत्याकारोऽप्याह— प्राग्भक्त भक्तस्य प्राक्, मध्यभक्तो भक्तस्य मध्ये, उत्तरभक्तो भक्तस्योत्तरस्य । असौ बृंहणो भोजनात् प्राक् पीतोऽध.कायगतान् रोगान् नाशयति । तत्र बलं च जनयति । मध्ये पीतो मध्यकायस्य, उपरि पीत ऊर्ध्वकायस्य । उक्तंचाश्च —

स्नेहः पीतः भोजनात् कुर्यादूरुजङ्घाकटीबलम् ।
रोगानुल्लोम्यमारोग्यमग्नेः कायगतक्षयम् ॥

मध्ये महत्त्वाभिबलम्थिरताकुक्षिलक्ष्मान् ।
इन्द्रियस्थिरतामूर्ध्वमूर्ध्वजत्रुगदक्षयम् ॥

इति । पालकाप्ये चोक्तं—

स्नेहः प्राग् भोजनात् प्रीतः (कश्चित्?) कायबलावहः
पश्चात् पीतस्तु पूर्वार्धरोगहा बलवर्धनः ॥
समस्तो बृंहणः पथ्यो बलाग्न्यूर्जस्करस्तु सः ।

इति । इदं चोक्तं—

मारुतेऽभ्यधिके सर्पिः सदा सलवणं हितम् ।
केवलं त्वधिके पित्ते कफे सञ्ज्यूषणं तथा ॥

इति । अन्यत्रापि—

मारुते लवणं सर्पिः पित्ते केवलमिष्यते ।
पेयो दद्याद् बहुकफे क्षारत्रिकटुकान्वितम् ॥

इति ॥

चार्युष्णमच्छेऽनु पिबेत् स्नेहे तत्सुखपक्तये ॥ २२ ॥
आस्योपलेपशुद्ध्यै च तौरवारुष्करे न तु ।
जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत् ॥ २३ ॥
तेनोद्गारविशुद्धिः स्यात्ततश्च लघुता रुचिः ।

चार्युष्णमित्यादिना मच्छे अच्छपेये स्नेहे उत्तममध्यमहस्वानुपयोजिते अनु पश्चाद् उष्णोदकं पिबेत् । किमर्थं तत्सुखपक्तये तस्य स्नेहस्य सुखेन पाकाय । तथा चास्योपलेपशुद्ध्यै च स्नेहविस्निग्धास्यस्य विशुद्धये । तुरक्तैले भल्लातकतैले मच्छपेये सत्युष्णोदकं न पिबेत् । तयोरत्युष्णवीर्यत्वादिति भावः । तुरस्य विकारः स्नेहः तौरवः 'तस्य विकारः' इत्यण् । एवमारुष्करः । तौवरेति केचित् पठन्ति । चिरपीते च स्नेहे जीर्णाजीर्णे मतिसंशये सति भूयोऽप्युष्णजलं पिबेत् । अनुपानापेक्षं पुनर्बृंहणं वीप्सार्थम् । तेनोष्णोदकपानेन उद्गारस्य विशुद्धिर्भवेत् । ततश्च जीर्णाजीर्णविशङ्कातोऽधिकलाघवं रुचिश्च स्नेहस्य पातुः स्यात् । संग्रहे स्वन्यदप्युक्तम्—

ततो गुरुप्रावरणो निजाते शयने स्थितः ।
जरणान्तं प्रतीक्षेत तृ(तृ?प्य)न्नुष्णाल्पवारिपः ।
शिरोभ्रमनिष्ठीवमूर्ध्वाधोहारुचिक्लमैः ॥

---

१. गुरुप्रावरणो निरीति मुद्रितक्षमहगाः ।

जानीयाद् भेषजं जीर्यज्जीर्णं तच्छान्तिलाघवात् ।
अनुलोमानिलस्वास्थ्यक्षुत्तृष्णोद्गारशुद्धिभिः ॥ इति ॥

भोज्योऽन्नं मात्रया पास्यन् श्वः पिबन् पीतवानपि ॥ २४ ॥
द्रवोष्णमनभिष्यन्दि नातिस्निग्धमसङ्करम् ।
उष्णोदकोपचारी स्याद् ब्रह्मचारी क्षपाशयः ॥ २५ ॥
न वेगरोधी व्यायामक्रोधशोकहिमातपान् ।
प्रवाहयानयानाध्वभाष्यात्यासनसंस्थितीः ॥ २६ ॥
नीचात्युच्चोपधानाहःस्वप्नधूमरजांसि च ।
यान्यहानि पिबेत्तानि तावत्यन्यान्यपि त्यजेत् ॥ २७ ॥
सर्वकर्मस्वयं प्रायो व्याधिक्षीणेषु च क्रमः ।

भोज्योऽन्नमित्यादि । श्वः स्नेहं पास्यन्, तथा तस्मिन्नेव दिवसे स्नेहं पिबन्, तथा श्वः स्नेहं पीतवानपि । अपि समुच्चये । सन्नोज्यं मात्रया भोजयितव्यः । किंभूतमन्नं — द्रवोष्णम् । अत्र चोभयत्रा समासः । द्रवेण मुद्गयूषादिना महोष्णमन्नं द्रवोष्णम् । तत्र केवलं द्रवं च तदुष्णं च द्रवोष्णं विलेप्यादिकं केवलमेवेति । तथा अनभिष्यन्दि अकफकृत् । तथा नातिस्निग्धं अर्थादीषत् स्निग्धम् । तथा असङ्करं सङ्करवर्जितम् । पथ्यापथ्यान्नमिश्रीभावः सङ्करः । अपथ्येनामिश्रितमित्यर्थः । ननु मात्राशी सर्वकालं स्यादित्यनेन अल्पया मात्रया भोजनस्य सिद्धत्वे किमर्थमिह पुनर्मात्राग्रहणम् । ब्रूमः । (तत्र) मात्राशब्दः प्रमाणार्थः, इह त्वल्पार्थः । तेनायमर्थः । यावदल्पस्य सम्यग् यथाकालं परिणमति तावतोऽप्य(ल्पो ? ल्पौ)दनेन स्वल्पं भोज्यः । स्नेहपानेऽजीर्णोत्पत्तौ महानत्ययः स्यादिति दर्शयितुं मात्राग्रहणम् । उक्तं च —

"पीतस्नेहस्य यो जीर्णे छर्दिरुच्चमिमन्दताः ।
देहक्षयश्च शौकर्श्यं भमेकः सकफस्रुतिः ॥" इति ।

तथासौ स्नेहपाता उष्णोदकोपचारी स्याद् उष्णोदकमुपचरितुं सेवितुं शीलमस्य स एवम् । तथा ब्रह्मचारी ललनासङ्गरहितः । क्षपाशय इति

१ 'स्यन्दि' मुद्रितहृदयपाठः । २ 'यावदल्पस्य' इति मुद्रितसुन्दरीगदः

'अधिकरणे शेतेः' इत्यच् । क्षपाशय इत्यनेन दिवास्वप्नस्य रात्रिजागरणस्य च निषेधः । यान्यहानि स्नेहं पिबति तान्यहानि व्यायामादींस्त्यजेत् । तथा तावन्त्यन्यान्यप्यहानि स्नेहपानरहितानि व्यायामादींस्त्यजेत् । अहानीत्यत्यन्तसंयोगे द्वितीया । सर्वकर्मसु स्वेदवमनविरेचनादिषु अयमुष्णोदकोपचारी स्यादित्यादिकः क्रमो विधिरित्यर्थः । यापनादिष्वहस्सु जीर्णवर्जे(१)नायं विधिरिति प्रदर्शनार्थं प्रायोग्रहणम् । व्याधिक्षीणेषु च प्रायोऽयमेव (वि)धिः । अन्नाप्यतीसारादिष्वहःस्वप्नादीनामनुज्ञानात् प्रायोग्रहणम् ॥

उपचारस्तु शमने कार्यः स्नेहे विरिक्तवत् ॥ २८ ॥

उपचार इत्यादि । तुल्यतिरेके । शमने स्नेह उपयुक्ते उपचारो भोजनादिर्विरिक्तवत् कार्यः । यथा विरिक्ते पेयादिकः क्रमस्तथास्मिन्नपीत्यर्थः ॥ २८ ॥

त्र्यहमच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत् ।
सम्यक् स्निग्धोऽथवा यावदतः सात्म्यीभवेत्परम् ॥ २९ ॥

त्र्यहमित्यादि । मृदौ कोष्ठे सति पुरुषस्निदिनमच्छं स्नेहं पिबेत् । क्रूरे कोष्ठे सप्ताहं पिबेत् । मध्यकोष्ठस्तु अत एव लक्षणादधिगम्यते । यथा — 'चत्वार्यहानि पञ्च वा स्नेहं पिबेद्' इति । यदि च त्र्यहेण सम्यक् स्निग्धलक्षणं न स्यात्, तदा चतुष्पञ्चरात्रमपि स्नेहं पिबेत् । मध्यकोष्ठस्तु षड्रात्रमपि पिबेद् इत्याह — सम्यक् स्निग्धोऽथवा यावद् इति । अथवा नैष नियमः । वातानुलोम्यमित्यादिः सम्यक् स्निग्धलक्षणोत्पत्तिरेव नियमः । अतः सप्ताहादप्यूर्ध्वमच्छः स्नेहः पेयो यावत् स्निग्धलक्षणं स्यात् । अतः परं स्नेहः सात्म्यीभवेत् । सात्म्यीभूते च स्नेहे यो दोषः स सङ्क्षये क्षपितः । यथा —

'सात्म्यीभूतो हि कुरुते न मलानामुदीरणम् ।
अतियोगेन वा व्याधीन् यथा पानातियोजनात् ॥

इति ॥ २९ ॥

वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम् ।
स्नेहोद्वेगः क्षमः सम्यक् स्निग्धे रूक्षे विपर्ययः ॥ ३० ॥

---

१. 'यथाम्भो अतियोजनम्' इति मुद्रितपुस्तकपाठः ।

अतिस्निग्धे तु पाण्डुत्वं घ्राणवक्त्रगुदस्रवाः ।

स्निग्धलक्षणमाह — वातानुलोम्यमित्यादि । सम्यक् स्निग्धे पुरुषे वातानुलोम्यादि क्रमान्तं लक्षणं भवति । वर्चः शकृत्, स्निग्धं तथासंहतं शिथिलम् । रूक्षेऽस्निग्धे विपर्ययो वैपरीत्यं यथोक्तेभ्यो लक्षणेभ्यः । अतिस्निग्धे तु स्नेहस्यातियोजनात् पुनः पाण्डुत्वादयो भवन्ति । सर्वशब्दस्य घ्राणादिभिः समासः ॥

अमात्रयाहितोऽकाले मिथ्याहारविहारतः ॥ ३१ ॥

स्नेहः करोति शोफार्शस्तन्द्रास्तम्भविसंज्ञताः ।

कण्ठक्लोम्योरुत्क्लेशशूलानाहभ्रमादिकान् ॥ ३२ ॥

अमात्रयेत्यादि । अमात्रया पीतः अतिमात्रः स्नेहः सर्पिरादिः शोफादीन् करोति । तथा अहितो यो यस्य प्रतिषिद्धः स्नेहः । तथा अकाले भीष्मादौ पूर्वं प्रतिषिद्धे । तथा मिथ्याहारविहारतो हेतोः द्रवोष्णमित्यादिविपर्ययेण उष्णोदकोपचारी स्यादित्यादिविपर्ययेण च शोफादीन् करोति । उत्क्लेशो दोषादीनाम् । आदिशब्देन वलक्षयजाड्यवाग्ग्रहादयः सङ्ग्रहोक्ता गृह्यन्ते ॥ ३२ ॥

क्षुत्तृष्णोल्लेखनस्वेदरूक्षपानान्नभेषजम् ।

तक्रारिष्टखलोदालयवश्यामाककोद्रवाः ॥ ३३ ॥

पिप्पलीत्रिफलाक्षौद्रपथ्यागोमूत्रगुग्गुलु ।

यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम् ॥ ३४ ॥

चिकित्सामाह — क्षुदित्यादि । स्नेहविधिभ्रंशे सति क्षुत्तृष्णादिसाधनं चिकित्सा । क्षुत्तृष्णाशब्देन क्षुत्तृष्णानिग्रहौ गृह्येते । उल्लेखनं वमनम् । रूक्षशब्दस्य पानादित्रयेण सम्बन्धः । तक्राणि चारिष्टं चेत्येवं समासः । खलो व्यञ्जनविशेषः प्रागुक्तः । उदालः शालिविशेषः । यथास्वं प्रतिरोगं चेति । यथास्वं दोषानुगुण्येन । प्रतिरोगं यद् यस्मिन् रोगे स्वे स्वेऽध्याये उक्तं तदपि साधनम् ॥ ३४ ॥

स्नेह-व्यापत्साधनस्य विरूक्षणस्वभावत्वात् प्रसङ्गेन विरूक्षणस्य सम्यक्कृतातिकृतलक्षणमुच्यते —

विरूक्षणे लङ्घनवत्कृतातिकृतलक्षणम् ।

विरूक्षण इत्यादि । विरूक्षणे सम्यगुत्पन्ने तथात्यर्थोत्पन्ने च लङ्घनवत् कृतातिकृतलक्षणं ज्ञेयम् । कृत चातिकृतं च कृतातिकृते तयोर्लक्षणम् । कृतशब्देन सम्यक्कृतमुच्यते । तत्र लङ्घनस्य सम्यक्कृतस्य यल्लक्षणमुक्तं विमलेन्द्रियतादि तदेव विरूक्षणस्यापि सम्यक्कृतस्य लक्षणं बोध्यम् । तथातिलङ्घनस्य यल्लक्षणमतिकार्श्यादि तदेव विरूक्षणस्यातिकृतस्य लक्षणं विज्ञेयम् । विरूक्षणा(ति)योगलक्षणं तु स्नेहातियोगलक्षणैरेवोक्तम् ॥

स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरन् ॥ ३५ ॥
स्निग्धस्त्र्यहं स्थितः कुर्याद्विरेकं वमनं पुनः ।
एकाहं दिनमन्यच्च कफमुत्क्लेश्य तत्करैः ॥ ३६ ॥

स्निग्धेत्यादि । उक्तेन प्रकारेण स्निग्धो यदा वमनेन विना विरेकमेव कारणवशेन करोति तदा पुरुषः पूर्वं स्निग्धोऽप्यनन्तरं स्निग्धादिगुणयुक्तरसभुक् स्वेदमाचरन् दिनत्रयं स्थितः सन् विरेकं कुर्यात् । धन्वोत्थो रसो जाङ्गलदेशमांससमुद्भूतो रसः । मांसरसस्य स्वभावत एव स्निग्धद्रवत्वात् स्निग्धद्रवग्रहणमग्निक्रियोगायेति वेद्यम् । उष्णमुभयथा वीर्यतोऽग्निसंयोगाच्च । एवम्भूतं रसं भुङ्क्ते यः स एवम् । वमनं पुनरिति । यदा तु स्नेहादनन्तरं वमनमेवोपयुङ्क्ते तदा एकाहमनेनैव प्रकारेण स्निग्धद्रवोष्णधन्वोत्थरसभुक् स्वेदमाचरन् स्थितः । अन्यच्च दिन द्वितीयमहः तत्करैः उक्लेशनकरैः सङ्करोकैखिलमापगुल्मघ्याद्यभिः कफमुत्क्लेश्य स्थानात् प्रच्याव्य स्थितो वमनं कुर्यात् । एवं द्व्यहं स्थितो वमनं कुर्यात् । तत्करैः कफकरैरिति वा । "क्लेदो हेतु—" इत्यादिना हेतोष्टः ॥ ३६ ॥

मांसला मेदुरा भूरिश्लेष्माणो निपमाशयैः ।
स्नेहोचिताश्च ये स्नेह्यास्तान्पूर्वं रूक्षयेत्ततः ॥ ३७ ॥
संस्नेह्य शोधयेदेवं स्नेहव्यापन्न जायते ।

मांसला इत्यादि । मांसलत्वादियुक्ताः पुरुषा ये शोध्यत्वेन स्नेहयितुमिष्टा, तान् स्नेह्यान् । पूर्वं प्रथमम् । रूक्षयेत् । ततो रूक्षयित्वानन्तरं संस्नेह्य शोधयेत् । किमेवं सति भवतीत्याह — एवं सति मांसरादीना स्नेहस्य सदृशत्वात् या स्नेहव्यापदाशङ्क्यते सा न जायते । मांसला उपचितमांसाः । मेदुरा मेदस्विनः ॥

अलं मलानीरयितुं स्नेहश्चासात्म्यतां गतः ॥ ३८ ॥

न केवलं स्नेहव्यापदेवं न जायते यावद्रूक्षस्य स्नेहः प्रयुक्तः असात्म्यत्वाद् मलान् वातादीन् ईरयितुं शोधयितुम् । अलं पर्याप्तं भवतीति फलद्वयम् । असात्म्यतां गत इति हेतुगर्भम् ॥ ३८ ॥

बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु ।
योगानिमाननुद्वेगान् सद्यःस्नेहान् प्रयोजयेत् ॥ ३९ ॥

बाल इत्यादि । बालवृद्धादिषु पूर्वं बृहणस्नेहविषयत्वपरिपठितेषु । यथायथ स्नेहविषये य परिहारः शीतोदकादिः तमसहिष्णुष्वक्षमेषु सद्यः स्नेहाभिधानान् अनुद्वेगकरान् । इमान् योगान् वक्ष्यमाणान् । प्रयोजयेत् । बालादिषु पूर्वं बृंहणस्नेहविषयत्वपठितेषु, तथा ये स्नेहे प्रयुज्यमाने वर्ज्यपरिहार कर्तुं न शक्नुवन्ति तेषु चेतीन्दुः ॥ ३९ ॥

के ते योगा इत्याह —

प्राज्यमांसरसास्तेषु पेया वा स्नेहभर्जिता ।
तिलचूर्णश्च सस्नेहफाणितः कृशरास्तथा ॥ ४० ॥
क्षीरपेया घृताढ्योष्णा दध्नो वा सगुडः सरः ।
पेया च पञ्चप्रसृता स्नेहैरतण्डुलपञ्चमैः ॥ ४१ ॥
सर्पिस्ते स्नेहनाः सद्यः स्नेहाश्च लवणोल्बणाः ।

प्राज्येत्यादि । तेषु बालादिषु । प्राज्यमांसरसाः प्रभूताज्यमासरसाः अनूपजाश्च यथायोग्यम् । प्राज्यमासरसा पुष्टमांसरसा इति हृदयकारः । तथा स्नेहभर्जिता पेया च । हाटकस्त्वाह — प्राज्यमांसरसाः प्रभूताज्यमांसरसाः तेषु मांसरसेषु अधिकरणभूतेषु सिद्धा पेया वा । किम्भूता स्नेहे सह भर्जिता पक्वा' इति । इन्दुनाप्येवमुक्तम् । तथा तिलचूर्णश्च सस्नेहफाणितः सर्पिरादिना युक्तः क्षुद्रगुडेन च युक्त । तथा कृसरतिलौदनः । तथेति स्नेहफाणितयुक्त इत्यर्थ । कृसरस्तिलमिश्रा विलेपीति हाटकः । दध्न. सरः (തൈരിലത്തെ) पेया च पञ्चप्रसृता पञ्चप्रसृताख्या पेया । स्नेहैश्चतुर्भि प्रसृतसम्मितैः पञ्चमेन तण्डुलेन च कृता चतुर्णां स्नेहानां चत्वारि प्रसृतानि तण्डुलस्य प्रभूतमिति पञ्चप्रसृताख्या पेया । तथा चागमः —

'सर्पिस्तैलवसामज्जतण्डुलप्रसृतैः शृता ।
पाश्वप्रसृतिकी पेया पेया स्नेहनमिच्छता ॥'

इति । द्वे पले प्रसृतः । एते सप्त पूर्वोक्ताः संद्यः शीघ्रं स्नेहनाः । न केवलमेत एव स्नेहना इत्याह — स्नेहाश्च लवणोल्वणाः अपक्का ये लवणाख्याः स्नेहाः सर्पिरादयस्तेऽपि सद्यः स्नेहनाः ॥

कस्मादित्याह —

तद्ध्यभिष्यन्द्यरूक्षं च सूक्ष्मस्रोतो व्यवायि च ॥ ४२ ॥

हि यस्मात् । तत् लवणम् । अभिष्यन्दि माक्षिक्येन स्रोतसां स्रावकम् अरूक्षत्वादिगुणयुक्तम् । सूक्ष्मं सूक्ष्मस्रोतोगामि । व्यवायि देहमाखलिव्याप्य पाकाय कल्पते ॥ ४२ ॥

गुडानूपामिषक्षीरतिलमाषसुरादधि ।
कुष्ठशोफप्रमेहेषु स्नेहार्थं न प्रकल्पयेत् ॥ ४३ ॥

कुष्ठादिषु स्नेहयोग्यत्वे सत्यपि गुडादि स्नेहनार्थं न प्रकल्पयेत् न योजयेत् । कुष्ठादीनां मत्वर्थीयोऽकारः, तेन कुष्ठिनामित्यादयोऽवतिष्ठते ॥ ४३ ॥

तर्हि कथं स्नेहा इत्याह —

त्रिफलापिप्पलीपथ्यागुग्गुल्वादिविपाचितान् ।
स्नेहान् यथास्वमेतेषां योजयेदविकारिणः ॥ ४४ ॥

त्रिफलेत्यादि । एतेषां कुष्ठादीनां यथास्वमध्यायेषु पथ्यत्वेनाभिहितैस्त्रिफलादिभिर्विपाचितान् साधितानविकारिणः स्नेहान् योजयेत् ॥ ४४ ॥

क्षीणानां त्वामयैरग्निदेहसन्धुक्षणक्षमान् ॥ ४५ ॥

क्षीणानामित्यादि । आमयैर्व्याधिभिः क्षीणानां पुनः पुंसाम् अग्निदेहसन्धुक्षणक्षमान् स्नेहान् योजयेत् । अग्निश्च देहश्चाग्निदेहौ तयोः सन्धुक्षणाश्च क्षमाश्च तान् । यथासङ्ख्येनात्र सम्बन्धः । अग्ने सन्धुक्षणा दीपनाः देहस्य क्षमाः पुष्टयावहाश्च तान् । अत्रायं भावः — व्याधिभिः क्षीणानां बहिरपि क्षीणो भवति । अतस्तेषां न केवलं ये पुष्टयावहा बृंहणान्नमावहन्ति, अथवा ये बृंहणान्नं न पुष्टयावहाः ते स्नेहा इत्येतेन न युक्ताः । किं तर्हि बृंहणकारिण एव योज्या इति ॥ ४५ ॥

उपसंहरति —

दीप्तान्तराग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्बलवर्णयुक्तः ।
दृढेन्द्रियो मन्दजरः शतायुः स्नेहोपसेवी पुरुषः प्रदिष्टः ॥ ४६॥

दीप्तेत्यादि । स्नेहोपसेवी यः पुमानभ्यासेन स्नेहमुपसेवते स दीप्तान्तराग्नित्यादियुक्तो भवतीति प्रदिष्टः । मन्दैरागमविद्भिरिति शेषः । प्रत्यग्रधातुः अनवधातुः बालादिभिरनुपहतधातुः । मन्दजरः मन्दवली-पलितः । हृद्याकारस्तु स्नेहोपसेवी अनुरूपस्नेहसेवी बहिर्देहदेशाधिरोधेन स्नेहसेवीत्याह ॥ ४६ ॥

इति श्रीदाशपण्डितविरचितायां हृदयबोधिकायां
षोडशोऽध्यायः ॥

अथ सप्तदशोऽध्यायः ।

शोधनप्रसङ्गेन स्नेह उपयुज्यते । तेन विनाऽपि देहे शोधनीयानां दोषाणां सार्वत्राय स्वेदस्य प्रसङ्गः । अतस्तत्परिज्ञानार्थमध्यायोऽयमारभ्यते ।

अथातः स्वेदविधिमध्यायं व्याख्यास्यामः ।

स्वेदस्तापोपनाहोष्मद्रवभेदाच्चतुर्विधः ।

स्वेद इत्यादि । स्वेदनं स्वेदः तस्य विधिर्विधानम् । तत्र द्विविधः स्वेदः । अग्निकृतोऽनग्निकृतश्च । तत्राग्निकृतः स्वेदस्तापादिभेदेन चतुर्विधो भवति । अनग्निकृतोऽनेकविधः 'स्वेदो हितस्त्वनामेय' इत्यादिना वक्ष्यमाणः । चतुर्विध इति सङ्ख्याग्रहणं शास्त्रान्तरोक्तानां स्वेदानां सङ्करप्रस्तरादीनामन्तर्भा-वाय ।

सङ्करः प्रस्तरो नाली परिषेकोऽवगाहनम् ।
जेन्ताकोऽग्निघनः कर्पूः कुटी भूः कुम्भिरेव च ।
कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश ॥

इति चरके । वस्त्रबन्धैरबन्धैर्वा पिण्डैः सङ्करः । स्विन्नानां द्रव्याणामुपरि प्रावृत्य शयनं प्रस्तरः । पिशितादिपङ्कैः काञ्जिकादिभिः पूर्णे पिहितमुखे कुम्भादौ नालीं न्यस्य स्वेदो नाल्याख्यः । तेनैव द्रवेण सेकः परिषेकः । तेन द्रवेण पूर्णे कुम्भ-कटाहादौ स्थितिरवगाहः । कुटीगृहमध्यस्थिते कन्दुके वातहरकाष्ठतप्ते विगत-धूमे तत्सम्बन्धिनीं पिण्डिकामालिङ्ग्य स्वेदो जेन्ताकः ॥

*शयानस्य प्रमाणेन घनामश्ममयीं शिलाम् ।
तापयित्वा भृशतप्तैर्दारुभिः सम्प्रदीपितैः ॥
व्यपोह्य सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा ।
शिलामथ प्रकुर्वीत कौशेयाविकसंस्तराम् ॥
तस्या स्वभ्यक्तसर्वाङ्गः स्वपन् स्विद्यति ना सुखम् ।
और्णकाजिनकौशेयप्रावाराद्यैः स संवृतः ॥
इत्युक्तोऽश्मघनः स्वेदः, कर्षूस्वेदः प्रवक्ष्यते ।
खानयेच्छयनस्याधः कर्षूं स्थानविभागवित् ॥
दीप्तैर्विधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः ।
तस्या उपरि शय्याया स्वपन् स्विद्यति ना सुखम् ॥

कुटीगृहेऽङ्गारपात्रसहिते शयनात् (स्वेद) कुटीस्वेद । (†प्रशस्तायां निवातायां समायां भुवि भूस्वेदोऽश्मघनस्वेदविधिसदृशः) । वातहरोष्णद्रवपूर्णायां भूखानितायां कुम्भ्यां तप्तायोगुडं पाषाणं वा निक्षिप्य तदूष्मणा स्वेदः कुम्भिसंज्ञक । करीषादिभिर्दग्धस्य कूपस्योपरि शयनात् स्वेदः कूपसंज्ञक । अग्निपात्रस्याधस्त्वाच्छयनात् स्वेदो होलाक इत्येतेषामन्तर्भावाय सङ्ख्याग्रहणम् । तापात्मकत्वेऽपि सर्वस्वेदानां कस्यचिदेव तापसंज्ञोपपद्यते । सङ्ख्याग्रहण परमतनिरासार्थमिति पाठ्यकारः ॥

तापादानेव लक्षयति—

तापोऽग्नितप्तवसनफालहस्ततलादिभिः ॥ १ ॥

ताप इत्यादि । तापस्वेदोऽग्नितप्तेन वसनेन, तथा फालेनाग्नितप्तेन । फालमयोमयं कर्षणसाधनं (हल) इति भाषा । तथा हस्ततलेनाप्यग्नितप्तेन । आदिग्रहणाद् दारुपाषाणसिकताकसतादीनि गृह्यन्ते ॥ १ ॥

उपनाहो वचाकिण्वशताह्वदेवदारुभिः ।
धान्यैः समस्तैर्गन्धैश्च रास्नैरण्डजटामिषैः ॥ २ ॥

* अत्र वरमघनकर्षूस्वेदयोर्विधिन दृश्यत इति चरकसंहिताया उद्धृत लिखित ।

† पुरुषायतमात्रा च भूमिमुत्कीर्य खादिरैः ।
काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः ।
पत्रभङ्गैरवच्छाद्य शयान स्वेदयेत्ततः ॥
इति सुश्रुतसम्मतो भूस्वेद ।

उद्रिक्तलवणैः स्नेहचुक्रतक्रपयःप्लुतैः ।
केवले पवने श्लेष्मसंसृष्टे सुरसादिभिः ॥ ३ ॥

पित्तेन पद्मकाद्यैस्तु

उपनाह इत्यादि । उपनह्यते चर्मपट्टादिनेति उपनाहः । उष्णपिण्डबन्धन उपनाहः । केवले पवने वचादिभिरुपनाहस्वेदः कार्यः । किंपुनः सुराप्रकृतिद्रव्यं (कृष्ण ८०६) धान्यैरिति सामान्योक्तावपि तिलातसीभार्षादीन्युष्णवीर्याणि स्निग्धानि वातशमनानि प्रयोज्यानि, उष्णवीर्याणां स्वेदयोग्यत्वादिति समस्तग्रहणं गन्धैरेव युज्यते । अत एव संग्रहेऽवत् — सर्वगन्धानिति । समस्तग्रहणं गन्धैरेव युज्यते, संग्रहे सर्वगन्धानिति वचनादिति हाटकः । गन्धैः गन्धद्रव्यैः कुष्ठागरुतगरमुरमुरदार्वादिभिः, तथा रास्नादिभिः । हृद्याकारस्तु धान्यैर्मुद्गादिभिः समस्तैर्गन्धैश्च कुष्ठादिभिः । समस्तशब्दः काक्षक्षिवदुक्त इत्याह । किंभूतैः पूर्वोक्तैः । उद्रिक्तलवणैः लवणाढ्यैः । तथा स्नेहश्च चुक्रं च तक्रं च पयश्च तैः प्लुतैरालोलितैः । चुक्रम् अम्लम् । तक्रस्य चुक्रत्वादेव ग्रहणे सिद्धे तक्रग्रहणमतिशयार्थम् । अतिशयेन माल्वलाम्ले स्वेदे तक्रं प्रयोज्यमिति ।

श्लेष्मसंसृष्टे पवने सुरमादिभिः—सुरसयुगादिना गणेन उपनाहः कार्यः । उद्रिक्तलवणैरित्यनुवर्तते । पित्तेन संसृष्टे पवने पद्मकाद्यैः पद्मकादिगणेनोपनाहः । पित्तेनेत्यत्र तृतीया अप्रधान्ये "सहयुक्तेऽप्रधाने" इति । तेन वाते बल्यति किञ्चिदेव पित्तेन संसृष्टे पद्मकादिभिरुपनाहः कार्य इत्येवं बोध्यम् । नाधिकेन पित्तेन युक्ते पवने, नापि तुल्येन पित्तेनेति । एवं चोक्तं — 'श्लैष्मः प्रायो मरुत्पित्ते' विधिः कार्य इति । श्लैष्मो विधिः प्रायेण सर्वः शीतः, तत्र स्वेदो दूरोत्सारित एव । तस्मात् किञ्चित् पित्तेन संसृष्टे पवने पद्मकादिभिरुपनाहः कार्य इति नेयम् । हाटकोऽप्याह — 'श्लैष्मः प्रायो मरुत्पित्ते' इति वचनात् किञ्चित् पित्तेन संसृष्टे पवने पद्मकादिभिरुद्रिक्तलवणैरुपनाहः कार्यः । तुल्येन पित्तेन युक्ते पवने "दाहकृत् तैजसो युक्तः" इति वचनात् पित्तानुरोधेन श्लैष्मः शीत एव विधिः कार्यः स्वेदो दूरोत्सारित इति । नन्वुपनाहो वातान्तरः कथं पित्ते विधीयत इति चेत्, उच्यते । पद्मकादिगणस्य मधुरतिक्तत्वात् शीतादिद्रव्यान्तरस्योपनाहने पित्तशमनम् । पैत्तिके त्वाग्नेये स्वेदेऽग्न्यर्थं द्रवस्वेदः कार्यः ।

पित्तसंसृष्टयोर्वातकफ्योः स्वेदनं द्वैः ।
तापोष्माणौ श्लेष्महरावुपनाहस्तु वातहा ॥

रक्तपित्तयोः केवलयोः स्वेदः कश्चिदपि न भेषजम् । उक्तं च—

"रक्तपित्तविकारेषु स्वेदनं नाभिपूजितम् ।
दोषान्तरयुतेपूक्तं किञ्चित्कालाद्यपेक्षया ॥

इति । पूर्वे त्रय उपनाहाः केवले वायौ तथा श्लेष्मयुक्ते पित्तयुक्ते च क्रमेण योज्याः ॥

हेमाद्रिस्तु साल्वलाभिधानाः स्वेदा इत्याह—

साल्वलाख्यैः पुनः पुनः ।

साल्वलाख्यैरिति । पुनः पुनरिति । असकृदेतैः स्वेदः कार्य इत्यर्थः । अन्यस्वेदवदनपायित्वात् पुनः पुनरित्युक्तम् । निरपायो हि यथायं साल्वला-परसञ्ज्ञ उपनाहाख्यः स्वेदो, न तथापरे स्वेदा इति । साल्वल इत्याख्या संज्ञा येषां तैः साल्वलाख्यैः । एतेषां धान्यगन्धदशमूलादीनां काञ्जिकादिभिः पिष्टानां कल्कैः स्नेहाम्ललवणोत्कारिकादिभिर्बन्धः साल्वलसञ्ज्ञ इत्यर्थः । उक्तं च धन्वन्तरिणा—

"काकोल्यादिः स वातघ्नः सर्वामूलद्रव्यसंयुतः ।
सानूपमांसः सुस्विन्नः सर्वस्नेहसमन्वितः ॥
सुखोष्णः स्पष्टलवणः साल्वलः परिकीर्तितः ।"

इति । हाटकस्त्वाह—एवं संस्कृतानि पद्मकादीन्येव साल्वलाभिधानानीति । पाल्यकारोऽप्याह—पद्मकादिगणेन यः कृत उपनाहस्तस्य साल्वलसंज्ञा इति । चन्द्रटे च मोक्तम्—

"काकोल्यादिः स वातघ्नः सर्वामूलद्रव्यसंयुतः ।
मधूतस्नेहलवणः साल्वलेत्यभिधीयते ॥"

इति ।

"उद्दिष्टलवणैः स्नेहचुक्रतक्रपयःप्लुतैः" इति त्रिष्वपि स्नेहेषु योज्यम् ।

---

१. 'साल्वणाख्यैः' गुदिनाष्टाङ्गहृदयपाठः । २. 'सानूपौदकमांसश्च सर्व',

—बन्धनात्मकधार्यं साल्वलाख्य॰ ग्धेत्यादि बन्धनोपायभूताधर्मपट्टादीनाह —

स्निग्धोष्णवीर्यैर्मृदुभिः चर्मपट्टैरपूतिभिः ॥ ४ ॥
अलाभे वातजित्पत्रकौशेयाविकशाटकैः ।
रात्रौ बद्धं दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवाकृतम् ॥ ५ ॥

स्निग्धेत्यादि । साल्वलाभिधानैर्बहुश॰ मलिप्य चर्मपट्टैर्बध्नीयात् । चर्मपट्टानामलाभे वातजित्पत्रादिभि । वातजित्पत्रम् एरण्डादीना पत्रम् । रात्रावेभिर्बद्धमुपनद्ध गात्रावलग्न दिवा मुञ्चेत् । दिवाकृतं दिवाबद्ध विदाहपरिहारार्थं रात्रौ मुञ्चेत् । अरुणदत्तोऽप्याह— 'चर्मपट्टैर्बद्ध दिवाकृत रात्रौ मुञ्चेत् । किम्भूतैः स्निग्धोष्णवीर्यैः तथापूतिभिरदुर्गन्धै , सपरिकर्मिकत्वात्' । चर्मपट्टानामभावे अभावे वातजित्पत्रैरेरण्डपत्रादिभि तथा कौशेयादिभिर्बद्ध रात्रौ, दिवा मुञ्चेत् । दिवा तु बद्ध रात्रौ मोक्तव्यम्' इति । वचन हि—'अग्लक्ष्णेनमधुरमगाढै॰ स्निग्धै मुग्वोष्णै साल्वलाभिधानै बहुश प्रदिग्धोष्णवीर्यापूतिमृदुरोमचर्मभिस्तदहरेव वातहरपत्रादिभि कौशेयैश्चपनद्धमङ्गमह स्थित विदाहपरिहारार्थ निशि मुञ्चेद् । दिवा वा निशि या बद्ध'मिति । हाटकस्तु—'चर्मादिभिः सुरसादिभिश्च पत्रभङ्गादिवदुपनाह कार्य इति केचिद्व्याचक्षते' इत्याह ॥ ५ ॥

ऊष्मा तूत्कारिकालोष्टकर्परोपलपांसुभिः ।
पत्रभङ्गेन धान्येन करीषसिकतातुषैः ॥ ६ ॥
अनेकोपायसन्तप्तैः प्रयोज्यो देशकालतः ।

ऊष्मेत्यादि। ऊष्मा चाप्य । ऊष्माख्य स्वेद उत्कारिकादिभिः प्रयोज्य । यवमाषैरण्डभीजातसीकुसुम्भबीजादिभि पिण्डिकैर्वा पिण्डिकाख्यतिर्य स्वेदनोपाय सा उत्कारिका । 'वातहरद्रव्यै पिष्टै मस्तैर्दुक्षारादिलोडितै पक्वे पनाकृतिरुत्कारिष्टा, तया उष्मणा स्वेद' इति हृदयकार॰ । उत्कारिका(उत्कारिका) लोष्टं मृत्पिण्ड (लोष्ट) कपालं मृत्कपाल कर्पर वा,(कपाल) उपल (उपल) पांसुः धूलि (पांसु) लोष्टादीनामूष्मस्वेदसाधनत्व तापस्वेदसाधनत्व च बोध्यम् । तथा पत्रभङ्गेन पत्राणां भङ्ग समूह पत्रभङ्ग निर्गुण्डिकिसलयसमूह (सीन्दुवार) तथा धान्येन । करीषो गवादिशकृच्चूर्ण (करीष) सिकता वालुका (सिकता) तुषो धान्यत्वक् (तुष) एभिरुक्तविधादिभिर्द्रव्यै स्वेदो विधातव्य' । किम्भूतै, अनेके ये ते उपायास्तैः सन्तप्ता

चूर्णीकृता ये उत्कारिकादयस्तैरनेकोपायसन्ततेरमिततः । कथं प्रयोज्य —देश-कालतः । लप्तलोप इयं पञ्चमी । तेन देशकालावपेक्ष्य उत्कारिकादिभिः प्रयोज्य इत्यर्थः । उपलक्षणं चेदम् । दोषदूष्यादीनप्यपेक्ष्य स्वेदोऽयं प्रयोज्य । तदेवाऽऽह — 'एभिर्देशकालतो देशकालापेक्षया कालस्योपलक्षणत्वाद् दोषादीनप्यपेक्ष्य अनेकोपायसन्ततेरमिततैर्देशकालदोषदूष्याद्यपेक्षया। धान्याम्लादि निमज्जनादुत्थितवाष्पे स्वेदो योज्य' इति लोष्टकपालपाषाणान् अग्निवर्णान् नन्दनेन गृहीत्वा स्वेदद्रोणाद्यपेक्षयाम्बुनि धान्याम्लशुक्तादौ वा निमज्जयेत्। तैरुद्गूर्णवाष्पैः स्वेदः । गोशकृतार्द्रेण पिण्डीकृतेनोष्णेन स्नेद । एवमनेकोपाय सन्ततत्वम् ॥

अधुना प्रथमस्वेदमाह—

शिग्रुवारणकैरण्डकोरण्टसुरसार्जकान् ॥ ७ ॥
शिरीषबासावंशार्कमालतीदीर्घपुन्नगाः ।
पत्रभङ्गैर्वचाद्यैश्च मांसैश्चानूपवारिजैः ॥ ८ ॥
दशमूलेन च पृथक् सहितैर्वा यथामलम् ।
स्नेहवद्भिः सुराशुक्तवारिक्षीरादिसाधितैः ॥ ९ ॥
कुम्भीगलन्तीर्नाडीर्वा पूरयित्वा रुजार्दितम् ।
वाससाच्छादितं गात्रं स्निग्धं सिञ्चेद्यथासुखम् ॥ १० ॥

शिग्रुवित्यादि । शिग्रुवारणादीनां पत्रसमूहे । शिग्रुवीरणकैरण्डेति वा पाठ । तथा वचाद्यैर्वचादिगणोक्तैस्तथा मांसैरानूपैस्तथा जलजैः । आनूपग्रहणेनैव वारिजग्रहणे सिद्धे पुनर्वारिजग्रहण विशेषेण वारिजा मात्रा इति सूचयितुम् । तथा दशमूलेन च यथामलं यथादोष पत्रभङ्गादिभिः पृथग् व्यस्तैः सहितैर्वा द्वाभ्यां त्रिभिर्वा चतुष्पञ्चादिभिर्वा समस्तैर्वा यथामलं स्नेहवद्भिः । अत्रापि यथामलमिति सम्बध्यते । यो यस्य दोषस्य योग्यो घृताद्यन्यतम स्नेह, तेन युक्तैस्तथा यथामलं सुरादिसाधितैः कुम्भाद्यन्यतम पूरयित्वा रुजार्दितं पीडातं गात्रमङ्गं वाससाच्छादित तथा स्निग्धं सद् यथासुखस्पर्शं दोषपीडादिवशात् कदाचिदत्युष्ण कदाचिदीषदुष्णं सिञ्चेत् । कुम्भी स्थाली । गलन्ती अनवरत धारया जलं या स्रवति । नाडी वशादिमयी । कुम्भी (पा०) गलन्ती (कौ०भा०) नाळी (का०) इति पाठ्यकारः ॥ १० ॥

१, वीरण, २. कारज इति च मुद्रिताष्टाङ्गहृदयपाठ ।

परिषेकं द्रवस्वेदमुपन्यास अवगाहं द्रवस्वेदमाह—

तैरेव वा द्रवैः पूर्णं कुण्डं सर्वाङ्गगेऽनिले ।
अवगाह्यातुरस्तिष्ठेदर्शःकुच्छ्रादिरुक्षु च ॥ ११ ॥

तैरेवेत्यादि । तैरेव पूर्वोक्तैः स्वेदद्रवैः पूर्णं पूरितम् । कुण्डमवगाह्य रोगी तिष्ठेत् । कीदृशि दोषे । सर्वाङ्गगेऽनिले सर्वशरीरव्यापिनि वायौ । कुण्डग्रहणमुपलक्षणार्थम् । (तेन) कटाहद्रोण्यादेरपि परिग्रहः । अर्शःकुच्छ्रादिरुक्षु चावगाह्यातुरः तिष्ठेत् । आदिशब्देन हस्तपादादिपीडासु च ॥ ११ ॥

सामान्यस्वेदाचरणप्रकारं स्वेदभेदांश्च दर्शयति—

निवातेऽन्तर्बहिःस्निग्धो जीर्णान्नः स्वेदमाचरेत् ।

निवात इत्यादि । निवाते अपगतवाते देशे स्थित्वा स्वेदमाचरेत् । वातस्य घीतन्पर्गत्वात् तत्सम्बन्धे न स्वेदोत्पत्तिरिति तन्निषेधः । किंभूतः । अन्तः स्नेहपानेन बहिश्चाभ्यङ्गादिना स्निग्धः । जीर्णान्नश्च भुक्तान्नमेनं 'जीर्णं यस्य स एवम् ॥

कीदृशं स्वेदमाचरेदित्याह—

व्याधिव्याधितदेशर्तुवशान्मध्यवरावरम् ॥ १२ ॥

व्याध्याद्यपेक्षया यथायोग्यं मध्यं वा वरं वोत्कृष्टमवरम् अल्पं वा स्वेदमाचरेत् । कथं जीर्णान्न इति । अजीर्णे स्वेदविधानात् । 'विष्टम्भे स्वेदनम्' इत्यादि । उच्यते । अस्य सामान्यविधित्वात् तस्य च विशेषविधित्वाददोषः । आमाजीर्णाधिक्यान्तेन तु पुरुषेणाजीर्णेऽन्ने नैव स्वेद आचरणीयः । ननु तत्रामे स्नेहनिषेधात् कथं स्निग्धस्य स्वेदविधिः । अत्रोच्यते । तदपि पूर्वेण समानम् उत्सर्गापवादत्वात् । अस्निग्धस्य सतः किञ्चिदेव तापाढ्यः स्वेदोऽजीर्णिनः ।

उक्तं च—

तापाढ्यं स्वेदनं कुर्यादस्निग्धस्य शरीरिणः ।
अजीर्णिनोऽग्निवृद्ध्यर्थं विष्टम्भोपशमाय च ॥ ८ ॥

इति ॥ १२ ॥

अस्निग्धानपि कांश्चित् स्वेदविषयमाह—

कफार्तौ रूक्षणं रूक्षो रूक्षस्निग्धं कफानिले ।

कफार्त इत्यादि । दोषापेक्षया स्वेदमाहेति हाटकः । य पुरुषः कफार्तः स रूक्षोऽन्तर्बहि स्नेहहीनः सन् रूक्षणं स्नेहहीन, स्वेदमाचरेत् । न तु स्नेहयुक्त स्वेदमाचरेत् । कफानिलसर्गे रूक्षस्निग्धं केनचिदंशेन रूक्ष केनचिदंशेन स्निग्ध पर्यायेण वा रूक्षं स्निग्ध स्वेदमाचरेत् । अथवा रूक्ष पुरुष स्निग्ध स्वेदमाचरेत् वा ॥

दोषापेक्षयाप स्वेदविशे माह—

आमाशयगते वायौ कफे पक्वाशयाश्रिते ॥ १३ ॥
रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः ।

आमाशयेत्यादि । आमाशय गत पक्वाशयमाश्रित "द्वितीयाश्रिता—" इति समास । वायावामाशयगते कफे पक्वाशयाश्रिते यथासङ्ख्येन रूक्षपूर्वं स्नेहपूर्वं च स्वेदमाचरेत् । आमाशयस्थिते वाते आदौ रूक्ष स्वेद कार्यः । पश्चात् स्निग्ध । तथा पक्वाशयगते कफे आदौ स्निग्धस्वेद पश्चाद् रूक्ष इत्यर्थ । कुत एव नियम इत्याह—स्थानानुरोधत. कफवातयो स्थानयोरनुरोधेन स्थानवशेन । वायुर्यत आमाशयगत आगन्तुस्तच्च स्थान श्लेष्मणस्तद्वशात् स्थानिन् कफमपेक्ष्मादौ रूक्ष एव स्वेदो योज्यः, पश्चात् स्निग्धः स्वेद । कफश्च पक्वाशये आगन्तुः, स्थान तद्वायो , अतस्तदनुरोधात् स्थानिन वायुमपेक्ष्य प्रथम स्निग्ध स्वेद , पश्चाद् रूक्ष । उक्त च— 'तत्रान्यस्थानसस्थेषु तदीयाम्' इति । तथाहि—

'आगन्तु शमयेद् दोष स्थानिन प्रतिकृत्य वा' ॥

इति च । तसात् पूर्वं रूक्षेण स्थानिन कफ प्रतिकृत्य पश्चादागन्तुकस्य वायो शमन स्निग्धस्वेदान्वयं योज्यमिति । ननु वायोरामाशये कोपोऽनुपपन्न । यतो मरुल्लघ्वादिगुणयुक्त । आमाशयस्तु गुरुमृदुपिच्छिलोऽत शम एवोपपन्न इति केचित् । एतदयुक्तम् । बलिनो ह्यन्याश्रयस्यापि कोपो युक्तः ॥

"ते कारादिबल लब्ध्वा कुप्यन्त्यन्याश्रयेष्वपि"

इति वचनात् ॥

पुनरपि स्थानतो विशेषमाह—

अल्पं वंक्षणयोः स्वल्पं दृङ्मुष्कहृदये न वा ॥ १४ ॥

अल्पमित्यादि । वङ्क्षणयोरल्प स्तोक स्वेदमाचरेत् । दृग्मुष्कयोर्हृदि च मृदुपमृत्यल्पं स्वेदमाचरेत् । न वेति । अथवा दृगादिषु

स्वेद नाचरेत् । 'महत्त्वे मुष्कयोः' इति विशेषविधि । अथवा महत्त्वे मुष्कयोरिति विहित. स्वेदोऽन्यास्य इति विशेष । स्वल्पमतिशयेनाल्प वा अत्यन्त स्वेदनिवृत्तिर्वा दृगादिषु । उक्त च—

"न चक्षुर्हृदयादीनि तेज.स्थानानि स्वेदयेत् ।
मुक्ता(वली)भि. शीताभि. शीतलैर्भाजनैरपि ॥
जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदय स्पृशेत् ।
व्याधौ स्वेदनसाध्ये वा मृदुना स्वेदयेद् भिषक् ॥"

इति । तेज स्थानत्व नाम चक्षुष्याग्नेयत्वमभिप्रेतम् । हृदये तेज इत्यात्मा । तत्स्थानस्वेदात तयोर्म्लानिरिति । चक्षुषी अपि शीतलेन पिधायैव स्वेद कार्य । तदुक्तम्—

"पद्मोत्पलादिभि. सक्तुपिण्ड्या वाच्छाद्य चक्षुषी ।
शीतैर्मुक्तावलीपद्मकुमुदोत्पलभाजनैः ॥
मृदु करैश्च सजले स्विद्यतो हृदय स्पृशेत्" ।

इति । हृदयस्य महामर्मत्वादाच्छादनविधान शीतलैः । वस्तिमुष्कयोरपि वस्त्रादिनाच्छाद्य स्वेदः कार्य । मर्मत्वादिति वेद्यम् ॥ १४ ॥

स्वेदस्य सम्यग्योगातियोगलक्षण चिकीर्षुरिदमाह—

शीतशूलक्षये स्विन्नो जातेऽङ्गानां च मार्दवे ।
स्याच्छनैर्मृदितः स्नातः । ततः स्नेहविधिं भजेत् ॥ १५ ॥

शीतेत्यादि । शीतशूलयोः क्षये जाते सति अङ्गानां पाणिपादादीनां च मार्दवे मृदुत्वे जाते सति स्विन्नो नर स्यात् । अन्यच्च ।

"लाघव मार्दव चाग्ने शैत्यस्तैमित्यनाशनम् ।
कर्मक्षमत्वं श्रद्धाने स्यात् स्विन्ने शूलक्षय. ॥"

इति । शनैरित्यादि । एवविधे सम्यग्योगलक्षणेऽधिगतेऽनन्तर स च स्विन्न शनैर्मृदितो मन्द मर्दितश्च उष्णोदकेन स्नातः सन् स्नेहोक्तविधिं "उष्णोदकोपचारी स्यात्" इत्यादिक भजेद् इति ॥ १५ ॥

स्वेदस्य मिथ्यायोगलक्षणपुरस्सरमतियोगलक्षणमाह—

पित्तास्रकोपतृण्मूर्च्छाश्वराङ्गसदनभ्रमाः ।
मन्थपीडाज्वरश्यावरक्तमण्डलदर्शनम् ॥ १६ ॥
स्वेदातियोगाच्छर्दिश्च

पित्तेत्यादि । स्वेदस्यातियोगात् पित्तासृक्कोपादयो भवन्ति छर्दिश्च। स्वेदस्यातियोगाद् उष्णत्वात् पित्तास्रयो समानयो कोप, सौम्यधातुक्षयात तृड्डुत्पत्ति मूर्छादयश्च । मूर्छा मोह. । सदनशब्दः स्वराङ्गाभ्या सम्बध्यते । सन्धिपीडा श्लेष्मक्षयात् । ज्वरस्वेदयोः सन्तापात्मकत्व समानम् । श्यावाना रक्ताना च मण्डलाना च दर्शनमुत्पत्ति । 'श्यावानि रक्तानि च मण्डलानि अमत आतुर. पश्यती'ति इन्दु । अस्र रुधिरम् आसृं वा ॥

असृ आसृश्च पुल्लिङ्गो क्लै(शे २दे) क्ली रुधिरेऽश्रुणि ।

इति यादवः ।

तत्र स्तम्भनमौषधम् ।

विषक्षाराग्न्यतीसारच्छर्दिमोहातुरेषु च ॥ १७ ॥

तत्रेत्यादि । तत्र स्वेदातियोगे स्वेदातियोगोद्भवे वा व्याधौ । स्तम्भनं वक्ष्यमाणमौषध भवति । विषादीनामातुरेण सम्बन्ध । विषाद्यातुरे इत्र स्तम्भनमौषधमिति प्रसङ्गोक्ति । आतुरग्रहणमेतद् रोगासक्त्युपलक्षणार्थम्। तथा चामातिसारे स्तम्भनस्यापथ्यत्व वक्ष्यति । तेनात्रा(मंदोषरहितो)ऽतिसार उच्यते। मोहातुरो मूर्च्छाभिभूत । मेहातुर इति वा पाठ ॥ १७ ॥

स्वेदनस्तम्भनयो सामान्यन लक्षणमाह—

स्वेदनं गुरु तीक्ष्णोष्णं प्रायः स्तम्भनमन्यथा ।

स्वेदनमित्यादि । गुरु यद् द्रव्य तीक्ष्णमुष्ण च तद् बाहुल्येन स्वेदन भवति । प्रायोग्रहणाद् व्यभिचारसूचनार्थाद् भयशोकक्रोधादिक गुरुत्वादिरहितमपि स्वेदन गृह्यते । अन्यथा अतो वैपरीत्येन लघु मन्द शीत च सर्व स्तम्भन भवति । अत्रापि प्राय इत्यन्वेति । गुरुणा सलिलादिना सेकेन स्तम्भन भवति ॥

स्तम्भन नाम गतिनिरोधक पूर्वोक्त सविस्तर दर्शयति—

द्रवस्निग्धसरश्लिग्धरूक्षसूक्ष्मं च भेषजम् ॥ १८ ॥

स्वेदनं स्तम्भनं श्लक्ष्णं रूक्षसूक्ष्मसरद्रवम् ।

द्रवेत्यादि । द्रवादिगुणयुक्त द्रव्य स्वेदन भवति । रूक्षादिगुणयुक्त च स्तम्भनम् । सरश्लक्ष्णसूक्ष्मद्रवाणा सम्कारसयोगादिनैवोभयरूपत्वमिति न दूषयता ॥

अधुना रक्तोऽपि स्तम्भनमाह—

प्रायस्तिक्तं कषायं च मधुरं च समासतः ॥ १९ ॥

प्राय इत्यादि । प्रायः संक्षेपेण तिक्तं कषायं मधुरं च स्तम्भनं भवति । प्रायोग्रहणं क्वचिद् व्यभिचारदर्शनात् । एकेन चकारेण कटुकाम्ललवणानां स्वेदत्वमुक्तम् ॥ १९ ॥

अनन्तरं प्रासङ्गिकस्य स्तम्भनस्य सम्यग्योगादिलक्षणमाह—

स्तम्भितः स्याद् बले लब्धे यथोक्तामयसंक्षयात् ।

स्तम्भितः स्यादिति । बले लब्धे जाते सति यथोक्तानां स्तम्भ्यानामामयानां क्षयाच्च स्तम्भितो नरः स्यात् । एवं सम्यग्योगो विज्ञेयः ॥

स्तम्भत्वक्स्नायुसङ्कोचकम्पहृद्ग्रहघनुग्रहैः ॥ २० ॥

पादोष्ठत्वक्करैः श्यावैरतिस्तम्भितमादिशेत् ।

स्तम्भेत्यादि । स्तम्भोऽत्रस्तम्भनम् । त्वक् च स्नायुश्च तयोः सङ्कोचः । हृदयादीनां ग्रहेण सम्बन्धः । तत्र स्तम्भादीनां द्वन्द्वः । स्तम्भादिभिस्तथा पादादिभिः श्यावैरतिस्तम्भितमादिशेत् । एवं स्तम्भनातियोगो विज्ञेयः ॥

स्वेदाविषयान् दर्शयति—

न स्वेदयेदतिस्थूलरूक्षदुर्बलमूर्च्छितान् ॥ २१ ॥

स्तम्भनीयक्षतक्षीण*क्षाममद्यविकारिणः ।

तिमिरोदरकीसर्पकुष्ठशोपाढ्यरोगिणः ॥ २२ ॥

पीतदुग्धदधिस्नेहमधून् कृतविरेचनान् ।

अष्टदग्धगुदग्लानिक्रोधशोकभयान्वितान् ॥ २३ ॥

क्षुत्तृष्णाकामिलापाण्डुमेहिनः पित्तपीडितान् ।

गर्भिणीं पुष्पितां सूतां मृदु चात्ययिके गदे ॥ २४ ॥

न स्वेदयेदित्यादि । अतिस्थूलादीन् न स्वेदयेत् । अतिस्थूलस्य मेदुरत्वात् स्वेदेन मेदोविलयनादत्यन्तं शरीरक्षोभः स्यात् । ततो रोगोत्पत्तिः । रूक्षादीनामतिकार्श्यं गवेत् । यः स्तम्भनीयत्वेनोक्तः तं न स्वेदयेत् । हृद्याकारत्वाह—

"रूक्षस्य कार्श्यं स्वेदेन दुर्बलस्य बलक्षयः ।

पित्तोपो मूर्छितस्य स्तम्भनीये विरुद्धता" ॥ इति

---

१. 'ग्रहार्दितान्' क. पाठः. २. 'चात्ययिके' इति मुद्रितादर्शहृदयाभ्यां.

---

* क्षामेति स्थाने क्षीणेति व्याख्यानादयं पाठः कल्पितः ।

क्षतक्षीण उरःक्षतवान् । पित्तविकारवान् कामिलादियुक्तः । मद्यविकारी मदात्ययादियुक्तः । तिमिराभयी च न स्वेद्यः । तत्रापि पित्तवृद्धिः । अधरकायस्वेदनादपि पित्तादेरूर्ध्वप्राप्त्या दृष्टिरोगवृद्धिरित्यर्थः । उदरी दकोदरी । तस्य स्वेदेन द्रवीभवन्ति दोषाः । दकोदरिणः स्वेदो निषिद्ध इति कथं ज्ञायते इति चेद् । उच्यते । समानतन्त्रात् तत्सिद्धिः । तथाहि —

"पाण्डुर्मेही रक्तपित्ती तृडार्तः
क्षतक्षीणो मूर्छनो जीर्णभक्तः ।
दकोदरी गर्भिणी पानपश्च
न स्वेद्याः स्युर्यश्च मत्योंऽतिसारी ॥" इति

विसर्पकुष्ठशोषेषु धातुक्लेदनं स्यादिति निषेधः । आढ्यरोगो वातशोणितं तद्वान् । दुग्धदधिस्नेहमधुषु पीतेष्वजीर्णेषु न स्वेद. कार्यः । पीतक्षीरस्य स्वेदादुत्क्लेशः तेनापक्तिः । दध्यादीनामुष्णत्वात् तद्विरोधः । पीतदुग्धादीनां यावज्जरणकालं कृतवमनविरेचनस्याबललाभात् स्वेदो न योज्य इतीन्दुः । कृतविरेचनानां शरीरसादभ्रमादयो भवन्ति परिहारदिवसेषु स्वेदात् । अष्टगुदोऽतिसारादिभिः । दग्धगुदः क्षारादिना । ग्लान्यादीनामर्दितेन सम्बन्धः । क्षुद्वतः स्वेदादत्यन्तं शरीरग्लानिः । कामिलापाण्डुमतोः स्वेदेन पित्तातिवृद्धया रोगवृद्धिः यस्मादध्येष्यते 'पित्तप्रधाना' इत्यादि । तथा —

"यः पाण्डुरोगी सेवेत पिप्पलीं तस्य कामिलाम् ।"

इत्यादि । मेहिनस्तु स्वेदेन स्वेदवृद्धया रोगवृद्धिः । पित्तपीडिताः पित्तप्रकृतयः । गर्भिण्याः स्वेदेन गर्भव्यापत् शरीरक्षोभो वा । पुप्पिताया रक्तातिप्रवृत्तिः स्यात् । सूतायाः कार्श्यम् । मृदु चेति । अत्ययः कृच्छ्रम् । अत्यये भवत्यात्ययिकः । एतान् अतिस्थूलादीन् निषिद्धस्वेदानपि आत्ययिके व्याधौ विधिचिकादौ सति मृदु किंचित् स्वेदयेदेव । उक्तं च —

"अतिपिद्धे नरे स्वेदः कार्यः संशुद्धिमिच्छता ।
मात्रया प्रतिपिद्धं तु सुस्विन्नं न कदाचन ॥"

इति ॥

अस्विन्नं स्वेदयेद् धीरः पुनरास्वेदलक्षणात् ।
अतिस्विन्नं हिमे रूक्षैर्मोजयेदाहिमागमात् ॥

इति । अन्यत्र च —

स्वेदसाध्ये गदे पुंसि निषिद्धस्वेदने सति ।
अर्तादृग्कल्पनां कार्यां स्वेदो सापद्वातनौ ॥
इति ॥

ऊष्मा स्वेदश्चाष्टविधस्तीक्ष्णत्वान्मारुतेऽधिके ।
कफोल्क्लेशे च कर्तव्यस्तद्भेदांश्च निबोध मे ॥

पिण्डस्सङ्करनामैको नाडीसंस्तरनामकौ ।
घनाश्मकुम्भीकूपौ च कुटी जेन्ताकसंज्ञितः ॥

पाषाणलोष्टमृत्पिण्डानयोलोहादिपिण्डकान् ।
कृत्वाग्निवर्णान् सन्दंशैनाग्नेऽम्भसि निमज्जयेत् ॥

तेनोष्मणाम्बरच्छन्नं श्लेष्ममेदःसमुत्थितम् ।
ग्रन्थिमग्निं च शूलातं स्वेदयेदेष पिण्डकः ॥

वस्त्रबद्धैरबद्धैश्च वातघ्नद्रव्यपिण्डकैः ।
कृसरापायसादीनां पिण्डैर्वा सङ्कराह्वयः ॥

पिण्डेन क्रियमाणत्वादेकत्वमनयोर्मतम् ।
वातघ्नद्रव्यसम्पूर्णे घटे वह्न्युपरि स्थिते ॥

पट्टान्तरं सुघ्नदेशे सुषिरेण समन्वितम् ।
सन्धेयं च तयोः सन्धिं मृदाधैरपलेपयेत् ॥

तस्याननं च वर्धायाद् घनैर्वंशारिभिर्दृढम् ।
द्वारं च कृत्वा तत्पार्श्वे नाडीं लोहमयीं न्यसेत् ॥

गजशुण्डाग्रसंस्थानामन्यथा वा यथेच्छति ।
तया विनिर्गतं वाष्पनाडीतः स्रावितोऽपि वा ॥

गृह्णीयादनृजुत्वेन नं तनं यत्ते वसौ ।
नाडीस्वेदोऽयमाख्यात सोत्तरोऽतः प्रवक्ष्यते ॥

वातघ्नपत्रशाखादीन् मांसादीन् वा यथायथम्
संस्वेद्य पात्रे सन्तप्तवदने रुद्धमास्ये ॥

गूढे पुनश्च कृत्वा तन्मोक्षे विनिवेशयेत् ।
स्वेदद्रव्यं तथाच्छाद्य कैश्चेत्यादिभिर्गुणैः ॥

शयीत तस्मिन् संस्तीर्य स्वेदनात् संस्तरः स्मृतः ।
दग्ध्वा नरायमसमां शिलां पवनाशनैः ॥
काष्ठैर्भसाधपोह्यात्र वातघ्नैरवसेचयेत् ।
द्रवैस्तत्र प्रसार्योक्तां शय्या मावृतदेहवान् ॥
शयीत तत्र शयनात् स्वेदोऽग्निघनसंज्ञितः ।
वातघ्नं द्रव्यमुत्कार्य्य कुम्भ्यामन्य(त्र?त्र)वाथ तत् ॥
समाश्लिष्य च यः स्वेदो स कुम्भीसंज्ञकोऽथ वा ।
निधाय कुम्भीं भूगर्ते ता तदूर्ध्वं प्रकल्पयेत् ॥
आसनं शयनं वात्र स्थितः स्विद्यति ना सुखम् ।
तस्यामयोगुळान् क्षिप्त्वा वह्निवर्णांस्तदूष्मणा ॥
स्वेदश्च कुम्भीसंज्ञः स्यादथ कूप. प्रवक्ष्यते ।
कूपे वातहरद्रव्यपूर्णदग्धे विधूमके ॥
द्रवैः काञ्चिकदध्याद्यैरवसिक्ते तदूर्ध्वतः ।
शय्यां प्रस्तार्य तत्रस्थः सुस्विन्नः स्यात् स कूपजः ॥
कुटीं नात्युच्चविस्तारामच्छिद्रामुपकल्पयेत् ।
तद्विधिं वातहद्द्रव्यैरत्युष्णैः श्लक्ष्णकल्कितैः ॥
घनं प्रलिम्पेदेतस्यामुष्णप्रावरणावृतः ।
तस्यां हसन्तिकाङ्गारवृतायां स्विद्यति स्फुटम् ॥
कुटीस्वेदोऽयमाख्यातो जेन्ताकोऽतः प्रवक्ष्यते ।
वास्तुशास्त्रप्रशस्तायां भूमौ पुष्करिणीतटे ॥
अष्टारत्नीरपुक्रम्य कारयेत् कूटमन्दिरम् ।
षोडशारत्निविस्तारं तावन्मात्रसमुच्छ्रयम् ॥
तज्जलाभिमुखद्वारं बहुवातायनावृतम् ।
मृत्स्नारचितसम्भित्तिं मसृणीकृतभूतलम् ।
अरत्न्युन्नतिविस्तारां पिण्डीं तत्र प्रकल्पयेत् ॥
अनुभित्तिसमां श्लक्ष्णदेहामाद्वारवर्तनाम् ।
कूटमन्दिरमध्ये स्यात् सप्तहस्तसमुच्छ्रयम् ॥

चतुष्किष्कुविनिर्मुक्तं प्रत्याशं परिणाहतः ।
कन्द्वाकारं बहुच्छिद्रं पूरयेद् वातनाशनैः ॥
काष्ठैः सरलगायत्रीसुरदार्वादिसम्भवैः ।
आदीप्य विगते धूमे तप्ते तन्मन्दिरे पुनः ॥
वातघ्नतैलेनाभ्यक्तः संवृताङ्गश्च वाससा ॥
शयीत पिण्ड्यां पृष्ठेन पार्श्वाभ्यामुरसा तथा ।
यावत् स्वेदोद्गमः पिण्ड्या सावो देहस्य राघवम् ॥
तावन्न मुञ्चेत् तां पिण्डीं सा हि द्वारस्य वेदिनी ।
ततो निर्गन्तुमीहेत सुस्विन्नो निर्गतोऽपि च ॥
उष्णार्तः सहसा सिञ्चेन्नाक्षिणी शीतवारिणा ।
जेन्ताकोऽयं समाख्यातः स्वेदराजो बहुव्यथः ॥
हिमानीपिहिते देशे व्याधिते बलवत्तमे ।
कफवातोल्वणे व्याधौ योज्यो हेमन्तशीतयोः ॥
इति ॥ २४ ॥

अधुना अवश्यस्वेद्यानाह—

श्वासकासप्रतिश्यायहिध्माध्मानविबन्धिषु ।
स्वरमेदानिलव्याधिश्लेष्मामस्तम्भगौरवे ॥ २५ ॥
*महत्त्वे मुष्कयोः खल्यामायामे वातकण्टके ।
मूत्रकृच्छ्रार्बुदग्रन्थिशुक्राघाताढ्यमारुते ॥ २६ ॥
स्वेदं यथायथं कुर्यात्तदौषधविभागतः ।

श्वासेत्यादि । श्वासादीनां विबन्धान्तानां द्वन्द्वः । तत इनिः । श्वासादिमत्सु यथास्वं स्वेदं कुर्यात् । श्वासकासादयस्तु अवश्यं स्वेद्या एवेत्यर्थः । 'खल्ली तीव्ररुजान्विते'ति वातव्याधौ वक्ष्यते' आयामवातकण्टकौ च । शुक्राघातः शुक्रदोषः । आढ्यमारुत उत्स्तम्भः । यथायथं स्वेदं कुर्यात् । कथं. तदौषधविभागतः तेषां श्वासादीनां तेषु वा औषधानि तदौषधानि तेषां विभागो यथास्वमुपयोगः, तेन तदौषधविभागेन । तृतीयार्थे तसिल् । तेनेतदुक्तं भवति — 'यदा

* इत उत्तरम् 'अङ्गमर्दतमकार्थवृष्यकृशेदवृद्धे' इत्यधिकपाठो मुद्रितपुस्तकेषु दृश्यते ।

श्वासे स्वेद उपयुज्यते तदा श्वासोक्तैरेवौषधैः स्वेदो योज्यः । एवं कासादिष्वपि स्वै स्वैर्वाच्यम् । तेषा स्वेदानामौषधविभागेन औषधविशेषेणेति हृद्याकारः ॥ २७ ॥

एतन्निष्कृतः स्वेद उक्तः । अनग्निकृतस्य स्वेदस्य विषय उच्यते—

स्वेदो हितस्त्वनाग्नेयो वाते मेदःकफावृते ॥ २७ ॥

स्वेदो हित इत्यादि । मेदसा कफेन वा पवने आवृते सत्यनाग्नेयोऽग्नि-सबन्धरहितः स्वेदो हितः । अनाग्नेय इति 'अग्नेर्ढक्' इति ढक्। ततो नञ्-समासः ॥

कोऽपावनाग्नेयः स्वेद इत्याह—

निवातं गृहमायासो गुरुश्चावरणं भयम् ।
उपनाहाहवक्रोधभूरिपानक्षुदातपः ॥ २८ ॥
स्वेदयन्ति दशैतानि नरमग्निगुणादृते ।

निवातमित्यादि । निवातं वातरहितं गृहम् । गुरुश्चावरणं कम्बलरल्लकादि । भयं भयानकैः खड्गव्यग्रराजपुरुषदर्शनादिभिः । उपनाहोऽप्यनाग्नेयः, उपनाहस्य द्वैविध्यात् । तत्र 'उपनाहो वचा क्षिप्त्वा' इत्यादिनाग्नेयः । तत्र तापो-ष्मितसबन्धेत्यनुवृत्तेः । अनाग्नेयस्तूपनाहः 'स्निग्धोष्णवीर्यैर्मृदुभिश्चर्मपट्टैरपूतिभि'-रित्यादिकः । हाटकोऽपि वचाक्षिप्त्वेत्यादिरुपनाहोऽग्नितापानुवृत्त इत्याह । आहवः समरः । पानं मद्यपानम्[1] । भूरिपानशब्देन बहुमद्यपानमभि-प्रेतम् । (क्षुदिति) क्षुन्निमहः । एतानि दश निवातगृहादीनि अग्निगुणादृते अग्नियोगं विना शक्त्यैव नरं स्वेदयन्ति ॥ २८ ॥

स्वेदः किमर्थमुक्त इत्याह—

स्नेहक्लिन्नाः कोष्ठगा धातुगा वा
स्रोतोलीना ये च शाखास्थिसंस्थाः ।
दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं
नीताः सम्यक् शुद्धिभिर्निर्हरन्ते[2] ॥ २९ ॥

स्नेहक्लिन्ना इत्यादि । अनेन स्वेदफलं निर्दिशन् उपदिशन् आतन्त्रयुक्तिं दर्शयति — ये दोषा वातादयः कोष्ठस्थाः ते स्नेहक्लिन्नाः शुद्धिभिर्वक्ष्यमाणाभिर्वमनविरेचनलक्षणाभिर्निर्हरन्ते निष्कास्यन्ते । ये धातुषु रक्तादिषु गताः स्वेभ्यः स्थानेभ्यः, तथा ये स्रोतोलीनाः स्रोतांसि

१. 'पानं' क मुद्रितपुस्तकपाठश्च । २. 'नीत्वा' क. पाठः ।

गतास्तथा ये च शाखास्थिषु बाह्वादिनलकास्थिषु स्थितास्ते सर्वे अनन्तरोक्तप्रकारेण स्नेहेन विलिन्नाः शुद्धियोग्यत्वमापादिता. सन्तो यथोक्तेन स्वेदेन द्रवीकृत्य शाखादिभ्यः कोष्ठं नीता प्रापितास्ततः कोष्ठाद् वक्ष्यमाणाभिः शुद्धिभिर्निर्हियन्ते । शाखास्थिग्रहणं तत्स्थेषु दोषेष्यत्यन्त-स्वेदयोग्यताप्रतिपत्त्यर्थम् । अथवा धातुगा ये वृद्ध्या कोष्ठाद् धातुषु गताः । शाखास्था ये धातुष्वेव स्थिताः कोपं याताः । अत्राप्यस्थिग्रहणं प्राधान्यार्थम् । बाह्वादिनलकानां ग्रहणम् एषां दोषाणां कोष्ठानयनम् । वाशब्दः प्रकारवाची । ये च कोष्ठाद् धातुगा वा ये च स्रोतोलीनाः ये च शाखास्थिसंस्था एते दोषा. स्नेहविलिन्नाः स्वेदेन द्रवीकृत्य कोष्ठं नीताः सम्यक् शुद्धिभिर्निर्हियन्ते । सम्यक् शब्दस्योभयत्राप्यन्वय । अन्ये त्वाहुः— ये पूर्वं कोष्ठगा धातुगा वा भूत्वा पश्चात् तेभ्यः स्रोतस्सु लीना ये च शाखास्थिष्वेवात्यन्तमवस्थिता उभयेऽपि ते स्नेहविलिन्नाः स्वेदैर्द्रवीकृत्य कोष्ठं नीताः सन्तः शुद्धिभिर्निर्हियन्ते । न केवलं कोष्ठात् प्रसृतानामेव पुनः कोष्ठानयन धातोश्च प्रसृताना शाखास्थिसंस्थाना चेति मनीषा ॥ २९ ॥

इति श्रीदामपण्डितविरचितायां हृदयबोधिकाया
सप्तदशोऽध्यायः ।

अथाष्टादशोऽध्यायः ।

स्निग्धस्विन्नशरीरस्य शुद्धिः कार्येति सम्प्रति ।
विधानमुच्यते वापु सल्लेषाद् वमिरेकयो ॥
यत्नेन दोषहरणं वमनं तद्विरेचनम् ।
शुद्धेन दोषशमनमुभयं रेकसंज्ञितम् ॥
अहृतश्लेष्मणो रेकादुरःस्थो गलित कफ ।
अन्याधारमवप्राप्य वह्निमान्द्यायं कल्पते ।
फफान्तता विरेकस्य लक्षणं न्यूफफे हृते ॥
अन्यथा प्रथमाद् वेगाद् प्रवृत्ति स्याद् फफस्य[1] ॥

इति पूर्वं फलहरणार्थमाह—

अथातो वमनविरेचनविधिमध्यायं व्याख्यास्यामः ।

---

१. 'व्याख्यास्याम इति ह स्माहुरात्रेयादयो महर्षय' क. पाठ.

हाटकस्त्वाह— पूर्वेऽध्याये "दोषाः शुद्धिभिर्निर्ह्रियन्ते" इत्युक्तम्। इदानीं तेषां वमनविरेचनबस्त्यादिसंज्ञकानां निर्देशः क्रियते। तत्र च वमनविरेचनयोर्दोषस्थानस्यैकत्वेनैकरूपत्वादेकस्मिन्नध्याये निर्देशः। यच्छरीरपूर्वभागान्मुखेन दोषनिर्हरणं तद् वमनशब्दवाच्यम्। द्रव्ये वमनकार्ये कारणोपचारात्। यदधो भागाद् गुदेन दोषनिर्हरणं तद् विरेचनाख्यम्। वमनं च विरेचनं च तयोर्विधिः। तत्र यथोद्देशस्तथा निर्देश इति पूर्वं वमनविधिमाचष्टे। अथवा विरेकात् पूर्वं वमनस्योपन्यासो हृतकफस्य हि सम्यग् विरेको भवति तथा चोक्तं—"विरिच्यते मन्दकफस्तु सम्यक्" इति॥

कफे विदध्याद्वमनं संयोगे वा कफोल्बणे।
तद्वद्विरेचनं पित्ते

कफ इत्यादि। श्लेष्मणि केवले वृद्धे तद्विकारेषु च छर्दनं कुर्यात्। संयोगे वा कफोल्बण इति। वाशब्दः समुच्चये। उद्रिक्तकफे संसर्गे च वातकफे पित्तकफे वा वमन कुर्यात्। तद्वदित्यादि। यथा कफे कफाधिके वा संयोगे वमनं कुर्यात् तथैव पित्ते केवले पित्तोल्बणे वा संयोगे विरेचनं कुर्यादिति तद्वच्छब्दस्यार्थः॥

केभ्यो वमनं देयमित्याह—

विशेषेण तु वामयेत्॥ १॥

नवज्वरातिसाराधःपित्तास्रग्राजपाक्ष्मिणः।
कुष्ठमेहापचीग्रन्थिश्लीपदोन्मादकासिनः॥ २॥
श्वासहल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः।

विशेषेण त्वित्यादि। विशेषेण पुनर्नवज्वरातिसारादीन् वामयेत्। नवज्वरादयः षोढश विशेषेण वमनयोग्याः। अन्ये चारोचकविषूचिकाजीर्णादयो बहवो वाग्याः। नवज्वरादीनां द्वन्द्व इनिश्च। स्तन्यदोषा बालामयोक्ताः॥

अवाम्या गर्भिणी रूक्षः क्षुधितो नित्यदुःखितः॥ ३॥
बालवृद्धकृशस्थूलहृद्रोगीक्षतदुर्बलाः।
ग्रसक्तमपुष्टीहतिमिरकृमिकोष्ठिनः॥ ४॥
ऊर्ध्वप्रवृत्तवाग्वस्तदत्तबस्तिहृतस्वराः।
मूत्राघात्युदरी गुल्मी दुर्बलोऽत्यग्निरर्शसः॥ ५॥
उदावर्तभ्रमाष्ठीलापार्श्वरुग्वातरोगिणः।

अवाम्या इत्यादि । गर्भिण्यादय अवाम्याः । वाम्यावाम्यत्व युक्तिः सङ्ग्रहोक्ता द्रष्टव्या । "विहितप्रतिषिद्धेषु प्रवर्तननिवर्तने कार्ये ।" तत्रोपपत्तीनां निरूपणम् । ऐहिकार्थविधानस्य निषेधस्य युक्तिहीनचिन्तने न क्षतिः काचिदिति संग्रहविस्तरः । अर्शांसि विद्यन्ते यस्य सोऽर्शसः । "अर्श आदिभ्योऽच्" । अरुणदत्तस्त्वाह—'तत्र गर्भिण्या वमनाद् गर्भव्यापद् आमगर्भभ्रंशाश्च दारुणरोगस्याघोरक्तपित्तादेरुद्भूतिः । रूक्षस्य वायुर्वाग्घनुस्तादीनां परायत्तीकरणं अन्नग्रहणं च कुर्यात् । क्षुधितस्य वायुना क्षपितशरीरत्वात् बलक्षयः स्यात् । बालादीनामौषधबलाक्षमत्वाद् बलोपरोधः स्यात् । हृद्रोगिप्रभृतीना हृदयोपरोधः । प्रसक्तच्छर्दिनामुदानो वायुरुत्क्षिप्य प्राणानपि हिंस्यात् । एवमन्येष्वपि यथायोगरोगोद्भवश्चिन्त्यः' इति ॥

ऋते विषगराजीर्णविरुद्धाभ्यवहारतः ॥ ६ ॥

ऋत इत्यादि । गर्भिण्यादीनामपि निषिद्धवमनानां विषाद्यभ्यवहारे सति वमनं विधेयमेव । शीघ्रतरविकारित्वादेषां विषादीनाम् । विषाद्यभ्यवहारमन्तरेणैतेऽवाम्याः ॥ ६ ॥

प्रसक्तवमथोः पूर्वं प्रायेणामज्वरोऽपि च ।
धूमान्तैः कर्मभिर्वर्ज्याः सैरेव त्वजीर्णिनः ॥ ७ ॥

प्रसक्तवमथोरिति प्रमत्तोक्तिः । प्रसक्तवमथुः प्रततप्रवृत्तछर्दिः तस्य पूर्वं पुरः स्थिता ये गर्भिण्यादयो दुर्बलास्तास्तथा आमज्वरश्च ते धूमान्तैः कर्मभिः वमनविरेचनास्थापनानुवासननस्यधूमैः प्रायेण वर्ज्यास्त्याज्याः न केवलं वमनेनेति । धूमान्तग्रहण गण्डूषादिकर्मणः परिहारार्थम् । प्रायोग्रहणम् अष्टमासाया गर्भिण्या निरूहावर्ज्यत्वसूचनाय । तथा सद्योऽजीर्णज्वरिणस्य ततो वमनानुज्ञानार्थम् । अथवा प्रायोग्रहणं स्थिरगर्भाया गर्भिण्या निरूहानुज्ञानाय । अपिचशब्दो विशेषविधिव्यञ्जकः कफ्याधिदामजज्वरावस्थाया वमनं शम्यते इति । वक्ष्यति च 'तत्रोत्क्लिष्टे समुद्धिष्टे' इति । सैरेत्यादि । तुशब्दो विशेषे । अजीर्णिनः सैरेव वमनादिभिर्गण्डूषादिभिश्च स्वेदकटाग्न्यन्नादिभिश्च वर्ज्याः । आमशेषभयात् तैर्वमनादयो न सेव्या इत्यर्थः । तथा चोक्तम्—"आमसन्नोऽनलो नालं वक्तुं दोषौषधाशनम्" इति । अत्रापि प्रायोग्रहणमनुवर्तते । सद्योऽजीर्णिनो हि वमनमनुज्ञातमेव । यदुक्तं हि—"अजीर्णी तु सैरेव वमनवर्ज्यः परि-

र्तव्यः आमदोषभयात् । नवज्वरश्च दोषस्तम्भभयादि"ति । हृद्याकारस्तु वमन-स्याजीर्णे विधानाद् वमनवर्जितै सर्वैर्वर्ज्य इति सिध्यतीति वदन् प्रायोग्रहण नानुवर्तयति ॥ ७ ॥

इदानीं विरेचनसाध्या कथ्यन्ते—

विरेकसाध्या गुल्मार्शोविस्फोटव्यङ्गकामलाः ।
जीर्णज्वरोदरगरच्छर्दिप्लीहहलीमकाः ॥ ८ ॥
विद्रधिस्तिमिरं काचः स्यन्दः पक्वाशयव्यथा ।
योनिशुक्राशया रोगाः कोष्ठगाः कृमयो व्रणाः ॥ ९ ॥
वातास्रमूर्ध्वगं रक्तं मूत्राघातः शकृद्ग्रहः ।
वाम्याश्च कुष्ठमेहाद्याः

विरेकेत्यादि । गुल्मादयो विरेकसाध्या विरेकेण साध्या उपक्रम्या । पक्वाशये व्यथा पक्वाशयव्यथा । वाम्याश्चेति । च समुच्चये । ये च कुष्ठमेहाद्या वाम्य-प्रकरणे वमनार्हा उक्ता ते च विरेच्या । वम्याश्चेति वा पाठ ॥

न तु रेच्यो नवज्वरी ॥ १० ॥
अल्पाग्न्यधोगपित्तासक्षतपार्श्वतिसारिणः ।
सशल्यास्थापितक्रूरकोष्ठातिस्निग्धशोषिणः ॥ ११ ॥

नत्वित्यादि । तुरवधारणे । नवज्वरी न तु रेच्यः नैव विरेच्यः । तस्य हि विरेचनमपक्वान् दोषान् निर्हरद् वातकोपायैव स्यात् । यथा किलावस्थाव-शाद्यक्ष्मादीनां मृदुर्विरेच्यत्व तथा न नवज्वरस्येति च तुशब्दार्थ । तथा पठिष्यति ।

बलिनो बहुदोषस्य स्निग्धस्विन्नस्य शोधनम् ।
ऊर्ध्वाधो यक्ष्मिण तुर्याद् ॥ ॥

इति । तथातीसारस्याप्यधःमेष्यते —

'अपि चाऽमानगुरुताशूलस्तैमित्यकारिणि प्राणदा प्राणदे'त्यादिना । एव नवज्वरस्य स्वरूपविरेच्यत्व न कदाचिदर्पयति । हृद्याकारोऽप्याह—तुरवधारणे । अतिसारादीना त्रयाणा कदाचिद् विरेचनमीषदनुज्ञायते न त्वामज्वरस्येति ।

---

१ 'वम्याश्च मुद्रितपुस्तकपाठ

अल्पान्न्यादयः शोष्यन्ता न विरेच्याः । तत्राल्पाग्निरल्पबलत्वाद् भेषजबलं न सहते । अधोरक्तपित्तातिसारिणावतिप्रवृत्त्या हन्यात् । क्षतपायुः क्षतगुदः तस्य प्राणोपरोधकरीं रुजां जनयेत् । सशल्यस्य क्षते वायुराश्रितो जीवितं हन्यात् । आस्थापितस्य भेषजवेगासहनाद् बलोपरोधः स्यात् । क्रूरकोष्ठस्यौषधोद्धता दोषा ह्यप्रवर्तमाना हृदयशूलपर्वभेददाहमूर्च्छादीन् जनयेयुः । अतिस्निग्धस्य चातियोगभयं स्यात् । शोषिणः क्षीणधातुतया मलबलत्वान्मलक्षये देहनाशः स्यादिति निषेधः ॥ ११ ॥

इदानीं वमनविरेचनयो[1] 'प्रयोगक्रमः प्रदर्श्यते—

अथ साधारणे काले स्निग्धस्विन्नं यथाविधि ।
श्लेष्माभ्यमुत्क्लिष्टकफं मत्स्यमाषतिलादिभिः ॥ १२ ॥

निशां सुप्तं सुजीर्णान्नं पूर्वाह्णे कृतमङ्गलम् ।
निरन्नमीषत्स्निग्धं वा पेयया पीतसर्पिषम् ॥ १३ ॥

वृद्धबालाबलक्लीबभीरून् रोगानुरोधतः ।
आकण्ठं पाययेन्मद्यं क्षीरमिक्षुरसं रसम् ॥[2] १४ ॥

यथाविकारविहितं मधुसैन्धवसंयुताम् ।
कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम् ॥ १५ ॥

ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलानलाः ।
ऋषयः सौषधिग्रामाः भूतसङ्घाश्च पान्तु वः ॥ १६ ॥

रसायनमिवर्षीणाममराणामिवामृतम् ।
सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते ॥ १७ ॥

ओं नमो भगवते भैषज्यगुरवे वैडूर्यप्रभराजाय तथागतायार्हते सम्यक् सम्बुद्धाय । तद्यथा—ओं भैषज्ये भैषज्ये महाभैषज्ये समुद्गते स्वाहा ।

प्राङ्मुखं पाययेत् पीते मुहूर्तमनुपालयेत् ।
तन्मना जाग्रद्वातप्रसेकः छर्दयेत्ततः ॥ १८ ॥

---

१. 'श्लेष्मणि'ति च. पाठः. २. 'पादितान्' मुद्रितपुस्तकपाठः. ३. 'मूलमाद' इति च. पाठः.

अङ्गुलिभ्यामनायस्तो नालेन मृदुनाथवा ।
गलतालुरुजन्वेगानप्रवृत्तान् प्रवर्तयन् ॥ १९ ॥
प्रवर्तयन्प्रवृत्तांश्च जानुतुल्यासने स्थितः ।
उभे पार्श्वे ललाटं च चमतश्चास्य धारयेत् ॥ २० ॥

अथेत्यादि । अथेति मङ्गले । प्रत्यवायबाहुल्यान्मङ्गलवचनम् । पञ्चकर्मणां व्यापद्बहुलत्वादतिमङ्गलपरेण पुरुषेण भवितव्यमिति ज्ञापनार्थोऽथशब्द इति हृदयकारः । वाम्यावाम्यज्ञानादनन्तरमित्यन्ये । साधारणे श्रावणादौ काले यथाविधि स्नेहस्वेदाध्यायोक्तक्रमेण स्निग्धस्विन्नं पुरुषं भैषज्यमात्रां प्राङ्मुखं पाययेदिति वक्ष्यमाणेन सम्बन्धः । 'प्राङ्मुखमासीनमातुरमौषधमात्रां पाययेत्' इति योग इति हृदयकारः । साधारण इति स्वस्थवृत्तोपलक्षणम् । आतुरवृत्ते तु व्याध्यादिवशाद् वमनमाचरेत् तत्कालाद्यनुरूपेणैव विधानेन । किं भूतमातुरं पाययेदित्याह—श्लो वाम्यं प्रातर्वमनार्हं मत्स्यादिभिरुत्क्लिष्टकफम् । उत्क्लिष्ट इत्यन्तर्भावितण्यर्थत्वाद् उत्क्लेशितः स्थानाच्चलितः कफो यस्य सः उत्क्लिष्टकफः । श्लोवाम्यमित्यनेन वमनात् पूर्वमेकमहः श्लेष्मोत्क्लेशकान्नप्रयोगं दर्शयति । वम्यमिति पाठे 'अर्हे कृत्यतृचश्च' इति अर्हार्थे 'घोरदुपधादि'ति यत् । तिलादिभिरित्यादिशब्देन माष्यान्नूपोदकमांसरसगुडफलशाकादयो गृह्यन्ते । तथा निशां सुप्त सकला रात्रि सुप्तमित्यर्थः । 'कालाध्वनो'रिति द्वितीया । अत एव यथोचितः सकलनिशास्वापो लक्ष्यते । तथा सुपु जीर्णमन्नं यस्य तम् । कदा पाययेत्—पूर्वाह्णे । किंभूतम् । कृतं मङ्गलं यस्य तम् । मङ्गल्यमित्युपलक्षणम् । कृतदेवद्विजगुरुवृद्धार्चनमपीति द्रष्टव्यम् । कृतहोमबलिप्रायश्चित्तस्वस्तिवाचनमिति च । हृदयकारस्तु कृतमङ्गलमिति अथशब्दद्योतितमेवावश्यकर्तव्यमिति ज्ञापनार्थमुक्तमित्याह । तथा निरन्नमकृताहारं तस्मिन् दिवसेऽन्नमनुपसेव्यमित्यर्थः । आतुरवशात् किञ्चित् स्निग्धम् । कथमित्याह—पेयया पीतघृतम् । हृदयकारोऽप्याह—ईषत् स्निग्धमिति—यद्यसम्यक् स्निग्धः तं पेयया मण्डेन सह पीतघृतं पाययेदिति संबन्ध इति । पाठ्यकारस्तु—ईषत् स्निग्धं वा पेयया पीतसर्पिषमित्यनेन सुरादिविशेषमुद्दिश्य सर्पिषा सह पेयां पीत्वा श्लेष्माणमुत्क्लेशयेदित्यर्थ इत्याह । निरन्नमिति क्रियाविशेषण वा । सिक्थरहितं यथा भवति तथा पेयया पीतसर्पिषमित्यर्थः । तथासौ वम्यो वृद्धो बालो वा दुर्बलो वा क्लीबो वा भीरुर्वा भवति तदा रोगा-

नुरोधादाकण्ठमात्रिमात्रं मद्यादिकानामन्यतमं पाययेत्। अनन्तरं भैषज्यमात्रां पाययेत्। आकण्ठग्रहणं बहुत्वोपलक्षणार्थम्। मद्यमित्युपलक्षणम्। यूषक्रव्युपोदकयवागूमण्डान् पायितानित्यर्थः। सद्ग्रहेऽप्युक्तं—'भीरुक्रूरबालसुकुमारान् वा दोषानुरोधेनाकण्ठं पीतयूषेक्षुरसमांसमद्यादीनामन्यतमम्' इति। किंभूतां मात्रां, यथाविकारं विहिता रोगानुसारेण साधिताम्। तथा मधुसैन्धवाभ्यां संयुताम्। किं कृत्वा? मृद्वादिभेदेन कोष्ठं विभज्य विचार्य मृदुमध्यक्रूरलक्षणं कोष्ठं विचार्य। श्लेष्माधिक्येन मृदुत्वं, श्लेष्ममध्यत्वेन मध्यत्वं, कफहीनत्वेन क्रूरत्वमिति बोध्यम्। "श्लेष्मोत्तरश्छर्दयते सुदुःखम्" इति वचनात्। किंभूताम्। मन्त्रैरभिमन्त्रिताम्। तानेव मन्त्रानाह—ब्रह्मेत्यादिना। ब्रह्मेत्यादि वेदवादिमन्त्रः। ओं नम इत्यादि सौगतः। संग्रहे चोक्तं—इत्येवमभिमन्त्र्योदङ्मुखः प्राङ्मुखमातुरं पाययेत् इति। स्वस्थवृत्तपक्षे आतुरग्रहणं तत्कालावस्थया व्याख्येयमितीन्दुः। हृद्याकारोऽपि—प्राङ्मुखमासीनमातुरमौषधमात्रा पाययेदित्याह॥

पीते[1] सत्यौषधे आतुरस्तन्मना वमनगतचित्तो मुहूर्तं नाडिकाद्वयमनुपालयेत् प्रतीक्षेत। न किञ्चित् कुर्वाणो मुहूर्तमासीत। पीतमिति वा पाठः। भैषज्यमात्रा पीतं सन्तमातुरं मुहूर्तं तन्मना अनुपालयेदिति। ततोऽनन्तरमातुरो जातहृच्छासप्रसेकः सन् छर्दयेत्। हृल्लासो हृदुपरोधः। प्रसेको निष्ठीवनम्। कथं वमेत्। अङ्गुलीश्यामथवा उत्पलकुमुदैरण्डजेन मृदुना नालेन वमेत्। कीदृक्। अनायासतः अनायासेनेत्यर्थः। कथम्। गलञ्च तालु च तदरुजन् अपीडयन्। तथा अप्रवृत्तान् वेगान् न प्रवर्तयन् स्वयं प्रवृत्तांश्च वेगानुन्मुखीभूतान् प्रवर्तयन्। जानुप्रमाणे पीठे उपविष्टः। अस्य चातुरस्य छर्दयतो द्वे पार्श्वे ललाटं च धारयेत्। परिचारक इति शेषः।

अपीडयेत्तथा नाभिं पृष्ठं च प्रतिलोमतः।
नाभिं च प्रपीडयेत् पृष्ठं च प्रतिलोमेन पीडयेत्॥
कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैरिति॥ २१॥
वमेत्स्निग्धाम्लवणैः संसृष्टे मरुता कफे।

---

[1] 'विनयात्' इति च. पाठः

कफ इत्यादि । इत्युक्तप्रकारेण कफे तीक्ष्णोष्णकटुकैर्द्रव्यैर्वमेत् । पित्ते पित्तयुक्ते श्लेष्मणि स्वादुहिमैः स्वादुशीतैर्वमेत् । वायुना युक्ते कफे स्निग्धाम्ल-लवणैर्वमेत् ॥

कियवधि छर्दयेदित्याह—

पित्तस्य दर्शनं यावच्छेदो वा श्लेष्मणो भवेत् ॥ २२ ॥

पित्तस्येत्यादि । व्याध्यादिबलापेक्षया यावत् पित्तदर्शनं स्यात् श्लेष्मणो वा छेदोऽन्त स्यात् तावद् वमेत् ॥२२॥

हीनवेगः कणाधात्रीसिद्धार्थलवणोदकैः ।
वमेत्पुनः पुनः

हीनवेग इति । हीनवेग स्तोकप्रवृत्तदोषो नरः । कणादिभिरसकृद् वमेत् ॥

तत्र वेगानामप्रवर्तनम् ॥ २३ ॥

प्रवृत्तिः सविबन्धा वा केवलस्यौषधस्य वा ।
अयोगस्तेन निष्ठीवकण्ठकोठज्वरादयः ॥ २४ ॥

निर्विबन्धं प्रवर्तन्ते कफपित्तानिलाः क्रमात् ।
सम्यग्योगे

तत्रेत्यादि । तेषु सम्यग्योगायोगातियोगेषु मध्ये यद् वेगानामप्रवर्तनम् असावयोगः । अयोगलक्षणमित्यर्थ । सविबन्धा च या प्रवृत्तिर्वेगाना स्वल्प स्वरूपमागमन सोऽप्ययोग । अथवा केवलस्य दोषादिरहितस्यौषधस्य प्रवृत्ति सोऽप्ययोग । तेन वमनायोगेन निष्ठीवादयो जायन्ते । स्युरिति वा ॥

सम्यग्योगे तु कफपित्तानिला निर्विबन्धं नि सङ्ग प्रवर्तन्ते । आगमो हि —

'क्रमात् कफः पित्तमथानिलश्च
यस्यैति सम्यक् स तु वान्त इष्ट.' ।

इति ॥

अतियोगे तु फेनचन्द्रकरक्तवत् ॥ २५ ॥

वमित क्षामता दाहः कण्ठशोषस्तमो भ्रमः ।
घोरा वाप्यामया मृत्युः जीवशोणितनिर्गमात् ॥ २६ ॥

अग्नियोगे तु पुनः फेनचन्द्रकरक्तवद् वमितं वस्तु भवति। फेनश्च चन्द्रकं च रक्तं च तानि विद्यन्ते यस्य वमितस्य तदेवम्। तथा क्षामतादयश्च भवन्ति। तमस्तिमिरदर्शनम्। दारुणाश्च वातरोगाः तथा जीवाल्यस्य रक्तस्य निर्गमादतिप्रवृत्त्या मृत्युर्वा भवति ॥ २६ ॥

सम्यग्योगेन वमितं क्षणमाश्वास्य पाययेत्।
धूमत्रयस्यान्यतमं स्नेहाचारमथादिशेत् ॥ २७ ॥

सम्यग्योगेन वमिते सति मुहूर्तमाश्वास्य च शीतवातादिना धूमत्रयस्या-द्यापेक्षया मृदुमध्यतीक्ष्णास्यस्य धूमस्यान्धतमसमेकं शिरश्शुद्ध्यर्थं पाययेद् वैद्यः। चक्षुषी चाञ्जयेन्मधुना। यथाह—

'सम्यग्योगेन वमितो हृदयक्षोभशान्तये।
अक्षमात्रं पिबेत् कल्कं द्राक्षाया मधुकस्य वा ॥
शिरःशुद्धये पिबेद् धूम चक्षुषी मधुनाञ्जयेत्।
वमनाच्चालितो दोषस्तथा समुपशाम्यति ॥'

इति। अथानन्तरं स्नेहाचारम् 'उष्णोदकोपचारी स्यादि'त्यादिकमादिशेत् ॥ २७ ॥

ततः सायं प्रभाते वा क्षुद्वान् स्नातः सुखाम्बुना।
भुञ्जानो रक्तशाल्यन्नं भजेत्पेयादिकं क्रमम् ॥ २८ ॥

तत इत्यादि। तत ऊर्ध्वमग्निबलापेक्षया तस्मिन्नेवाहनि सायमपराह्णे भोजयेत्। प्रभाते वापरस्मिन् वाहनि पूर्वाह्णे। यद्यातुरस्याग्निर्बलवान् ततः सायाह्णे भोजयेत् यदि वा स्वल्पबलस्ततो द्वितीयेऽह्नीत्यर्थः। क्षुद्वान् बुभुक्षितः प्रशस्त-बुभुक्षावानित्यर्थः। प्रशंसाया मतुबत्र स्मर्यते—

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षाया भवन्ति मतुवादयः' ॥

इति। सुखाम्बुना स्नातः उष्णोदकेन परिषिक्तगात्रः रक्तशाल्यन्नं पूर्वं भुञ्जानः रक्तशालितण्डुलसंबन्ध्यन्नं पूर्वं भुञ्जानः पेयादिकं क्रमं भजेदिति योगः। पेया आदिः प्रथमं यस्य क्रमस्य स पेयादिकः। क्रमः परिपाटिः। आनुपूर्व्यमित्यर्थान्तरम्। क्रमो नाम न स्वतन्त्रः किन्तु पदार्थान्तरमापेक्षः। अत्र तु पेयादिकमपेक्षते। केनचित्तु रक्तशालिग्रहणमुपलक्षणम्। अन्यदपि लघुशाल्योदनादिकं भोज्यमेवे-

त्याहुः। केचित् तु—

'ततः सायं प्रभाते वा क्षुद्वान् स्नातः सुखाम्बुना।
पुराणरक्तशालीनामस्नेहलवणोषणम्।
भुञ्जानो रक्तशाल्यन्नं भजेत् पेयादिकं क्रमम्।'

इति पठन्ति। अस्य व्याख्या—तत ऊर्ध्वमग्निबलापेक्षया तस्मिन्नेवाहनि सायमपराह्णे द्वितीये वा दिवसे प्रभाते पूर्वाह्णे क्षुद्वान् भवांस्तद्बुभुक्षः सुखाम्बुना स्नातः पेयादिकं क्रमं भजेदिति योगः। किमुपादानं पेयादिकमित्यत्राह—पुराणरक्तशालीनां पुराणा वर्षं स्थिताः वर्षमुषिताः। तेषां रक्तशालीनां तण्डुलैः कृतं पेयादिमस्नेहलवणोषणं स्नेहादिरहितम्। कीदृशो रक्तशाल्यन्नं भुञ्जानः रक्तशालितण्डुलान्नं नित्यमभ्यवहरन् रक्तशालीनां पेयादिकं क्रमं भजेदिति योगः। भुञ्जान इत्यत्र भुञ्जिष्यन्निति च संबन्धः शानचोऽर्थः। सात्म्यप्रदर्शनार्थमिति केचित्। तेनायमर्थः—रक्तशालीनामन्नं भुञ्जानो रक्तशालीनां पेयादिकं क्रमं भजेत् कलमषष्टिकादीनामन्नं भुञ्जानस्तेषामिति। उक्तवाश्च—'ततोऽग्निबलं क्षुधां चावेक्ष्य सायाह्नेऽपरे वाह्नि सुखोदकपरिषिक्त पुराणानां रक्तशालितण्डुलानां सुसिद्धसिक्थमन्नमस्नेहलवणकटुकमल्पस्नेहलवणकटुकं वा द्रवप्रायमुष्णोदकानुपानं प्रातः प्रातरुपयुञ्जानो विधिमिममपेक्षेत' इति। विलेप्याः प्रभृति उष्णोदकानुपानमन्यत्रापि विहितम्। अग्निवृद्ध्यर्थमन्नजीर्त्यर्थं च—

'उष्णं वारि पिबेदन्ने विलेप्यादौ विशुद्धिषु।
कफोच्छेदाय वृद्ध्यर्थमग्नेरन्नस्य पक्तये॥'

इति ॥ २८ ॥

अधुना तमेव पेयादिं क्रमं वमनविरेचनयोरुपयोगमाह—

पेयां विलेपीमकृतं कृतं च
यूषं रसं त्रीनुभयं तथैकम्।
क्रमेण सेवेत नरोऽन्नकालान्
प्रधानमध्यावरशुद्धिशुद्धः॥ २९॥

पेयामित्यादि। प्रधाना च मध्या चावरा च प्रधानमध्यावराः। प्रधानमध्यावराश्च ताः शुद्धयश्च ताभिः शुद्धः प्रधानमध्यावरशुद्धिशुद्धः। प्रधानशुद्धिशुद्धो मध्यशुद्धिशुद्धो अवरशुद्धिशुद्धश्च। नरोऽन्नकालान् क्रमेण यथासंख्यं त्रीनन्नकालान् उभयं चान्नकालमेकं चान्नकाल पेयादीन् पञ्च

क्रमेण सेवेत । प्रधानशुद्धिशुद्धस्त्रीनन्नकालान्, मध्यशुद्धिशुद्धो द्वौवन्नकालौ, अवरशुद्धिशुद्ध एकमन्नकालं पेयां भजेदिति क्रमशब्दार्थः । विलेप्यादिष्वप्येवं योज्यम् । तेनैतदुक्तं भवति । भोजनं हि प्रत्यहमुभयकालं प्रतिष्ठितम् । तत्र यः प्रधानरूपया वक्ष्यमाणलक्षणया शुद्धया शुद्धः स प्रथमे दिवसे सायमेकमन्नकालं पेयां सेवेत उपयुञ्जीत । द्वितीये दिवसे द्वावन्नकालौ पेयामुपयुञ्जीत । एवं त्रीनन्नकालान् पेयोपयुक्ता भवति । ततस्तृतीये दिवसे द्वावन्नकालौ चतुर्थे दिवसे प्रातरेकमन्नकालं च विलेपीं सेवेत । एवं त्रीनन्नकालान् विलेप्युपयुक्ता भवति । पेया यवागूः । सा तु समण्डा प्रविरलसिक्था च । विलेपी प्रक्षीणमण्डा संहतसिक्था च । तथा चतुर्थे दिवसे सायमेकमन्नकालम् अकृतयूषं सेवेत । पञ्चमे द्वादन्नकालावकृतयूषं सेवेत । एवमकृतो यूषस्त्रीनन्नकालानुपयुक्तो भवति । षष्ठे दिवसे द्वावन्नकालौ सप्तमे दिवसे प्रातरेकमन्नकालं च कृतं यूषं सेवेत । एवं कृतयूषस्त्रीनन्नकालानुपयुक्तो भवति । सप्तमे सायमेकमन्नकालम् अष्टमे द्वावन्नकालौ च मांसरसं सेवेत । एवं मांसरसस्त्रीनन्नकालान् सेवितो भवति । इति प्रधानशुद्धिशुद्धस्य पेयादीनां क्रमेण प्रत्येकमन्नकालत्रयसेवने क्रमः । एवं मध्यशुद्धिविशुद्धेन पेयादयः क्रमेण प्रत्येकमन्नकालद्वयमासेव्याः । तथा स्वल्पशुद्धिशुद्धेन पेयादयः क्रमेणैकमन्नकालमासेव्याः । हृद्याकारोऽप्याह—प्रधानशुद्धया आदर्दोषनिर्हरणलक्षणया मध्यशुद्धया अर्धादकहरणलक्षणया अवरशुद्धया प्रस्थलक्षणया शुद्धो यथासंख्यं त्रीन् द्वौ एकमन्नकालान् सेवेत पेयादीन् । तत्र प्रधानशुद्धो सप्तभिर्दिनैः प्रकृतिभोजनप्राप्तिः । तथा हि—त्रिष्वन्नकालेषु पेया त्रिष्वन्नकालेषु विलेपी त्रिष्वसंस्कृतो यूषास्त्रिषु संस्कृतश्च त्रिषु रस इति पञ्चदशान्नकालाः सप्तभिर्दिनैः प्राप्यन्ते । अष्टमे च दिने प्रकृतिभोजनम् । मध्यमे च शोधने दशभिरन्नकालैः षष्ठे दिने प्रकृतिभोजनप्राप्तिः । अधमे पञ्चभिरन्नकालैः तृतीयेऽहि प्रकृतिभोजनप्राप्तिरिति । स्नेहलवणादियोगः कृतत्वं तद्वाहित्यमकृतत्वम् । उक्तं च—

'स्नेहैः सस्नेहलवणैः शुण्ठीमरिचहिङ्गुभिः ।
संयोगः कृतता ज्ञेया तद्वाहित्यादसंस्कृया ॥

घृतेन दाडिमाम्लेन सैन्धवेन च संस्कृया ।
शुद्धिरुक्ता रसादीनां न तीक्ष्णैस्तत्र संस्कृया ॥'

इति । अथवा एवं योजना—पेयां विलेपीमकृतं कृतं च यूषम् अकृतं कृतं च रसं प्रधानमध्यावरशुद्धिशुद्धश्च नरो यथासंख्येन त्रीनन्नकालान् उभयमन्नकालमेकमन्नकालं पेयादीश्चतुरः क्रमेण सेवेत । एतदुक्तं भवति । प्रथमे दिवसे सायमेकमन्नकालं द्वितीये द्वावन्नकालौ पेयां सेवेत । तृतीये दिवसे द्वावन्नकालौ चतुर्थे दिवसे प्रथमं चान्नकालं विलेपीं सेवेत । चतुर्थेऽह्नि सायमन्नकालौ पञ्चमे द्वावन्नकालौ च अकृतयूषं सेवेत । षष्ठे एकमन्नकालम् अकृतं रसं तमेव द्वितीयमन्नकालं सप्तमे प्रातरन्नकालं कृतं रसं सेवेत । अकृतोऽल्पस्नेहलवणः । ततोऽन्यः कृतः । एवं द्वादशेऽन्नकालेऽतीते पुनरन्नगुणानां क्रमोपयोगेन सप्तसु दिनेषु गतेषु प्रकृतिभोजनं सेवेत । वमनदिनाच्चतुर्दशे पञ्चदशे वाह्नि प्रकृतिभोजनमित्यर्थः । तथा चागमः—अथैनं सायाह्ने अपरे वाह्नि सुरोदकपरिषिक्तं पुराणानां लोहितशालितण्डुलानां सुक्किलन्नां मण्डपूर्वां सुखोष्णां यवागूं पाययेद् अग्निबलमभिसमीक्ष्य । एवं द्वितीये तृतीये चान्नकाले । चतुर्थे त्वन्नकाले तथाविधानामेव शालीनां सुक्किलन्नां विलेपीमुष्णोदकद्वितीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेत् । एवं पञ्चमे षष्ठे चान्नकाले । सप्तमे त्वन्नकाले तथाविधानामेव शालीनां द्विःप्रसृतं सुस्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत् । एवमष्टमे नवमे चान्नकाले । दशमे त्वन्नकाले लावकपिञ्जलादीनामन्यतमस्य मांसस्य रसेन । दक्षलावणिकेन नातिसारवता भोजयेत् । उष्णोदकानुपानमन्नम् । एवमेकादशे द्वादशे चान्नकाले । अत ऊर्ध्वमन्नगुणान् क्रमेणोपयुञ्जानः सप्तरात्रेण प्रकृतिभोजनमागच्छेदिति । अत ऊर्ध्वं मांसरसभोजनादूर्ध्वं सप्तरात्रेण प्रकृतिभोजनमागच्छेत् । सप्तरात्रमन्नगुणान् क्रमेणोपयुञ्जानः खिन्नगुर्वादीन् गुणान् आनुपूर्व्या अभिवर्धयन्निति । केचिदेव व्याचक्षते—

अकृतं कृतयूषं च तनु संस्कारकं रसम् ।

इति विशेषलक्षणवचनाद् यूष एव कृतविशेषणः न रसः । स च सप्तमाष्टमनवमेष्वन्नकालेषु कदाचिदकृत. कल्पयितव्य. । परतश्च त्रिष्वन्नकालेषु रसनिर्देश । एवं पूर्वोक्तविरोधेन द्वादशैवान्नकालाः । यथासंख्यं वा अकृतं कृतयूषं चेति व्युत्क्रान्तश्चशब्द. । तनुरिति पौरोगवे कृत उक्तः । सूदशास्त्रं च —

'यश्च स्यादकृतो यूषो रसो यश्च कृतो भवेत् ।
कृतसन्नो लघुस्तत्र तनुरिष्टो यतः स हि ॥'

इति । प्रत्येकं कृताकृतत्वं हि संस्कृतासंस्कृतत्वम् । उपकल्पनीयेऽध्याये असंस्कृतो यूष उक्तः । रसश्च कृतः । उदकलावणिकनिर्देशात् तस्य हि लक्षणं तज्ज्ञै-रुक्तं —

यवनीमरिचाजाजीलवणैः संस्कृतस्तनुः ।
रसको हिङ्गुधान्याढ्यो भवेदुदकलावणः ॥

इति । कृतेन रसेनाकृतस्य रसस्याकृतेन यूषेण कृतस्य च यूषस्य ग्रहणम् । अन्यथा हि यूपरसशूलानां गुरु विद्याद् यथोत्तरमित्यागमाद् अकृतयूषानन्तरं कृतमांसरसोपदेशो दोषवान् स्यात् । स्निग्धवान्नकालेषु यूषस्य कृताकृतस्य स्निग्धवान्नकालेषु रसस्य च कृताकृतस्योपयोग इति । 'यच्च विशिष्टयोगशुद्धयपेक्षं यत्किञ्चिर्दिष्टं प्रागेव मांसरसादिकं तद् विकारावस्थापेक्षमिति । एवं त्रयोऽग्नकाल्याः प्रधानायां शुद्धौ तत्र कण्ठागतमग्निमान्द्यमिति । मध्यमावरयोरपि द्विश एकशः क्रमेणैव पेयादय इति अकृतयोर्यूषरसयोरुपयोगश्चरकेण नेष्टः । 'तथा हि', तद्ग्रन्थः पूर्वमुक्त'—, 'अथैनं सायाह्ने परे वाह्नि सुखोदकपरिषिक्तम्' इत्यारभ्य 'यावदत ऊर्ध्वमद्यगुणान् क्रमेणोपयुञ्जानः सप्तरात्रेण प्रकृतिभोजनमागच्छेदि'ति । अस्य ग्रन्थस्य पूर्वोक्तपक्षाविरोधेनैवं वा योजना । अतो वमनदिनादूर्ध्वं सप्तरात्रेण प्रकृतिभोजनमागच्छेत् । सप्तमे दिने प्रकृतिभोजनप्राप्तिरसंस्कृतयोर्यूषरसयोरस्वीकारेण इति । नन्वकृतयूषरसयोः परिग्रहापरिग्रहकृतः संशय इति । उच्यते । अग्न्यपेक्षत्वान्नायं दोषः । चोऽतिदुर्बलाग्नेस्तस्य शोधनेनाप्यग्नेर्मान्द्यात् तद्विवृद्धयर्थमकृतयोरपि रसयूषयोः प्रयोगः संस्कारकद्रव्यसंयोगादितरस्मिन् गुरुत्वम् । युक्तिसिद्धं मध्यमाग्निविषयं चक्रवचनमित्यदोषः । कृताकृतत्वं यूपरसयोरन्यत्राप्युक्तम् 'अथास्य सुखाम्बुना स्नातस्यापराह्णे शृङ्गिवेरसिद्धामुष्णां यवागूं दद्यात् । ततः प्रभृति भक्तकालेषु यवागूादिसंसर्गः तिस्रो यवाग्वः सशृङ्गिवेराः तिस्रो विलेप्यस्तीक्ष्णकृतयूषाणि त्रीणि कृतसूपाणि त्रय. कृता जाङ्गलरसाः' इति । सौश्रुते चोक्तम्—

"दनदोषप्रमाणेन स चाहारक्रमः स्मृतः ।
त्रीणि चापि प्रमाणानि प्रस्थोऽर्धाढकमाढकम् ॥
मन्येऽप्येवमतः पेया यवागूः सूपकल्पिता ।
द्वे चैवार्धाढके देये तिस्रश्चाप्याढके गते ॥
विलेपीमुचितां भक्ताच्चतुर्भागावशेषितां तथा ।
दद्यादुष्णेन विधिना स्निग्धाम्लविधमाविष्टिलम् ॥

धृतेन सैन्धवेनाथ पुनर्यूषेण बुद्धिमान् ।
द्वितीयमंशमुचितादकृताख्येन योजयेत् ॥
ततस्तु हृतसंज्ञेन हृद्येनेन्द्रियबोधिना ।
श्रीनशान् वितरेद् भोक्तुमातुरायेति तं यथा ॥
ततो यथोचितं भक्तं भोक्तुमस्मै विचक्षणः ।
लावैणहरिणादीना रसैर्दद्यात सुसंस्कृतैः ॥"

इति । अत्राप्यसंस्कृतरसंत्यागवचनं पूर्ववद् व्याख्येयम् । स्नेहपीतादीना सर्वेषां सामान्योऽयमत्रक्रमः । तत्र वमने भोजनमप्यनुज्ञे सुश्रुतः । यथा—

"ततोऽपराह्णे सुविरिक्तदेह-
मुष्णाभिरद्भि परिषिक्तगात्रम् ।
कुलत्थमुद्गादकिणाङ्गलीना
यूषै रसैश्चाप्युपभोजयेत्तु" ॥

इति ।"उद्रिक्तश्लेष्मविषयोऽयं विधिरित्यवगन्तव्यम् । उक्तं च—

'कृतेऽपि वमने श्लेष्मण्यनुत्क्लिष्टे चलात्मके ।
रूक्षैर्यूषै कुलत्थादेरन्नं भुञ्जीत मात्रया ॥'

इति । पेयादीनां साधितेन जलेन पाक । 'उक्तं च—

'मण्डप्रधाना सुस्विन्नतण्डुला विश्वसाधिताम् ।
पेयां पिबेत् सकृच्छ्रुद्धो द्विर्विरेकं विलेपिकाम् ॥'

'उचितानाचतुर्थांशतण्डुलास्तु विलेप्यका. ।
विलेप्यतण्डुलार्धांशे पेया कृष्या तयोर्जलम् ॥

चतुर्गुण पञ्चगुण तण्डुलाद् भाग्युच्यते ।
पेयादिसाधने वारि पक्वार्धांशावशेषितम् ॥
भाग निरपवादोऽय विधि' सर्वत्र युज्यते ।'

इति । प्रधानमध्यावरेति "ह्यापो संज्ञाच्छन्दसोः" इति ह्रस्व । श्रीनशकादान् इत्यत्यन्तसंयोगे द्वितीया ॥ २९ ॥

अधुना क्रमेण पेयादिक्रमेण यत् फलं भवति तद् दृष्टान्तमाह—

यथाणुरग्निस्तृणगोमयाद्यैः
सन्धुक्ष्यमाणो भवति क्रमेण।
महान् स्थिरः सर्वपचस्तथैव
शुद्धस्य पेयादिभिरन्तराग्निः ॥ ३० ॥

यथेत्यादि। यथा बाधोऽग्निरणुरल्पः सन् तृणगोमयकाष्ठादिभिः सूक्ष्मैः क्रमेण सन्धुक्ष्यमाणो दीप्यमानो महान् स्थिरः सर्वपचश्च क्रमेण भवति महान् भवति स्थिराश्चिरकालावस्थायी च भवति सर्वपचश्च भवति। सर्वं पचतीति सर्वपचः सर्वं च पक्तुं शक्नोति। तथैव तेनैव प्रकारेण शुद्धस्य नरस्य शोधनेनान्तराग्निरौदर्योऽग्निरणुः सन् पेयादिभिः क्रमेण महान् स्थिरः सर्वपचश्च भवति। सर्वग्रहणेन पथ्यापथ्यमुच्यते। अपथ्यमपि पचतीत्यर्थः। सर्वपच इति पचेरजन्तस्य सर्वशब्देन सह षष्ठीसमासः ॥ ३० ॥

नन्वु प्रधानमध्यावरशुद्धिशुद्धस्य कथं न दीयते, का प्रधाना शुद्धिः का मध्या का अवरेति। अतो द्वयोरपि वमनविरेचनयोर्योगसंख्या कृतदोषप्रमाणतः प्रकृतदोषदर्शनतश्च शुद्धित्रयलक्षणमुच्यते जघन्येत्यादिना ॥

जघन्यमध्यप्रवरे तु वेगा-
श्चत्वार इष्टा यमने पडष्टौ।
दशैव ते द्वित्रिगुणा विरेके
ग्रस्यस्तथा स्याद्द्वित्रिचतुर्गुणश्च ॥ ३१ ॥

जघन्ये अधमे मध्ये मध्यमे प्रवरे उत्तमे च यमने यथासङ्ख्यं चत्वारो वेगाः षड् वेगाः अष्टौ वेगा इष्टा आचार्यैः। विरेके तु जघन्ये त एव वेगा दश इष्टाः। मध्ये विरेके द्विगुणा दश विंशतिर्वेगा इष्टाः। प्रवरे विरेके त्रिगुणा दश त्रिंशद् वेगा इष्टा इति वमनविरेचनयोः वेगसङ्ख्यया सम्यग्योगलक्षणम्। वेगो हि स्वस्थानाद् दोषाणां प्रवर्तनविरमोपलक्षितः। तथा जघन्यमध्यप्रवरे विरेके यथासङ्ख्येन प्रस्थो द्विगुणः चतुर्गुणश्च स्यादिति सम्बन्धः। प्रस्थोऽत्रमे तथा भेदलक्षणं स्यादिति भावः। द्विगुणः प्रस्थः प्रस्थद्वयं मध्ये। चतुर्गुणः प्रस्थः चत्वारः प्रस्थाः प्रवरे लक्षणम्। तथेति

समुच्चये। न केवलं वेगमानं स्यादिति तुशब्दस्यार्थः। ननु वमनमतिक्रम्य विरेके परिमाणलक्षणं किमिति उच्यते। वमनाद् विरेचनस्य प्राधान्यख्यापनार्थं क्रमभङ्गः। विरेचनस्य पूर्वकर्मतया वमनं न विपरीतम्। प्रधानाङ्गतया हि गुणो वर्तते। वमनं विरेचनस्याङ्गम्। हीनगुणसम्पादनाय प्रधानमभिधत्ते। अतो गुणभावादप्रधानं वमनम्। विरेकः प्रधानः। उक्तं च—

'वमेर्विरेचनं मुख्यं विरेकाद् वस्तिरुत्तमः।
शिरावेधः समो वस्तेरधिकः कैश्चिदिष्यते॥'

इति ॥ ११ ॥

दोषपरिमाणतोऽपि विरेके भेदमाह—

पित्तावसानं वमनं विरेका-
दधं कफान्तं च विरेकमाहुः।

पित्तेत्यादि। अन्ये पुनराचार्याः पित्तावसानं वमनमुत्कृष्टमाहुः। विरेकांश्च प्रस्थपरिमाणेनार्धमाहुः। न विरेकवेगसङ्ख्यानादर्धमुक्तत्वाद् वमनवेगानाम् अपि तु प्रस्थपरिमाणादर्धं. तेन जघन्ये वमनेऽर्धप्रस्थं मध्ये प्रस्थः प्रवरे प्रस्थौ द्वाविति। तथा कफान्तं विरेकमाहुः कफान्ते विरेके प्रवरत्वम्। तथा चागमः—

'प्राप्तिश्च विट्पित्तकफानिलानां
सम्यग् विरिक्तस्य भवेत् क्रमेण।'

इति। हृदयकारोऽप्याह—पित्तेत्यादिना त्रिविधानां वमनविरेचनानामुत्तमं वदति। पित्तावसानं वमनं श्रेष्ठमिति शेषः। विरेकादर्धं द्विप्रस्थमस्थार्धप्रस्थाः उत्तममध्यमाधमे वमने कफान्तं च विरेकमाहुः। चशब्दोऽवधारणार्थः। श्लेष्मान्तसतो विरेकः श्रेष्ठः, नान्यः। उक्तं च—

'त्रीणि दोषप्रमाणानि प्रस्थोऽर्धाढकमाढकम्।
तत्रावरं प्रस्थमात्रं द्वे शेषे मध्यमोत्तमे॥
पुरीषबहुलः पूर्वः पित्तप्रायस्तु मध्यमः।
श्लेष्मान्त उत्तमो दृष्टो मुनिभिस्तत्त्वदर्शिभिः॥'

इति। अन्ये त्रयाणामपि वमनविरेकाणामुत्तमत्वं वर्णयन्ति। तथा हि—

'हीनमध्योत्तमे दोषे हीनमध्योत्तमैर्हृते।
कफान्तत्वं विरेके स्याद् वमने पित्तदर्शनम्॥'

इति ॥

हृतस्य दोषस्य प्रमाणप्रकारमाह—

द्वित्रान्सविदकानपनीय वेगान्
मेयं विरेके वमने तु पीतम् ॥ २२ ॥

द्वित्रानिति । द्वौ वा त्रयो वा द्वित्राः 'सङ्ख्ययाव्यय' इति बहुव्रीहेः 'बहुव्रीहौ सङ्ख्येये डच्' इति डच् । सह विशा पुरीषेण वर्तन्त इति सविदकाः । तत्र विरेके द्वित्रान् सपुरीषान् वेगानपनीय मुक्त्वान्यन्मेयं मातव्यम् । प्रस्थादिना दोषस्य मातुमिष्टत्वाद् वमने पुनः यत् परिमाणं पीतमौषधं तदपनीय त्यक्त्वा मेयं दोषवेगाः मातव्याः इत्यर्थः । प्रतिनियतप्रमाणयोः पित्तश्लेष्मणोः प्रकोपनिमित्तं बहुत्वं तस्यापि निर्हरणे नियमः कृत इति ॥ २२ ॥

अथैनं वामितं भूयः स्नेहस्वेदोपपादितम् ।
श्लेष्मकाले गते ज्ञात्वा कोष्ठं सम्यग्विरेचयेत् ॥ २३ ॥

अथेत्यादि । आनन्तर्यमङ्गल्योरथशब्दः । अथ वमनादनन्तरं कृतमङ्गलमेनं नरं वामितं भूयः पुनरपि स्नेहस्वेदाभ्यामुपपादितं पुनरपि विरेकार्थत्वेन स्निग्धं सम्यक् स्नेहनादूर्ध्वं निवृत्तस्नेहपानं त्रिरात्रं स्वेदमाचरन्तमनन्तरं सम्यग्विरेचयेत् । आगमो हि—

'स्नेहात् प्रस्कन्दनं जन्तुस्त्रिरात्रोपरतः पिबेत् ।'

इति । प्रस्कन्दनं विरेचनम् । अस्मिन् शास्त्रेऽप्युक्तम्—

"स्निग्धद्रवोष्णघन्वोत्थरसभुक् स्वेदमाचरन् ।
स्निग्धस्त्र्यहं स्थित कुर्याद् विरेकं..... ॥"

इति । पक्षाद् विरेको वामित इति च । वामित इत्यनेन नत्वकृतवमनं विरेचयेद् इति सिध्यति । कदा विरेचनं पाययेत्— श्लेष्मकाले गते प्रथमे महरेऽतिक्रान्ते सति द्वितीयप्रहरमध्ये विरेचनं पेयम् । अथ कथमत्र हस्वमात्र महरो गृहीत इति ज्ञायते । आगमादिति ब्रूमः ॥

'पूर्वाह्णे वमनं पेयं प्रातर्देयं विरेचनम् ।
मध्याह्ने तु निरूहः स्यादपराह्णेऽनुवासनम् ॥'

इति । पूर्वाह्णशब्दः प्रथमयामवचनः । प्रात शब्दो द्वितीययामवचनः । यामौ द्विप्रकारौ - यथोक्तं पादोनाश्रतस्र इति । सार्धसप्तनाडिकावसाने विरेचनं देयमित्येके । यथा—

'प्रथमेऽपगते यामे विरेकस्य विधिर्हितः ।
वमनं प्रथमे यामे मध्याह्ने तु निरूहणम् ॥'

इति । अत्र यामद्वयस्याविशेषितत्वादयमर्थः सिध्यति । अल्पकफस्य पित्तप्रधानस्य द्वितीयप्रहरे विरेकः । बहुकफस्य 'प्रथमे महति यामे गते विरेक इति । श्लेष्मकाले दिनप्रथमत्रिभागे गत इति हाटकः । ननु कस्य वमनानन्तरं विरेचनं, विरेचनादनन्तरं वस्तिरिति विधीयते । उच्यते । यादृच्छिकस्वस्थस्य कुष्ठादिषु व्याधिषु क्रमात् पञ्चकर्मविधिः । भिषक्परिपालितस्य कालकृतदोषोद्रेकशान्त्यर्थमधमशोधनविधानमिति ज्ञेयम् । किं कृत्वा— कोष्ठं मृदुमध्यक्रूरलक्षणमवगम्य । सम्यगित्यस्य काक्षिवदन्वयः । मृद्वादिभेदेन कोष्ठं सम्यग् ज्ञात्वा यथार्हेण भेषजेन सम्यग् विरेचयेदिति ॥ ३३ ॥

कोष्ठं ज्ञातुमुपक्रमः । तत्र ज्ञायते त्रिविधः कोष्ठः; कोष्ठशब्देति कोष्ठज्ञानार्थं कोष्ठानुरूपौषधज्ञानार्थं चाह —

बहुपित्तो मृदुः कोष्ठः क्षीरेणापि विरेच्यते ।
प्रभूतमारुतः क्रूरः कृच्छ्राच्छ्यामादिकैरपि ॥ ३४ ॥

बहुपित्त इत्यादि । पित्तस्य विरेचनसाध्यत्वातिशयख्यापनार्थं प्रथमं पित्तकोष्ठो निरूप्यते । जन्मकाले पश्चाद्वा योऽधिकपित्तः कोष्ठः स मृदुर्भवति । स च क्षीरेणापि विरेच्यते । अपिशब्दः समुच्चये । द्राक्षारम्भाघादिभिश्च मृदुभिर्द्रव्यैरित्यर्थः । प्रभूतमारुतो यः कोष्ठः स क्रूरो भवति । स च कोष्ठः श्यामादिकैः कृच्छ्रेण कथञ्चिदेव विरेच्यते । आदिशब्देन समुद्रैरण्डकइक्षुकम्पिल्यकसुधाक्षीरादयो गृह्यन्ते । अपिशब्दाद् द्राक्षारम्भाघादिभिर्न विरिच्यत एव । पित्तवातकोष्ठयोः कफसम्बन्धे मृदुत्वक्रूरत्वयोः किञ्चिद्धानिः । उक्तं च—

'कोष्ठस्य क्रूरता मन्दा कफयुक्ते नभस्वति ।
मृदुतापि तथा ज्ञेया पित्ते कफसमन्विते ॥
त्रिभिर्दोषैः समुद्दिष्टैः समः कोष्ठः कफेन च ।'

इति । 'स्यादत्र क्रूरकोष्ठस्य च वमनं विरेचनं चाशस्तं धातुबाधभयात् । तथा हि — वमनेन कफोपचयात् सौम्यगुणहान्या पवनवृद्धिः विरेचनस्याप्यक्रौर्यकरणात् अत्र विधीयते — स्नेहस्वेदोपपादनाद् वातशान्तेरनाबाधकरं वमनं

वमनान्ते च पुन. स्नेहस्वेदोपदेशाच्च । एव विरेचनेऽपि द्रष्टव्यम् । तथा चाह —

"कर्मणा वमनादीनामन्तरे त्वन्तरे पुन ।
स्नेहस्वेदौ प्रयुञ्जीत स्नेहमन्ते बलाय च ॥"

इति ॥ २४ ॥

कषायमधुरैः पित्ते विरेकः कटुकैः कफे ।
स्निग्धोष्णलवणैर्वायौ

कषायमधुरैरारग्वधादिभिः पित्ते विरेक । कटुकैः कफे (विरेक)। स्निग्धोष्णलवणैरेरण्डतैलादिभिर्वायौ विरेक ॥

अप्रवृत्तौ तु पाययेत् ॥ २५ ॥

उष्णाम्बु स्वेदयेदस्य पाणितापेन चोदरम् ।

अप्रवृत्तिरौषधप्रवृत्ति । नाभीपदर्थे । वेगानामौषधप्रवृत्तौ सत्यां भेषजोत्तरकालं वा उष्णाम्बु पाययेद् वैद्य. । उष्णाम्बुपानादौषधस्य चलनाद् वेगप्रवृत्तिः पाको वा भवति । अपवृत्ते तु इति वा पाठ । अस्य च पीतौषधस्य जठर पाणितापेन स्वेदयेच्च परिचारक ॥

उत्थानेऽल्पे दिने तस्मिन्युक्त्वाऽन्येद्युः पुनः पिबेत् ॥ २६ ॥

उत्थानं वेगप्रवृत्ति । उत्थाने अल्पे स्तोकाया प्रवृत्तौ । अनन्तरं तस्मिन् दिवसे भुक्त्वान्नम् अन्येद्युरन्यस्मिन्नहनि द्वितीयेऽहनि पुनर्विरेचनमौषध पिबेत् । महतसमस्तदोषस्य भोजनानुवादेनैतद् गमयति । एकेन द्वाभ्यां त्रिभिश्चतुर्भिर्वा दिवसैर्दोषबलापेक्षया विरेचनं समापनीयमिति । उक्त च सारसुश्रुतौ—

'शनैर्विरेचन कार्यमेकद्वित्रिचतुर्दिने ।
भोजन तु यथासात्म्य तत्राकर्मसनापनात् ॥
समाप्ते कर्मणि पुन पेयादिक्रम इष्यताम् ।'

इति ॥ २६ ॥

अदग्धस्नेहकोष्ठस्तु पिबेद्ग्धं दशाहतः ।
क्षीणोऽप्युपस्कृतनु स्नेहस्वेदैर्विरेचनम् ॥ २७ ॥
यौगिकं सम्यगालोच्य सारत पूर्वमतिक्रमम् ।
उत्क्लिष्टपक्वदोषस्तु श्लेष्मपित्तयो ॥ २८ ॥

कण्ड्वर्तिदाहः पिटका पीनसो वातनिग्रहः ।
अंयोगलक्षणं योगो वैपरीत्ये यथोदितात् ॥ २९ ॥

स्नेहनं स्नेह' । अदृदस्नेह कोष्ठो यस्य सोऽदृदस्नेहकोष्ठ । असम्यक् स्निग्धकोष्ठ इत्यर्थ । स मूयोऽपि स्नेहस्वेदैरुपपादितनु सस्कृतशरीरो दशाहादूर्ध्वं सप्ताह स्नेहन कृत्वा यह स्वेद विधाय पश्चाद् योगिक विरेचन पिबेत् । सम्यगालोच्य यथावनिरूप्य । सम्यगालोचन पूर्वायोगकारणत्यागार्थम् । स्मरन् पूर्वमतिक्रमं "भैषज्यमात्रा मन्त्राभिमन्त्रिता" इत्यादिक, तथा 'अभवृत्तौ तु पायसेदुष्णाम्बिव'त्यादिक च स्मरन् । हृत्कुक्ष्यशुद्ध्यादि अयोगलक्षणम् । यथोदितात् वैपरीत्ये यथोक्ताद् वैपरीत्ये । हृत्कुक्षिशुद्धिरित्यादिको योगो योगलक्षणम् ॥ २७—२९ ॥

विट्पित्तकफवातेषु नि'सृतेषु क्रमात्स्रवेत् ।
निःश्लेष्मपित्तमुदकं श्वेतं कृष्ण सलोहितम् ॥ ४० ॥

मांसधावनतुल्यं वा मेदःखण्डाभमेव वा ।
गुदनिःसरण तृष्णा भ्रमो नैतप्रवेशनम् ॥ ४१ ॥

भवन्त्यतिविरिक्तस्य तथातिवमनान्मया ।

अतिविरिक्तस्य विडादिषु क्रमादि सतेषु जल स्रवेत् । औषधशब्द-लोपोऽत्र । विट्पित्तौषधकफवातेषु सम्यग् योगलक्षणोद्दिष्टेषु निस्तृतेषु । क्रमात् स्थानानुपूर्व्या । निःश्लेष्मपित्त तथा श्वेत किञ्चित् कृष्ण सलोहितमीषद्रक्तम् । अथवा मांसधावनतुल्य मासधावन मासप्रक्षालनजल तत्सदृशम् । अथवा मेदः खण्डाभमुदक स्रवेत् । खण्डं शकलम् तथा गुदनिस्सरणादयोऽतिवमनान्मया क्षामतादयो भवन्ति ॥

सम्यग्विरिक्तमेत च वमनोक्तेन योजयेत् ॥४२॥

धूमवर्ज्येन विधिना

एनं च सम्यग्विरिक्त वमनविधिनेन विधिना स्नेहाचारेण विधूमेनोपपादयेत् 'धूमत्रयस्यान्यतमम्' इति विहितस्यापवाद धूमवर्ज्येनेति ॥

ततो वमितवानिव ।
क्रमेणान्नानि भुञ्जानो भजेत् प्रकृतिभोजनम् ॥ ४३ ॥

ततोऽनन्तरं सम्यक् विरिक्तः क्रमेण पूर्वोक्तेन रक्तशाल्यन्वसंहितपेया-दीन्यन्नानि । भुञ्जानोऽश्नन् । पेयादिक्रमगुणोपयोगक्रमेण भुञ्जान इति यावत् । प्रकृतिभोजनं भजेत् ॥ ४३ ॥

पीतभेषजस्योपवासविषयं दर्शयति—

मन्दवह्निमसंशुद्धमक्षामं दोषदुर्बलम् ।
अदृष्टजीर्णलिङ्गं च लङ्घयेत्पीतभेषजम् ॥ ४४ ॥

मन्दत्यादि । वमनाय विरेचनाय वा पीतभेषजान् मन्दवह्न्यादीन् पञ्च लङ्घयेद् अजीर्णलिङ्गात् । असंशुद्धम् अप्रवृत्तदोषम् । ईषदर्थे विपक्षे वा नञ् । दोषदुर्बलं दोषैर्दुष्टैर्हीनबलम् । अदृष्ट जीर्णलिङ्ग पीतभेषजस्य यस्य तम् । अदृष्टजीर्णौषधलक्षणम् एतांस्त्यदहो लङ्घयेदित्यन्ये ॥ ४४ ॥

इदानीं लङ्घनस्य फलमाह—

स्नेहस्वेदौपधोत्क्लेशसङ्गैरिति न बाध्यते ।

स्नेहेत्यादि । इत्येव लङ्घिते सति स्नेहस्वेदौपधोत्क्लेशसङ्गैः न बाध्यते न पीड्यते आतुर । उत्क्लेशाश्च सङ्गाश्च उत्क्लेशसङ्गा स्नेहस्वेदौषधानामुत्क्लेशसङ्गा स्नेहस्वेदौषधोत्क्लेशसङ्गा ते । हृद्याकारस्त्वाह—स्नेहनेन स्वेदनेन औषधेन च य उत्क्लेशो दोषस्य तस्योत्क्लिष्टस्य दोषस्य सङ्गोऽप्रवृत्तिः ते. स्नेहादिभिः सङ्गान्तैर्यो दोषस्तेन न बाध्यते । इतिशब्दो हेत्वर्थः । लङ्घने कृते उत्क्लेशसङ्गदोषो न स्यादित्यर्थः, इति ॥

प्रसङ्गेन यथोक्तस्य पेयादिक्रमस्य विषयं दर्शयति—

संशोधनास्रविस्रावस्नेहयोजनलङ्घनैः ॥ ४५ ॥
यात्यग्निर्मन्दतां तस्मात् क्रमं पेयादिमाचरेत् ।

संशोधनेत्यादि । संशोधनादिभिर्यतोऽग्निर्मन्दतां याति तस्माद्धेतोः पेयादिकं क्रममाचरेत् । संशोधनं सम्यक् शुद्धि । अस्रविस्रावो रक्तमोक्षः । स्नेहयोजनं स्नेहोपयोग । लङ्घनस्यामादिपाचनसमर्थस्यातिप्रयोगे वह्निनाशकरत्वं तत्रापि पेयादिक्रमो विधेय । ननु शुद्धयादिभिरग्निर्मन्दीक्रियते । वक्ष्यति च—'बुद्धिप्रसाद'मित्यादिना पेयादिभिरग्निं दीप्तं संशोधन करोतीति । तस्मिन् वचसी

परस्परं व्याघ्नाते । अत्रोच्यते । कालभेदाददोषः । संशोधने क्रियमाणेऽग्निमान्द्यं भवति । कृते च संशोधने पेयादिक्रममासेवमानस्याग्निर्दीप्तिरिति न कश्चिदत्र व्याघातः । हाढ्रकोऽप्याह — 'कालभेदाददोषः । संशोधनानन्तरमेवाग्निमान्द्यं स्यात् । पेयादिक्रममनन्तरमासेवमानस्याग्निर्दीप्तिरि'ति । अथवा 'संशोधनादीना चायथाप्रवृत्तानामग्निनाशकरत्वं सम्यक्प्रवृत्तानामग्निकरत्वमि'ति केचित् ॥

सुताल्पपित्तश्लेष्माणं मद्यपं वातपैत्तिकम् ॥ ४६ ॥
पेयां न पाययेत्तेषां तर्पणादिक्रमो हितः ।'

सुतेत्यादि । सुतौ पतितावल्पौ पित्तश्लेष्माणौ यस्य स एवम् । संशोधने प्रवृत्ते यस्य पित्तश्लेष्माणावल्पौ सुतौ देहेऽवस्थितावित्यर्थः । यश्च स्वभावेन मद्यपः तथा यश्च वातपैत्तिको वातपित्तप्रकृतिः त्रीनप्येतान् पेयां न पाययेत् । तर्ह्येषां किं कार्यमित्याह — तेषां तर्पणादि क्रमो हितः पेयास्थाने तर्पणादय इत्यर्थः । यथाह —

'लाजसक्तून् पिबेत् पूर्वं ततो यूषान्नभोजनम् ।
पश्चान्मांसरसान्नं स्यात् तर्पणादिरयं क्रमः ॥'

इति । तर्पणा लाजसक्तवः । सुताल्पपित्तादिषु पेयाविलेप्योरेव प्रतिषेधः । अकृतानां कृतानां च यूषाणां मासरसानामुपयोगः शस्यते इत्यभिप्रायः ॥

ननु विरेचनस्येव वमनस्य कस्मात् पाको न प्रतीक्ष्यत इत्याह —

अपक्वं वमनं दोषान् पच्यमानं विरेचनम् ॥ ४७ ॥
निर्हरेद्वमनस्यातः पाकं न प्रतिपालयेत् ।

अपक्वमित्यादि । वमनविरेचनयोः सर्वविधिसाम्येऽपि प्रवृत्तिभेदोऽस्ति । कथं, वमनमपक्वं सद् दोषान् निर्हरेत् । विरेचनं तु पच्यमानं दोषान् निर्हरेत् । अतो वमनस्य पाकं न प्रतिपालयेत् । औषधपानसमनन्तरमेव वमनप्रवृत्तौ यत्नो विधेय इत्यर्थः । अयोगे शीघ्रमेव प्रतिक्रियां कुर्यात् ॥

विरेचने किंचिद् विशेषमाह —

दुर्बलो बहुदोषश्च दोषपाकेन यः स्वयम् ॥ ४८ ॥
विरिच्यते भेदनीयैर्भोज्यैस्तमुपपादयेत् ।
दुर्बलः शोणितः पूर्वमल्पदोषः कृशो नरः ॥ ४९ ॥

दुर्बल इत्यादि । दुर्बलो यो नरो बहुदोषश्च दोषपाकेन हेतुना कालेन द्रवीभूते दोषे स्वयमौषधमन्तरेण विरिच्यते भिद्यते । न तस्मै विरेचनमौषध देय / नापि स्तम्भनम् । तर्हि तत्र किं कार्यमित्याह – त नरं भेदनीयैर्भोज्यै शकृद्भेदिभिराहारैर्वाम्लुकादिभि मयोजयेत् । हट्टकोऽप्याह – यो नरो दौर्बल्यादियुक्त स (स्न)ग्ध विरेच्य । न च तस्य दोषो बहुत्वान्निर्गच्छन् स्तम्भनीय । त भेदनीयैर्वास्तुकादिभि योजयेदिति ॥ ४९ ॥

अपरिज्ञातकोष्ठश्च पिबेन्मृद्वल्पमौषधम् ।

तथा दुर्बल सन् पूर्व शुद्धस्तथा अल्पदोषस्तथाकृश तथा मृद्वादिविशेषेणापरिज्ञातकोष्ठ । एते दुर्बलादय पञ्च पुरुषा मृदुगुणमल्पमात्र च विरेचनौषध पिबेयु । औषध शोधनौषधमिति हट्टाकारः ॥

तदेव शस्तमित्युपपादयति वरमित्यर्धेन—

वर तदसकृत्पीतमन्यथा संशयावहम् ॥ ५० ॥

यतस्तदौषध प्रयोजनापेक्षया असकृदनेकवार पुन पुन पीत वरम् । नत्वन्यथा । बहुतीक्ष्णमौषध सकृच्च पीत संशयावहं प्राणसन्देहकारि अवरम् अतियोगभयात् । हट्टाकारोऽप्याह— असकृत् पीत तदौषध वरम् अन्यथा तीक्ष्ण बहुमात्र पीत सशयावह प्राणसन्देहकारि इति ॥ ५०॥

हरेद्धहूञ्चलान्दोषानल्पानल्पान्पुनः पुनः ।
दुर्बलस्य मृदुद्रव्यैरल्पान्संशमयेत्तु तान् ॥ ५१ ॥
क्लेशयन्ति चिरं ते हि हन्युर्वनमनिर्हृताः ।

हरेदित्यादि । तथा दुर्बलस्य पुरुषस्य चलान् शिथिलान् दोषान् बहून् प्रभूतान् सतोऽल्पानल्पान् स्तोक स्तोक मृदुभिर्द्रव्यैरारग्वधादिभिर्हरेत् । पुन पुन पीत मृद्वौषध चलान् बहून् दोषानल्पानल्पान् स्तोक स्तोक हरेत् । एव बलहानिं विना दोषनिर्हरण कृत स्यात् । दुर्बलस्येत्युभयत्रापि च सबध्यते । दुर्बलस्याल्पान् समस्तान् दोषाश्चलाननिर्हृतान् शमनै सम्यक् शमयेदेव । तुरवधारणे । नतु बहवो दोषा कस्मान्न शाम्यन्त इत्य ह हि यस्माद् बहव श्लिष्टा दोषा अनिर्हृता सन्तोऽचिरकालमन दुर्बलस्यातु व्याधिभि क्लेशयन्ति पीडयन्ति । हन्युर्वा । अनिर्हृता वा मारयेयु । तस्मादेव बलहानि विना दोषनिर्हरण कार्यमेव स्यात् ॥

मन्दाग्ने. क्रूरकोष्ठस्य च सम्यग् विरेकोपायमाह —

मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैर्घृतैः ॥ ५२ ॥
सन्धुक्षितामिं विजितकफवातं च शोधयेत् ।

मन्दाग्निमित्यादि । कफवृद्ध्या वह्नेर्मान्द्यं वातवृद्ध्या जठरस्य क्रौर्यम्, तदुभयमपि परिहर्तव्यमिति प्रथमचकारार्थः । मन्दाग्निना पीतमौषधं पाकमगच्छद् वमनाय, क्रूरकोष्ठेन पीतं शीघ्रपाकगमनान्न विरेकाय स्यादिति । तयोः परिहारार्थमाह—सक्षारलवणैरिति । क्षारशब्देन वातहरद्रव्याणां भस्मोच्यते । लवणमिति सैन्धवम् । अन्येषां कफकरत्वात् । क्षारलवणसिद्धैर्घृतैः । जातौ बहुवचनम् । कथमवगम्यत इति चेत् तथा प्रयोगदर्शनात्—

'पाटलीचिरिबिल्वादि क्षारसैन्धवसाधितम् ।
घृतं सन्दीपनं वह्नेः कफजिद् वातनाशनम् ॥'

इति । विजितकफवातमिति क्षारलवणसिद्धस्य घृतस्य संस्कारानुवर्तकत्वाव कफजित्वं युक्तम् । द्वितीयेन चकारेण कफवातहराणां दीपनानां प्रयोगः समुच्चीयते । उक्तमेवार्थं स्पष्टयन्नाह—'मन्दाग्निं क्रूरकोष्ठं च सक्षारलवणैर्घृतैः यथासंख्यमुद्दीपितानलं विजितकफवातं च शोधयेद्' इति ॥ अथवा 'मन्दाग्निं पुरुषं शोधनप्रस्तावे सक्षारैर्घृतैर्यथोक्तैः सन्धुक्षितामिं विजितकफं च कृत्वा शोधयेत् । तथा क्रूरकोष्ठं सलवणैर्घृतैः सन्धुक्षिताग्निं विजितवातं च कृत्वा शोधयेद्' इतीन्दुः ॥

रूक्षबह्वनिलक्रूरकोष्ठव्यायामशीलिनाम् ॥ ५३ ॥
दीप्ताग्नीनां च भैषज्यमविरेच्यैव जीर्यति ।
स्नेह्यो वस्ति पुरा दद्यात्ततः स्निग्धं विरेचनम् ॥ ५४ ॥
शक्तिं हित्वा वा किञ्चित्तीक्ष्णाभिः फलवर्तिभिः ।

रूक्षेत्यादि । रूक्षादीनां पञ्चानां पीतं भैषज्यम् अविरेच्य विरेचनमकृत्वैव जीर्यति जरां याति परिणमति । रूक्षबह्वनिलयोः को भेद इति चेत् । उच्यते । ऊरुस्तम्भादिषु स्निग्धत्वेऽपि बह्वनिलदर्शनादेवमुक्तिरुपपद्यते । तेभ्यो रूक्षादिभ्यो वाताधिक्यात् सञ्जयाय पूर्वं वस्तिं दद्यात् । अनन्तरं स्निग्धमेरण्डतैलबिन्दुघृतादिकं विरेचनं याजयेत् । अथवा बलमनर्हं पुरुषे फलवर्तिभिस्तीक्ष्णाभिः

पुरीषं किण्विदरूपं निर्हृत्य निस्सार्य स्निग्धं विरेचनं ददात ॥

कस्माद् वस्तिभिः फलवर्तिभिर्वा प्रवृत्तं स्निग्धं विरेचनं ददात इत्याह —

प्रवृत्तं हि मलं स्निग्धो विरेको निर्हरत्सुखम् ॥ ५५ ॥

प्रवृत्तमित्यादि । एवं वस्तिभिः फलवर्तिभिर्वा प्रवृत्तं किञ्चित् पतितं तन्तुं मलं स्निग्धो विरेकः सुखमवक्लेदेन यस्मान्निर्हरेत् ॥ ५५ ॥

विषाभिघातपिटिकाकुष्ठौदरविसर्पिणः ।
कामिलापाण्डुमेहार्तानातिस्निग्धान्विरेचयेत् ॥ ५६ ॥
सर्वान्स्नेहविरेकेश्च रूक्षस्तु स्नेहभावितान् ।

विषेत्यादि । नातिशब्दावत्रापदर्थौ । नातिशीतगुरुस्निग्धमिदमत्र यथा ; अथवा नञीपदर्थे । विषादियुक्तान् कामिलार्तांश्च ईषत् स्निग्धान् विशोधयेत् । सर्वानेतान् सर्वान् विषादियुक्तान् स्नेहविरेकैरेव शोधयेत् । स्नेहभावितान् स्नेहभावितानेतान् पुरुषान् रूक्षैर्विरेकैः शोधयेत् । येषां सञ्चितः स्नेहसंस्कारो देहे विद्यते ते स्नेहभाविताः । हृद्याकारोऽप्याह — विषार्तान् पुनः, रूक्षगुणैरेव विरेचनौषधैः शोधयेदिति ।

एतान् सर्वान् विषार्तानकृतस्नेहगान् सतः ।
शोधनद्रव्यसंसिद्धैः स्नेहैः साधु विशोधयेत् ॥
एतानेव बहुस्नेहसेवान् रूक्षैर्विशोधयेत् ।

इति ।

कर्मणां चमनादीनां पुनरप्यन्तरेऽन्तरे ॥ ५७ ॥
स्नेहस्वेदौ प्रयुञ्जीत स्नेहमन्ते बलाय च ।

कर्मणामित्यादि । आदिशब्देन विरेचनास्थापनानुवासननस्यानां ग्रहणम् । चमनादीनां कर्मणामन्तरेऽन्तरे मध्ये मध्ये पुनरपि भूयोऽपि एकस्मिन्नेकस्मिन् समाप्ते पुनरन्यारम्भे स्नेहस्वेदौ प्रयुञ्जीत । अन्ते च एकैकस्य समाप्ते सर्वेषामन्ते च बलाय शरीरस्य बलाधानार्थं स्नेहमुपयुञ्जीत । आदौ स्नेहस्वेदौ ततो वमनं पुनः स्नेहस्वेदौ ततो विरेचनं पुनः स्नेहस्वेदौ ततोऽनुवासनं पुनः स्नेहस्वेदौ ततो निरूहणं पुनः स्नेहस्वेदौ वा शिरोविरेचनमिति यद् । अन्तरान्तरा इति वा पाठः ॥

किमर्थमेव स्नेहस्वेदौ शुभौ इत्याह—

'ऊषादिभिर्यथा स्विन्नाद्ध्रियते वाससो मलः ॥ ५८ ॥
स्नेहस्वेदैस्तथोत्क्लेश्य वपुषः शोधनैर्मलः ।

ऊषादिभिरित्यादि । ऊषा क्षारमृत्तिका । आदिशब्देन नारिकेरवल्कवन्दाकादीनां ग्रहणं गृह्यते । यथा वाससो दग्धात् स्विन्नात् मल ऊषादिभिरुत्क्लेश्य पतनोन्मुख कृत्वा जलादिना ह्रियते तद्वदेव वपुषो देहादपि मल[1] स्नेहस्वेदादिभिरुत्क्लेश्य वमनादिभिर्निर्ह्रियत इति सबन्ध ॥

अनु स्नेहस्वेदावतरेणापि कर्मा मलः शोधनेन शाश्वत इत्याह—

स्नेहस्वेदावनभ्यस्य कुर्यात्संशोधनं तु यः ॥ ५९ ॥
दारुशुष्कमिवानाम्ये शरीरं तस्य शीर्यते ।

स्नेहस्वेदावित्यादि । यो नर स्नेहस्वेदावनभ्यस्याशीलयित्वा सशोधन कुर्यात् तस्य शरीर शीर्यते नश्यति । यथा शुष्क दारु काष्ठमानाम्ये आनमने शीर्यते तद्वदिति स्नेहस्वेदयो कर्मसु करणीयत्व दृढयति दृष्टान्तेन । दीर्यते इति वा पाठ । भिद्यत इत्यर्थ ॥ ५९ ॥

साम्प्रतमुपसहरन् सद्वृत्ते फलमाह—

बुद्धिप्रसाद बलमिन्द्रियाणां
धातुस्थिरत्व ज्वलनस्य दीप्तिम् ।
चिराच्च पाकं वयसः करोति
संशोधनं सम्यगुपास्यमानम् ॥ ६० ॥

बुद्धीत्यादि संशोधन सम्यक् शोधनम् । साधु कृत्वा उपास्यमान सेव्यमान क्रियमाणमित्यर्थः । बुद्धिप्रसादादिन् पञ्च करोति वयसो यौवनादेरपाक्रमः ॥ ६१ ॥

इति श्रीदासपण्डितविरचितायां हृदयबोधिकायामष्टादशोऽध्याय ।

---

१ 'मलो हि देहादुत्क्लेश्य ह्रियते वाससो यथा इति मुद्रितादर्शहृदयपाठ ।
ऊषादिभिर्यथोत्क्लेश्य ह्रियते वाससा मल ।
तथैव वपुष स्नेहस्विदमाषतिलादिभि ॥
इति ताडपत्रादर्शहृदयपाठ अयमेव पाठ चक्रेऽपि ।

अथैकोनविंशोऽध्यायः ।

मलहरणार्थं पूर्वोऽध्याय उक्तः । वस्तिना हि सम्यो निर्हियत इति वमनविरेचनविधेरनन्तरं वस्तिविधेरुपक्रमो युक्त इत्यतः— अथात इत्यादि । अथवा वाते कफविनाशायोपदिष्टे पित्तविनाशनाय च विरेचने वातनाशाय वस्तेः प्रसङ्गात् तस्य परिज्ञानार्थमध्याय आरभ्यते । पाठ्यकारोऽप्याह—

'वमनं कफशान्त्यर्थं रेचनं पित्तशान्तये ।
तस्माद् वातस्य शान्त्यर्थमिदानीं वस्तिरिष्यते ॥' इति

अथवा 'तेभ्यो वस्तिं पुरा दद्यात्' इत्युक्तम् । अतो वास्तेमाह —

अथाऽतो वस्तिविधिमध्यायं व्याख्यास्यामः ।

अथात इत्यादि । वस्तिना दीयत इति वस्तिः तस्य विधिः । 'वस्तिना दीयते वस्तिं वा पूर्वमस्येति[1] तनोऽपि वस्ति इति मद्रदे । हृद्याकारोऽप्याह—

'वस्तेः पुरस्तात् प्रस्तावात् तस्याद्य विधिरुच्यते ।
वस्तिना मूत्रपूर्णेन मृगाणां य उपक्रमः ॥
स वस्तिरिति तद्विद्भिस्तात्कर्म्यात् तद्विरोच्यते ।
प्रयुक्तमात्र एवैष वस्ति यातीत्यतोऽपि वा ॥'

इति ॥

वातोल्बणेषु दोषेषु याते वा वस्तिरिष्यते ।
उपक्रमाणां सर्वेषा सोऽग्रणीस्त्रिविधश्च सः ॥ १ ॥
निरूहोऽन्वासनो वस्तिरुत्तरः ।

वातेत्यादि । वात उल्बणोऽधिको येषां दोषाणां त एवम् । वातोल्बणेषु वाताधिकेषु दोषेषु केवले वा वायौ वस्तिरिष्यते । आचार्यैरिति शेषः । अथवा याते वस्तिरिष्यते वातोल्बणेषु दोषेषु वा । वाशब्दस्य वातोल्बणेष्वित्यत्रैव सम्बन्धः न वात इत्यस्मिन् पदे । वाशब्दयुक्तात् पक्षात् तदयुक्तः पक्षो मुख्य इति न्यायादेव योजना । अन्यथा चेद् वाते वस्तेरप्राधान्यं स्यात् । अथवा वातोल्बणेषु दोषेषु वस्तिरिष्यते याते वा वाते इव । यथा याते वस्तिरिष्यते तद्वद् वातोल्बणेषु दोषेष्वपीत्यर्थः । वाशब्द उपमानार्थे । "वा विकल्पोपमानयो" इति । उपक्रमाणा वमनादीना चिकित्सिताना सर्वेषां मध्ये

---

१. 'पूर्वमन्वति' इति मुद्रितसङ्घदपाठः ।

अग्रणीः प्रधानः, शीघ्र बृंहणादिकारित्वाद् विकृतानिलोच्छेदित्वाच्च । अथवा उपक्रमाणामिति वातहराणां प्रयोगाणां श्रेष्ठ इत्यभिप्राय । स च वस्तिरिति कारः । तदेव त्रैविध्यमाह—निरूहः अन्वासन उत्तरवस्तिरिति । निरूह इति । 'वह प्रापणे' निर्पूर्वः । अन्नाम्नोप नयतीत्यर्थः । शरीरारोहणाद् वा । अथवा ऊहरहितो निरूह अचिन्त्यप्रभावत्वात् । संग्रहेऽप्युक्त—'शरीरारोहणाद् दोषनिर्हरणादचिन्त्यप्रभावतयास्मिन्नूहासम्भवान्निरूह' इति । अनुरूपमासनमन्वासनम् । शरीरयोग्या आसिका येन क्रियते तदन्वासनं स्नेहवस्ति' । अनुवासनमित्यनुशब्दस्य पूर्वोक्तोऽर्थः । वासन वास स्थितिरित्यर्थः । यतश्च सोऽन्नमनु वसन्नपि न दुष्यति । अनुवासनमपि दीयते इत्यनुवासनम् । निरूहादुत्तर गुदादुत्तरेण वा मार्गेण मेढ्राख्येन दीयते इत्युत्तरवस्तिः । ननूपादानभेदेन भेदे कल्प्यमाने वस्तेर्द्वैविध्य, तथा मार्गभेदेनापि । तत् कथ त्रिविध इत्युच्यते । ब्रूमः । प्रयोगभेदात् त्रैविध्यमिति परिहार ॥ १ ॥

तेन साधयेत् ।

गुल्मानाहखुडप्लीहशुद्धातीसारशूलिनः ॥ २ ॥
जीर्णज्वरप्रतिश्यायशुक्रानिलमहग्रहान् ।
वर्ध्माश्मरीरजोनाशान् दारुणाश्चानिलसङ्गान् ॥ ३ ॥

तेनेत्यादि । तेनेति तच्छब्देन निरूह. परामृश्यते । अनास्थाप्यानास्थाप्यत्र वचनादनुवासनोत्तरवस्त्योः, पृथग् विषयाभिधानाच्च । कथमितिचेद्—ब्रूम । 'अनास्थाप्यास्त्वि'त्यधीते तत्र ते निरूह्या इत्यधिगते सत्यनिरूह्या पुनरिति वक्तु युज्यते । अपि च 'आस्थाप्या एव चान्वास्या' इति नाधिगम्येत । तस्मात् तेनेत्यनेन निरूहस्य ग्रहण न्याय्यम् । तेन निरूहेण गुल्मादियुक्तास्तथा जीर्णज्वरादीनन्याश्च वातरोगान् कृच्छ्रान् साधयेत् उपक्रामेत्, । गुल्मादीना शूलान्तानां द्वन्द्व इनि कार्य । शुद्धातिसारिण इति शुद्धशब्देनामरक्तयो. प्रतिषेध । शुक्रादीना ग्रहेण सम्बन्ध. । शुक्रग्रहो रेतोनिबन्ध । अनिलग्रहो वायोरसञ्चार । रजोनाशः स्त्रिया पुष्पविघात ॥ ३ ॥

अनास्थाप्यास्त्वतिस्निग्धः क्षतोरस्को भृशं कृशः ।
आमातिसारी वमिमान् सशुद्धो दत्तनावनः ॥ ४ ॥
कासश्वासप्रमेहार्शोहिध्माध्मानाल्पवह्नयः ।
शूनपायु. कृताहारो यद्वच्छिद्रोदकोदरी ॥ ५ ॥

---

१. मुद्रितसग्रहे 'अचिन्त्यवीर्यप्रभावतया' इति दृश्यते २. वर्धस' मुद्रितहारीतसंहितायाम्..

कुष्ठी च मधुमेही च मासान् सप्त च गर्भिणी ।

अनास्थाप्या इत्यादि । आस्थापनशब्दो निरूहपर्यायः । आ समन्वाद् देहगुणान् स्थापयतीत्यास्थापनं वय स्थापनाद् वा । अनास्थाप्या आस्थापनानर्हाः । अतिस्निग्धादयः सप्तमासगर्भिण्यवसानाद् द्वाविंशतिरनास्थाप्याः न निरूहार्हा इत्यर्थः । वातव्याधावप्यतिस्निग्धानामास्थापनं वर्ज्यम् । क्षतोरस्कस्य कृशस्य च शरीरपीडाकरणात् । शुद्धातिसारिण आस्थाप्या इत्यनेनैवामातिसारिणोऽनास्थाप्यत्वे लब्धेऽपि पुनर्वचनं नियमार्थम् — आमातिसारिणो न कथञ्चिदास्थाप्या इति । प्रसक्तच्छर्दिः । नित्ययोगेऽत्र मतुप् । संशुद्धः कृतवमनविरेकः प्रकृतिभोजनावधिकम् । दत्तनावनस्तदहरेव । तत्रातिस्निग्धस्य दोषानुत्क्लेश्य निरूहः श्वयथुमुदरं च जनयेत् । क्षतोरस्कक्षयोः क्षोभव्यापन्नशरीरमाशु पीडयेत् । आमातिसारिणो दोषस्य सम्यगनिर्हरणाद् देहस्य क्षोभादतिपीडां कुर्यात । प्रसक्तच्छर्दिषो दोषोल्लेशात् निरूहणमूर्ध्वं नयेत् । कृतवमनविरेकस्यास्तु रिक्तं देहं क्षतं क्षारवद् दहेत् । कृतनस्यस्य विकृतोर्ध्वस्रोतस्तया भृशं पीडां कुर्यात् । शस्त्रादीनामुद्दिष्टदोषत्वान्निरूहकर्म वर्जेत् । अर्शःप्रभृतीनां भृशतरमाध्मान मृत्युर्वा स्यात् । अल्पाग्न्यादीनां स्तम्भजाल्यादीनावहेत् । शूनपायुः सशोफगुदः । गर्भिण्या अष्टममासात् पूर्वमास्थापनान् आमगर्भध्वंसः ॥ ४,५ ॥

आस्थाप्या एव चान्वास्या विशेषादतिलक्षयः ॥ ६ ॥

रूक्षाः केवलमातार्ताः

आस्थाप्य इत्यादिना अनुवासनयोग्यानाह—ये आस्थाप्यास्त एवान्वास्याः आस्थापनयोग्याः सर्वे अनुवासनयोग्या एव । विशेषादिति । अतिवाह्यादयश्चयः विशेषेणातिशयेनान्वास्याः अनुवासनीयाः अनुवासनयोग्याः । एतामनुवासनं पोषकरम् । वचन हि—'रूक्षातिक्षीणाशयः केवलनिर्वातार्तश्च विशेषेण ते परमनुवासनेनाप्यायन्ते मूलनेन वृक्षवत्' इति ॥

नानुवास्यास्त एव च ।

येऽनास्थाप्यास्तथा पाण्डुरामलसिंहपीनसाः ॥ ७ ॥

नानुवास्यास्त एव चेति । ये अनास्थाप्या अतिस्निग्धेऽपि नानुवास्या एव । ये निरूहानर्हास्तेऽप्यनुवासनानर्हा इत्यर्थः । अन्ये च सन्त्यनु-

वासनानर्हा, तानप्याह—तथेति। तथा प्लीहादयो गलगण्डवदन्ता नानुवासनार्हाः स्नेहवस्त्ययोग्या। एतेषां हि दोषानुत्क्लेश्य स्नेहवस्तिरुदरं जनयेत् ॥ ७ ॥

अतिदेशप्राप्तं निरन्नत्वं प्लीहादीनां चानुवासने निषेधति—

निरन्नप्लीहनिड्भेदिगुरुकोष्ठकफोदराः।
अभिष्यन्दिक्रुशस्थूलकृमिकोष्ठाढ्यमारुताः ॥ ८ ॥
पीतविषे गरेऽपच्या श्लीपदी गलगण्डवान्।

निरन्नप्लीहेति। निरन्नस्यानुवासनात् स्नेहविपत्तिः। तथा चोक्तं चरकादे—

"अभुक्तवतश्च तथा स्नेहवस्तिर्विपद्यते"

इति। कृताहारस्यास्थापननिषेधे निरन्नस्यानुवासननिषेधे च युक्तिं सङ्क्षेपेणोक्तां—

'अभुक्ते रिक्तकोष्ठे च प्रयुक्तमनुवासनम्।
सरदूरगसूक्ष्मत्वे क्षिप्रमूर्ध्वं प्रपद्यते ॥
तेन वायोर्जयो न स्याद् वातधामन्यतिष्ठता।
कायाग्नेराशु नाशस्य विशेषादनिवर्तनात् ॥
स्नेहः सम्योशिताहाररुद्धे त्वामाशयेऽनिलम्।
पक्वस्थं हन्ति पक्वस्थश्च्यवते चान्नपाकतः ॥
निरूहश्च सम्यक्[1] तीक्ष्णवेगावुभावपि।
तावत्र मुष्टितौ तीक्ष्णावधोऽन्नेन सहागतौ ॥
ऊर्ध्वं वा शकृता सार्धं सस्थितौ कोष्ठ एव वा।
समलाहारविष्टब्धौ हरेतामाशु जीवितम् ॥
भुक्तवाननुवास्योऽस्मान्न निरुह्यस्तु भुक्तवान्।'

इति। प्लीहादीना. स्तम्भजाड्यादीनावहेत्। कृमिकोष्ठस्यानुवासनात् पूर्वकायमग्निं सृते कृमिभिश्छर्दि स्यात्। आढ्यमारुतादीना सम्यग्दोषानिर्हरणादामवृद्धि.। पीते गरे विषे च नानुवास्या इति योज्यम्। अपची उत्तरे वक्ष्यमाणा। श्लीपदीति इनि। गलगण्डवानिति मतुप्॥

तयोस्तु नेत्रं हेमाद्यिधातुदार्वस्थिवेणुजम् ॥ ९ ॥
गोपुच्छाकारमच्छिद्रं श्लक्ष्णाङ्गुलिकामुखम्।

---

१ रिक्तकोष्ठा च, २. 'वत्तरवान् प्रतिष्ठता' इति मुद्रितसदृशपाठः

त्रयोरित्यादि । त्रयोर्निरूहानुवासनयोर्नेत्रं भवति । स्नेहकल्ककषाया-दिकं कोष्ठं नयत्यपानेन अथवा बहिर्दोषान् भेषजयोगेनेति नेत्रं यन्त्रमुच्यते । 'दाम्नीशसे'ति ष्ट्रन्प्रत्ययः । किंभूतं नेत्रं हेमादिजातं स्वर्णादिमयम् । आदिश-ब्दः प्रकारे । तेन रजतायःकंसत्रपुसीसादयो गृह्यन्ते । धातुशब्दो भूतवचनः भौतिके हेमादावपि वर्तते । ये तु कठिनत्वे सति वह्निसंयोगाद् द्रवतामापद्यन्ते ते धातवो हेमादयश्च धातवश्चेति द्वन्द्व इति केचित् । दारुशब्देन खदिरास-नादिसारग्रहणम् । अस्थीनि गजादीनां दन्तादीनि । वेणुर्वंश एषां द्वन्द्वः । एभ्यो जातं तयोर्निरूहानुवासनयोर्नेत्रं भवति । स्फटिकशङ्खादिभिरपि कर्तव्यम् । उक्तवांश्च 'सुवर्णादिधातुमणिशङ्खदन्तशृङ्गास्थिवेणुखादिरकदरतिन्दुकादिसारम-यम्' इति । किंभूतम् आनुपूर्व्योपचयाद् गोपुच्छाकारं गोपुच्छस्याकार इवाकारो यस्य तदेवम् गोपुच्छवत् क्रमवृत्तमित्यर्थः । अच्छिद्रं निर्विवरम् पार्श्वे मूलाग्रच्छिद्रव्यतिरिक्तच्छिद्ररहितमित्यर्थः । श्लक्ष्णं मसृणं कोमलम् । तथा-ऋजु अवक्रम् । तथा गुलिकामुखं गुलिकासदृशं वर्तुलत्वान्मुखं यस्य तदेवम् । अतीक्ष्णाग्रत्वाद् गुदं न क्षिणोतीति । अस्य च नेत्रस्य यद् गुदे प्रविशति तन्मुखम् । एवंभूतं नेत्रं वैद्यः कारयेत् ॥

अथास्य प्रमाणमाह—

ऊनेऽब्दे पञ्च पूर्णेऽस्मिन्नासप्तम्योऽङ्गुलानि षट् ॥ १० ॥
सप्तमे सप्त तान्यष्टौ द्वादशे पोडशे नव ।
द्वादशाच्च परं विंशाद्

ऊन इत्यादि । ऊनेऽब्देऽसंपूर्णे वत्सरे नेत्रस्य पञ्चाङ्गुलानि आङ्गु-राङ्गुलैः प्रमाणमिति गम्यते । दैर्घ्येणेत्यर्थात् । वक्ष्यति हि — 'स्वाङ्-गुष्ठेन समं मूले स्थौल्येने'ति । अस्मिन्नब्दे प्रथमे वत्सरे पूर्णे आ सप्तम्यः सप्त वर्षाणि मर्यादीकृत्य नेत्रस्य षडङ्गुलानि प्रमाणम् । आसप्तमाद् वर्षात् षडङ्गुलायामित्यर्थः । आङ् मर्यादायां, नाभिर्विधौ । चेत् तथा सप्त वर्षस्यापि षडेवेति प्राप्नोति । वक्ष्यति च 'सप्तमे सप्ते'ति । एवं न पूर्वापरव्या-हतं स्यात् । तस्मान्मर्यादायामेवाङिति । सप्तमे वर्षे सप्ताङ्गुलानि । द्वादशे वत्सरे तान्यङ्गुलान्यष्टौ प्रमाणम् । नेत्रदैर्घ्य इति शेषः । द्वादशानां पूरणे इनि 'तस्य पूरणे डट्' इति डट् । एवं षोडशे इत्यत्र षोडशे वर्षे नवाङ्गुलानि नेत्रम् । विंशे द्वादशाङ्गुलानि । विंशाद् वत्सरात् परमूर्ध्वमेकविंशतिमभृति

वर्षेषु - द्वादशाङ्गुलान्येव । नातोऽप्यधिकानीत्येवशब्दार्थः । विंशाद् वर्षात् परतोऽन्न प्रमाणे विकल्प इत्यर्थः । एव नेत्रस्य दैर्घ्यमुक्तम् । विंशतिशब्दो-त्पूरणे टटि "नि विंशतेर्डिति" इति तिशब्दलोपे विंशशब्दः ॥

वीक्ष्य वर्षान्तरेषु च ॥ ११ ॥

वयोबलशरीराणि प्रमाणमभिवर्धयेत् ।

वीक्ष्य वर्षान्तरेषु अन्तरावस्थितेषु वर्षेषु आन्तरालिकेषु वर्षेषु अष्टमन-वमदशमादिषु प्रमाणमभिवर्धयेन्नेत्रस्येत्यर्थः । न केवलमान्तरेषु वर्षेषु प्रमाण-मभिवर्धयेत् । वयोबलशरीराणि च वीक्ष्य निरूप्य प्रमाणं वर्धयेत् । चशब्दो भिन्नक्रमः । वृद्धाकारोऽप्याह—'वर्षान्तरेषु अनुक्तेषु पञ्चदशसु वयो-बलशरीराणि वयश्च बलं च शरीरं च निरूप्य नेत्रप्रमाणं वर्धयेत् क्षपयेद् वे'ति ॥

स्वाङ्गुष्ठेन समं मूले स्थौल्येनाऽग्रे कनिष्ठया ॥ १२ ॥

स्वेत्यादि । स्थौल्येन परिणाहेन स्वाङ्गुष्ठेन तुल्यं मूले नेत्रम् । स्वशब्दे-नातुरो गृह्यते । प्रतिपुरुषमङ्गुष्ठपरिणाहेन तुल्यमूले अग्रं प्रान्तः तस्मिन् आतुरस्य कनिष्ठयाङ्गुल्या समं नेत्रं स्यात् । यस्मिन् वस्तिर्बध्यते तन्मूलम् । यद् गुदे प्रवि-शति तदग्रम् । तत् कनिष्ठिकापरिणाहं मध्ये मध्याङ्गुलिसममित्यर्थात् सिध्यति । खरनादेऽप्यधिजगे—

"वस्तिनेत्रं मृदु श्लक्षणं प्रवृत्तं गुलिकामुखम् ।
भवेद् गोपुच्छसंस्थानं सुप्रवाहं निकर्णिकम् ॥
*चतुर्भागप्रणयने मर्यादा कर्णिका भवेत् ।
द्वे कर्णिके चोपरिष्टाद् बन्धाघाराय चान्तरे ॥
स्वाङ्गुष्ठकपरीणाहं मूलं नेत्रस्य गम्यते ।
मध्य त्वनामिकातुल्यमग्रं तुल्यकनिष्ठिकम् ॥
स्वेनाङ्गुलप्रमाणेन दैर्घ्यं स्याद् द्वादशाङ्गुलम् ।'

इत्यादि ॥ १२ ॥

नेत्रपरिणाहानुरूप छिद्र प्रदर्शयति । अथवा अधुना छिद्रप्रमाणवचनद्वारेण नेत्रस्थौ-ल्यप्रमाणमधिकमपि दर्शयन्नाह—

पूर्णेऽङ्गुलमादाय तदर्धार्धप्रवर्धितम् ।
त्र्यङ्गुलं परमं छिद्रं मूले

---

* 'या त्रिभागप्रणयने' इति अरुणदत्तस्य अष्टाङ्गहृदयव्याख्यातुरभिमत. पाठ.

पूर्ण इत्यादि । अब्दे वर्षे पूर्णे सत्यङ्गुलमादाय आतुरस्य स्वाङ्गुलात् प्रभृति क्रमेण त्र्यङ्गुलं छिद्रं मूले नेत्रस्य भवति । किं भूतं छिद्रम् । अर्धस्यार्धमर्धार्धं तस्याङ्गुलंस्यार्धार्धं तदर्धार्धम् । तेन प्रवर्धितम् । तत्र प्रथमे वर्षे पूर्णे आतुरस्यैकाङ्गुलप्रमाणं छिद्र भवति यावद्वर्षाणि षट् । अङ्गुलपरिमाणं कुटिलीकृतवस्तु यस्य मूलच्छिद्रे प्रविशति तत् तथोक्तम् । सप्तमे वर्षे सपादमङ्गुलं यावदेकादशवर्षाणि । द्वादशे वर्षे सार्धमङ्गुलं यावत् षोडशवर्षाणि । षोडशवर्षस्य तु पादोनमङ्गुलद्वयम् । सप्तदशेऽङ्गुलद्वयम् । अष्टादशे वर्षे सपादमङ्गुलद्वयम् । एकोनविंशतिवर्षस्य सार्धमङ्गुलद्वयम् । विंशतिवर्षस्य पादोनमङ्गुलत्रयम् । एकविंशतिवर्षस्य त्र्यङ्गुलं छिद्रमिति क्रमो बोद्धव्यः । अथवा तदर्धार्धप्रवर्धितमित्यस्यायमर्थः । अर्धनार्धेन प्रवर्धितमिति । अङ्गुलात् प्रभृति अर्धमर्धमङ्गुलं गृहीत्वा त्र्यङ्गुलं यावद्वर्धयदित्यर्थः । पूर्णेऽब्दे एकमङ्गुलं सप्तमे सार्धमङ्गुलं द्वादशे द्व्यङ्गुलं षोडशे सार्धद्व्यङ्गुलं विंशतिप्रभृति त्र्यङ्गुलमिति । ऊनवर्षस्याप्यर्धाङ्गुलं छिद्रं एतदपेक्षया कल्प्यमित्यूह्यम् । परमित्युत्कृष्टम् । अतोऽधिकं निपिध्यते । त्र्यङ्गुलात् किञ्चिन्न्यूनं मानमित्यभिप्रायः । त्र्यङ्गुलपर्यन्तच्छिद्रमिति सङ्ग्रहग्रन्थस्यार्थः । पर्यन्तशब्दोऽवसानवचनः, पर्यन्तशब्दोऽवधौ च वर्तते । अङ्गुष्ठपर्व्विकाया त्र्यङ्गुलं छिद्रमित्यन्ये । अथवा परमित्यनेनैतद् गमयति । परमुत्कर्षमाश्रित्य इद मूलच्छिद्रम् । मध्यमं तु मूलच्छिद्रं स्वाङ्गुष्ठेनेत्यनेनोक्तम् इति । अङ्गुलिशब्दो मध्यमाङ्गुलिवचनः । मध्यमाङ्गुलेरन्तर्भागास्त्रियवमितास्त्रिगुणित त्र्यङ्गुलमित्युच्यते ॥

अग्रे वहते तु यत् ॥ १३ ॥

मुद्गं माषं कलायं च क्रिमिं कर्कन्धुकं क्रमात् ।

अग्र इत्यादि । अग्रे तु छिद्रं तद् भवति यन्मुद्गादीन् क्रमाद् वहति । मुद्गादिप्रवेशयोग्यमच्छिद्रमित्यर्थः । तत्र वार्षिकस्य मुद्गवाहि यावत्षड्वर्षम् । सप्तवर्षस्य माषवाहि । द्वादशवर्षस्य कलायवाहि । षोडशवर्षस्य क्रिमिकलायवाहि । एकविंशतिवर्षस्य कर्कन्धुवाहीति । ऊनवर्षस्य वनमुद्गवादीति कल्प्यम् मुद्गशब्देन वनमुद्गस्यापि ग्रहणात् । अथवा तुशब्देन पक्ष्माङ्गुलसमे नेत्रे वनमुद्गप्रवेशाक्षमत्वं संग्रहोक्तं सूच्यते । 'अक्ष्णच्छिद्रप्रमाणं चैतदग्रे कनिष्ठया" इत्यत्रापि संगच्छत एव । दैर्घ्येण प्रमाणं चात्र पक्षे पूर्वमेव योज्यम् । "स्वाङ्गुष्ठेन समे मूले स्थौल्येने"त्यत्र छिद्रप्रमाणं स्वमत्या सद्भिषजा कल्प्यम् । तथा

व्यङ्गुलं छिद्रमित्यत्र च स्थौल्यप्रमाणं स्वधियैव निरूप्यम् । तन्त्रकृता तु ग्रन्थगौरवभयादुक्तप्रायत्वाच्चेह नोक्तम् ॥

कर्णिकास्थानमाह —

मूलच्छिद्रप्रमाणेन प्रान्ते घटितकर्णिकम् ॥ १४ ॥
चर्त्याग्रे पिहितं मूले यथास्वं व्यङ्गुलान्तरम् ।
कर्णिकाद्वितयं नेत्रे कुर्यात्

मूलेत्यादि । कर्णिका नाम मुद्रिका कर्णिकाकृतित्वात् छत्राकारा गुदप्रवेशमर्यादा भित्तिः, गुदाधिकान्तःप्रवेशनिरोधनी च ज्ञेया । मूले यत् छिद्रं यथास्वमुक्तमंगुल्यादि तन्मानेन प्रान्ते अग्रे घ(तिसा ? टिता) सम्पादिता कर्णिका यस्मिन् तदेवम् । यावान् मूलच्छिद्र. तावन्तमग्रे विमुच्य तत्सीम्नि कर्णिकां कारयेत् । परमं छिद्रं नेत्रे त्र्यङ्गुलम् । त्रीण्यङ्गुलान्यग्रे विमुच्य गुदप्रवेशमर्यादाभित्तियुक्तं करणीयमित्यर्थः । एवमन्येषामपि त्र्यङ्गुले कर्णिका कार्येति सर्वेषामभिप्रेतमेव । तथा हि सुश्रुतोऽपि त्र्यङ्गुलमनिविष्टकर्णिकमिति व्याचष्ट । ननु सर्वैरपि नेत्रप्रान्ते कर्णिका चतुरङ्गुले क्रियते तत् कथमिति, दूरप्रणिधानात् रोहस्यानुद्गमनं भवतीति मत्वा तथा क्रियते । अपि च कायचिकित्सितप्रधानस्य भट्टारहरिश्चन्द्रस्य कृतिरिति प्रसिद्धे खरनादेऽपि मोक्तत्वाच्च । तत्रैवमधिजगे—

"वस्तिनेत्रं मृदु श्लक्ष्णं सुवृत्तं गुटिकामुखम् ।
भवेद् गोपुच्छसंस्थानं सुप्रवाहं त्रिकर्णिकम् ॥
चतुर्भागे प्रणयने मर्यादा कर्णिका भवेत् ।
द्वे कर्णिके चोपरिष्टाद् वस्त्याधारे यवान्तरे ॥
स्वाङ्गुष्ठकपरीणाहं मूलं नेत्रस्य उच्यते ।
मध्यं स्वानामिकातुल्यमग्रं तुल्यकनिष्ठिकम् ॥
स्वेनांगुलप्रमाणेन दैर्घ्यं स्याद् द्वादशाङ्गुलम् ।
कर्कन्धुमत्रच्छिद्रं श्रेष्ठमन्यद् यथा वयः ॥"

इति । एतत्समवलम्ब्य मूले कर्णिकाद्वितयं च यथान्तरं क्रियते । तथा चर्त्या घनचेलदशायाग्रे पिहितं स्थगितं क्षताद्यभिघेशपरिहारार्थं वस्तौ भेषजक्षेपकाले तदभ्रंश्यर्थं च तथा यथास्वमूनवर्षादिकस्य तदङ्गुल्यमाणेन द्व्यङ्गुलान्तरं

कर्णिकाद्वितयं कुर्यात्। यथास्यं व्यङ्गुलान्तर यस्य यस्य ऊनत्वादिकस्य यद् यदंगुलद्वितय तावन्मानमन्तरांऽ कृत्वा कार्णिकायुगळं कारयेद् वस्तिपुटपोजनार्थम्। आगमो हि—'स्यात् कर्णिकैकामचतुर्थभागे मूलाश्रिते वस्तिनिबन्धने द्वे' इति ॥

अत एवाह—

तत्र च योजयेत् ॥ १५ ॥

अजाविमहिषादीनां वास्तिं सुमृदितं दृढम्।
कषायरक्तं निश्छिद्रग्रन्थिगन्धसिरं तनुम् ॥ १६ ॥
ग्रथितं साधु सूत्रेण सुखसंस्थाप्यभेषजम्।
वस्त्यभावेऽङ्घ्रिपादं वा न्यसेद्वासोऽथवा घनम् ॥ १७ ॥

तत्रेत्यादि । तत्र कार्णिकाद्वितये अजादीनां वास्तिं प्रयोजयेत्। आदिशब्देन वृषवराहादीनां ग्रहणम्। तेषां वास्तिं। अजादीनामित्येवं निर्देशेऽप्यविमहिषग्रहणे लब्धे साक्षादेतयोर्ग्रहणमन्येभ्यो वोस्तभ्य एतद्वस्तेर्योग्यतरत्वप्रतिपादनार्थम्। किंभूतं वस्तिं— सुमृदितं संक्षेपमुद्गः सम्यङ् मर्दितम्। तथा दृढं स्थिरं तथा कषायेण हरीतक्यादिना रक्तम्। अथवा कषायेण लाक्षागैरिकादिना रक्तं रञ्जितम्। तथा निश्छिद्रग्रन्थिगन्धसिरं छिद्रादीनां द्वन्द्वः, ता न सन्ति यत्र स एवम्। अच्छिद्रग्रन्थीति वा पाठः। तनुमंचलमस्थूलम्, अबहळमित्यर्थः। तथा साधु सम्यक् सूत्रेण ग्रथितं बद्धं तथा सुखेनाकृच्छ्रेण संस्थापनीयमौषधं यतस्तं सुखेन औषधं संस्थापयितुं शक्यम्। वस्तेरभावे सत्यङ्घ्रिपादं छागोरध्रावयवविशेषं वा न्यसेत्। 'विपाटितमेषपादश्चर्चिरङ्घ्रिपाद' इतीन्दुः। 'अङ्घ्रिपादमि'ति केषांचित् पाठः। अङ्घ्रिपादश्चर्मपर्यायः। उक्तं च निघण्टौ—

"त्वग् वल्को वल्कल जक्षी छुरिश्छदनकं छदः।
अङ्घ्रिपादोऽजिनं चर्म समृर्थाः कृत्तिरेव च ॥"

इति। अथवा वासो वस्त्रं सूक्ष्मतान्तवं मधूच्छिष्टोपदिग्धत्वाद् घनं न्यसेत्। आगमो हि—

"वस्तेरभावे स्रवनीगलो वा
स्यादङ्घ्रिपादः सुघनः पटो वा।"

इति । प्लवनी जलशकुन्तः । अङ्गपाद चर्मेति पाठ्यकारः ॥-१५-१७ ॥

अधुना प्रदेयस्यौषधस्य मानमुच्यते –

निरूहमात्रा प्रथमे प्रकुञ्चो वत्सरात्परम् ।
प्रकुञ्चवृद्धिः प्रत्यब्दं यावत् षट् प्रसृतास्ततः ॥ १८ ॥
प्रसृतं वर्धयेदूर्ध्वं द्वादशाष्टादशस्य च ।
आसप्ततेरिदं मानं दशैव प्रसृताः परम् ॥ १९ ॥

निरूहेत्यादि । प्रथमे वर्षे निरूहस्यास्थापनस्य मात्राः प्रकुञ्चः पल कषायस्नेहादिसहितस्य परप्रमाण षण्मासादौ त्वेतदनुसारेणार्धपलादि कल्प्यम् । वर्षात् परं प्रकुञ्चेन वृद्धिः प्रतिवत्सर कार्या यावत् षट् प्रसृता भवन्ति द्वादशे वर्षे षट्प्रसृता इत्यर्थः । द्वादशपलानि हि षट् प्रसृता, 'द्वे पले प्रसृत' इति वचनात् । तत ऊर्ध्वं प्रत्यब्दं प्रसृत वर्धयेत् । प्रत्यब्दमित्यनुवर्तते । ततो द्वादशवर्षस्य द्वादशपलानि । अनन्तर त्रयोदशवर्षादिषु प्रतिवर्षं पलद्वय निरूहमात्रायां वर्धयितव्यम् । क्रमेण यावदष्टादशवर्षस्य द्वादश प्रसृता 'चतुर्विंशति पलानि । आसप्ततेरिद मानम् अष्टादशभृति सप्ततिवर्षाणि यावदिदमेवास्थापने मानं प्रमाणम् । एतावती मात्रा । द्वादश प्रसृता इत्यर्थ । पर सप्ततेरूर्ध्वं यावज्जीवं दशैव प्रसृता मात्रा नाधिकम् इति । 'वयोबलाग्निक्षयतो मात्राहानि क्रमाद् भवेत्' इति । सा युक्तिसिद्धत्वान्न स्फुट प्रतिपादिता ॥ १८-१९ ॥

अनुवासनमात्रामाह—

यथायथं निरूहस्य पाने मात्रानुवासने ।
आस्थाप्यं स्नेहित स्विन्न शुद्ध लब्धबल पुनः ॥ २० ॥
अन्नाशनार्हं विज्ञाय पूर्वमेवानुवासयेत् ।
शीते वसन्ते च दिवा रात्रौ केचित्ततोऽन्यदा ॥ २१ ॥
अभ्यक्तस्नातमुचितात्पादहीनं हित लघु ।
अस्निग्धरूक्षमाशितं सानुपानं द्रवादि च ॥ २२ ॥
कृतचंक्रमण मुक्तविण्मूत्र शयने सुखे ।
नात्युच्छ्रिते न चोच्छ्रीर्षे संविष्ट वामपार्श्वतः ॥ २३ ॥
संकोच्य दक्षिण सक्थि प्रसार्य च ततोऽपरम् ।

यथायथमित्यादि । यथायथं यथास्व प्रथमवर्षादिषूक्तस्य निरूहस्य पादश्चतुर्भाग अनुवासनविषये मात्रा भवति । यस्य यस्य या या भेषजमात्रा

वस्तौ विहिता तस्यास्तस्याश्चतुर्भागो मात्रानुवासनस्य। यस्य पलं निरूहः तस्य कर्यमाणमनुवासनमित्यर्थः। एवं सर्वत्र कल्प्यम्। आगमो हि 'निरूहपादांशसमेन तैलेनान्यस्य' इति। अनुवसन्नपि न दुष्यति। अनुवासरं वा दीयत इत्यनुवासनम्। आस्थाप्यं निरूहयोग्यं पुरुषं स्निग्धं तथा स्विन्नं शुद्धं चोर्ध्वाधः तथा भूयोऽपि संसर्जनक्रमेण लब्धबलं तथा अनुवासनयोग्यं विदित्वा पूर्वमेव निरूहात् प्रागेवानुवासयेत्। अनुवासनार्हं इत्यनेनैतद् दर्शयति—'कृतानुवासन एवास्थाप्य' इति हारीतः। निरूहयोग्याश्च केचिदननुवास्याः कामिलादयः सन्तीत्यतोऽनुवासनार्हं विज्ञायेत्युक्तम्। 'अनुवासनानर्हस्त्वकृतानुवासन एवास्थाप्य' इतीन्दुः। अनुवासने कालविशेषमाह—शीते शैत्यवति काले हेमन्तशिशिरयोर्वर्षत्वोः तथा वसन्ते च दिवा अनुवासयेत्। ततोऽन्यदा शीतवसन्तादन्यस्मिन् काले ग्रीष्मप्रावृट्शरदास्ये ऋतुत्रये रात्रावनुवासयेत्। केचिदिति भिन्नक्रमः ततोऽन्यदेत्यनन्तरं द्रष्टव्य इति। केचिद् आहुरिति वाक्यशेषः। ततोऽन्यदा रात्रावनुवास्येदिति केचिदाहुरिति। सर्वदा दिवम एवानुवासनमिति स्वपक्षः। धन्वन्तरीयास्तु—सर्वथैव रात्रावनुवासनं नेत्याहुः। धन्वन्तरिमतमेवोररीकृत्य सद्भट्टेऽधिजगे—

'न रात्रौ प्रणयेत् स्नेहं दोषोत्क्लेशो हि रात्रिवः।
स्नेहवीर्ययुतः कुर्यादाध्मानं गौरवं ज्वरम्॥'

इति। तद् देशाद्युरादिवगात् प्रमाणयितव्यम्—

'वह्निस्थानगते दोषे वह्नौ चान्नरसाश्रिते।
स्फुटत्योनोमुखं देहं स्नेहौजः परिमर्पति॥
अल्पपिच्छकफं रूक्षं भृशं वातरुजार्दितम्।
भुक्तजीर्णाशनं कोमं रात्रावप्यनुवासयेत्॥'

केवलानिलपीडितं त्वशुद्धमनिष्पीतनवेऽन्नेऽप्यनुवासयेत्। आत्ययिकत्वात् तस्येति। किम्भूतं नरम्। अभ्यक्तस्नातं पूर्वमभ्यक्तं पश्चात् स्नातमुष्णाम्बुना। 'पूर्वकालिक—' इति समासः। उचिताभ्यस्तादन्नात् पादहीनं चतुर्थांशहीनमन्नमश्नीते भुक्तवन्तं तथाविधं हिनं लघुगुणयुक्तं च तथा अविदग्धरूक्षं किंचित् स्निग्धरूक्षम् सानुपानं द्रवादि द्रवपूर्वम्। आदिग्रहणेन स्नेहविरेचनमनुवर्तते। 'द्रवोष्णमभिष्यन्दी'त्यादिविशिष्टे च भुक्तवन्तमिति वर्तते। अनिस्निग्धानिरूक्षार्शनस्य दोषस्तस्मादपीस्निग्धरूक्षमित्युक्तम्। उक्तं च सद्भट्टे—'अनिस्निग्धाशिनो पु-

भयमार्गसंसर्गात् स्नेहो मदमूर्च्छाग्निसादश्लेष्मान् जनयति । रूक्षाशिनोऽतिविष्टम्भ बलवर्णहानिं वा अल्पमात्रद्रवाशिनो न तदावरण स्यादि'ति । किंभूत कृतचङ्क्रमणं विहितचङ्क्रमणमात्र तेन शयने संविष्टं शायित कृत्वा अनुवास्येदिति सबन्ध. । किंभूते सुखावहे नात्युच्छ्रिते नात्युन्नते नचोच्छ्रीर्षे नोन्नताशिरोभागे किञ्चिदुन्नतपाददेशे 'प्राक्छीर्षक शुक्लपट्टोत्तरीय शयन प्रशस्तम्' इत्यागमात् । कथ संविष्टं वामपार्श्वतः वामपार्श्वेन । तृतीयार्थेऽत्र तसिल । दक्षिणं सक्थि दक्षिण पाद सङ्कोच्य नामसक्थ्युपरिगादिति वृद्धवैद्या. । ततो दक्षिणसक्थ्नोऽपर वाम सक्थि प्रसार्य । सङ्ग्रहे चोक्तम् —'शयनेनात्युच्छ्रिते ईषदुन्नतपादे वामपार्श्वे प्राक्शिरस सन्निशयेदिति । वामपार्श्वशयने गुणावहत्वम् । आगमो हि

'वामाश्रयोऽग्निर्ग्रहणी गुदश्च ,
तत्पार्श्वसंस्थस्य गुदोपलब्धि ।
लीयन्त एव वलयश्च यस्मात्
सव्य शयानोऽर्हति वस्तिदानम् ॥'

गुदोपलब्धि सुखेन गुदप्राप्ति । स्नेहस्य स्थूलान्त्रप्रतिबन्धाभावाद् वलयोऽपिद्रियन्त इति ॥

अथास्य नेत्र प्रणयेत् स्निग्धे स्निग्धमुख गुदे ॥ २४ ॥
उच्छ्वास्य वस्तेर्वदनं बद्धे हस्तमकम्पयन् ।
पृष्ठवंशं प्रति क्रमो नातिद्रुतविलम्बितम् । २५ ॥
नातिवेग न वा मन्द सकृदेव प्रपीडयेत् ।

अथेत्यादि । अस्यैवभूतस्यातुरस्य स्वबाहूपधानस्य शयानस्य घृतेन स्निग्धे गुदे पायो स्निग्धमुखं नेत्रं पृष्ठवंशं प्रति पृष्ठवंशाभिमुख पृष्ठवंशानुपूर्व्या नातिद्रुतविलम्बितं च हस्तमकम्पयन् प्रणयेत् । वस्तेर्वदनमुच्छ्वास्य विकास्य विवृत कृत्वा बद्धा वस्तिमुखगत वात विमुच्य बद्धेत्यर्थ[1] । यथार्तोपविष्ट स्नेहमासिच्य वस्तिमुखमुच्छ्वास्य सूत्रादिना निर्वेष्टीक बद्ध्वा नातिवेगं न वा मन्द नातिवेगेन न च मन्द कृत्वा सकृदेव एकग्रहणेनैव प्रपीडयेत् । नातिवेग नातिमन्द च एकवारमेव पीडयेत् । सकृद्ग्रहण स्थित्वा स्थित्वा प्रपीडननिषेधार्थम् । न धारातिच्छेदोऽन्तरा कार्य इत्यर्थ । पृष्ठवंशानुपूर्व्या(नेत्रस्यै)परित्येऽतिवेगमन्दमपीडने च सदोषत्वम् । तथाचागमः —

---

१. 'प्रणामिनो विवृत्य वस्तिमुखस्य पाताहतम् सदाम्नायुक्तम्, २ 'नास्युपविष्टे सास्कृते ईषत् इति मुद्रितपुस्तकपाठ

"तिर्यक् प्रणीते तु न याति वायुः शुद्धे व्रणः स्याच्चलिते च नेत्रे ।
दत्तः शनैर्नाशयमेति वस्तिः कण्ठं प्रधावेदतिपीडितश्च ॥"

इति ॥

सावशेषं च कुर्वीत वायुः शेषे हि तिष्ठति ॥ २६ ॥

सावशेषं च स्नेह कुर्वीत वस्तौ किञ्चिदौषधशेषं कुर्यात् । 'कुतो हेतो-रित्याह — हि यस्मात् शेषे स्नेहे औषधे वायुस्तिष्ठति नान्तः प्रविशति तस्मात् सावशेषं कुर्वीत ॥ २६ ॥

दत्ते तूत्तानदेहस्य पार्ष्णिना ताडयेत्स्फिजौ ।
तत्पार्ष्णिभ्यां तथा शय्यां पादतश्च निरुत्क्षिपेत् ॥ २७ ॥

दत्ते च स्नेहे सत्युत्तानदेहस्य स्फिजौ पार्ष्णिना हस्ततलेनाहन्यात् उत्तानदेहस्येति विधिपरम् । दत्ते औषधे उत्तानगात्रः स्यादिति । तथा तेनैव प्रकारेण तत्पार्ष्णिभ्यामातुरपार्ष्णिभ्यां स्फिजौ ताडयेत् । तथा शय्यां खट्वां चातुरस्य पादतश्चरणोद्देशात् त्रीन् वारानुत्क्षिपेन्न तु पूर्वतः । 'तथेत्यस्यो-भयत्राप्यन्वयः' इति हृद्याकारः । तथा ताडयेत् तथा शय्यामुत्क्षिपेदिति ॥ २७ ॥

ततः प्रसारिताङ्गस्य सोपधानस्य पार्ष्णिके ।
आहन्यान्मुष्टिनाङ्गं च स्नेहेनाभ्यज्य मर्दयेत् ॥ २८ ॥
वेदनार्तमिति स्नेहो नहि शीघ्रं निवर्तते ।
योज्यः शीघ्रं निवृत्तेऽन्यः स्नेहोऽतिष्ठन्न कार्यकृत् ॥ २९ ॥

ततः शय्योत्क्षेपादनन्तरं प्रसारिताङ्गस्य सोपधानस्य कृतोपधानस्य पार्ष्णिके पार्ष्णी हे । मुष्टिना आहन्यात् । अङ्गं च शरीरं वेदनार्तं, स्नेहेन तैला-दिनाभ्यज्य मर्दयेत् । गात्रावयवत्वेऽपि पार्ष्ण्यादीनां पृथग्ग्रहणं मर्दननियमार्थम् । अङ्गस्य शेषस्य तु वेदनायां सत्यामेव मर्दनमिति । वेदनार्तमिति हेतुगर्भम्— पीडातुरत्वादभ्यज्य मर्दयेत् इति । एवं कृते सत्यन्तर्दत्तः स्नेहो बहि-र्याति न निवर्तते । समन्ताद् गच्छति च । सगन्नात् सिराः । अधोदत्ते स्नेहे विड्वातवेगे सति नेत्राभ्यं गुदावदर्नाय तथा वेगनिग्रहणानन्तरं शेषं स्नेहं पीडयेत् । तथाचागमः —

"विड्वातवेगो यदि वार्धदत्ते निगृह्य शुद्धे मलदेत शेषम् ।"

इति । शीघ्रनिवृत्ते च स्नेहे सत्यन्य स्नेहो योज्य । विनाभयेन स्वकालात् पूर्वं स्नेहे निर्गते अपर स्नेहो देय । कस्मादेव विधीयत इत्याह— अतिष्ठन्न कार्यकृदिति । स्नेह. शरीराभ्यन्तरे अतिष्ठन्नेव कार्यकर । अन्तर्वर्तमान एव स्नेहो वातशमनादिकं स्नेहनकार्यं करोतीति ॥ २८-२९ ॥

भोजनवेलामाह —

दीप्ताग्निं त्वागतस्नेह सायाह्ने भोजयेल्लघु ।

दीप्तेत्यादि । तुर्विशेषे । आगतस्नेहं शरीराद्विर्गततैलादिक, सन्त पुरुष दीप्ताग्निं सायाह्नेऽपराह्ने लघु मात्रया स्वभावत भोजयेत् । अदीप्ताग्निं द्वितीयेऽहनि भोजयेत् । अनागतस्नेहमास्नेहपरिणाम न भोजयेत् । लघु पेयादिकमिति हृद्याकारः ॥

निवृत्तिकाल परमस्त्रयो यामास्ततः परम् ॥ ३० ॥
अहोरात्रमुपेक्षेत परतः फलवर्तिभिः ।
तीक्ष्णैर्वा बस्तिभिः कुर्याद्यत्नं स्नेहनिवृत्तये ॥ २१ ॥

स्नेहस्य त्रयो यामाः प्रहराः परम उत्कृष्टो निवृत्तिकाल । अथवा अत्र सार्धसप्तनाडिकालक्षणो याम । ते त्रयो ग्राह्या, न प्रहरलक्षण । कथमव-गम्यत इति चेत्- उच्यते । 'त्रिषु यामेष्वतीतेषु यदि स्नेह पुनरपि न निरेति पश्चादहोरात्रमुपेक्षेत' इति वचनात् ज्ञायते— महता यामाना ग्रहणमिति । तत. प्रहरत्रयात् परतो रात्रिन्दिवमुपेक्षेत । न तदाकृष्टो यत्न कुर्यात् । परत अहो-रात्रादुपरिष्टात् फलवर्तिभिरुद्दावर्तचिकित्सोक्ताभि । अथवा तीक्ष्णैः कस्योक्तै र्वस्तिभि स्नेहनिवृत्तये स्नेहस्य बहिरागमनाय प्रयत्न कुर्यात् ॥ २०-२१ ॥

अस्यापवादमाह —

अतिरौक्ष्यादनागच्छन्नचेज्जाड्यादिदोषकृत् ।
उपेक्षेतैव हि ततोऽध्युषितश्च निशा पिबेत् ॥ २२ ॥

प्रातर्नागरधान्याम्भः कोष्णं केवलमेव वा ।
अन्यासपेक्षतीयेऽह्नि पञ्चमे वा पुनश्च तम् ॥ २२ ॥

यथा वा स्नेहपक्तिः स्यादतोऽत्युल्बणमारुतान् ।
व्यायामनित्यान्दीप्ताग्नीन् रूक्षांश्च प्रतिवासरम् ॥ २४ ॥

अतिरौक्ष्यादनागच्छन् स्नेहो जाड्याग्निसादादिदोषं यदि न विघत्ते तत उपेक्षैतैव न तन्निष्कासने यतेतेत्यर्थः । निशामध्युषितो नरः स्नेहजरणाय वातकफोपशान्तये प्रातःशुण्ठीधान्यकाम्बु कदुष्णं पिबेत् । केवलमेव वा नागरधान्यरहितं कोष्णं जलं पिबेत् । 'अध्युषितो रात्रिं यतः स्नेहः ततः परिणतत्वाद् रसादिधातुसमतां गत' इत्यरुणदत्तः । ततोऽन्नकाले यथोक्तमश्नीयात् अनुवासनात् पुनरनुवासनमुच्यते — तृतीये पञ्चमे वाहनि । तत्र तृतीयमल्पैः समैर्मल्पेक्षं, पञ्चमं तु पित्तश्लेष्मापेक्षम् । प्रतिवासरमिति । तमातुरं पुनस्तृतीयेऽह्नि पञ्चमे वाऽनुवासयेत् । विषमदिवसेष्वनुवासनं मङ्गलार्थम् । यथावा 'अथवा स्नेहपाको यथा भवेत् तथान्यपेक्षया मासरात्रेऽधिके वा त्रिरात्रे ऊने वा यथायोग्यमनुवासयेत् । यथावा स्नेहपक्तिरिति पाठः । अतोऽन्माद्धेतोः । यतः स्नेहपाकपरतन्त्रमनुवासनविधानमतोऽधिकपवनान् रूक्षांश्च पुरुषान् प्रतिदिनमनुवासयेत् । अत्युल्बणमारुतादीनां पुंसां स्नेहस्य पक्तिर्द्रुतं भवतीति प्रतिवासरमनुवासनं कर्तव्यम् ॥ २२–२४ ॥

इति स्नेहैस्त्रिचतुरः स्निग्धे स्रोतोविशुद्धये ।
निरूहं शोधनं युञ्ज्यादस्निग्धे स्नेहनं तनोः ॥ २५ ॥

इति पूर्वोक्तेन प्रकारेण स्नेहैस्त्रिभिश्चतुर्भिर्वा अनुवासनैः स्निग्धे शरीरे सति स्रोतोविशोधनार्थं निरूहं योजयेत् । अस्निग्धे ईषत् स्निग्धे सति शरीरे तनोः रूक्षस्य स्नेहनं निरूहं योजयेत् । अनुवासनैः स्निग्धे शरीरे शोधनो बस्तिः, अस्निग्धे शरीरे स्नेहसहित इत्यर्थः । त्रयो वा चत्वारो वा त्रिचतुराः, 'संख्यायाः —' इति समासः । चतुरोऽचूग्रहणे 'द्व्यष्टनः संज्ञायाम्' इत्यच् समा[illegible] ॥ २५ ॥

निरूहप्रशमनकालमाह —

पञ्चमेऽह्नि तृतीये वा दिवसे साधके शुभे ।
मध्याह्ने किञ्चिदायुक्ते प्रयुक्ते बलिमङ्गले ॥ २६ ॥

अभ्यक्तस्वेदितोत्सृष्टमलं नातिबुभुक्षितम् ।
अवेक्ष्य पुरुषं दोषभेषजादीनि चादरात् ॥ २७ ॥
वस्तिं प्रकल्पयेद्वैद्यस्तद्विद्यैर्बहुभिः सह ।

अथशब्दो मङ्गलार्थः आनन्तर्यार्थो वा । अथानुवासनादनन्तरम् अनुवासनस्य पञ्चमे तृतीये वा वासरे साधके नक्षत्रे आतुरजन्मनक्षत्रस्य पष्ठे अथवा साधके फलस्यानुकूले नक्षत्र इत्यर्थः । मध्याह्ने किञ्चिदावृत्ते परिवृत्ते। मध्यन्दिने किञ्चिदतिक्रान्ते सतीत्यर्थः । बलिमङ्गले प्रयुक्ते विहिते सति । बलिरन्नमांसादिभिर्विनागान्त्यर्थः । मङ्गलं स्वस्त्ययनादिकम् । पुरुषमभ्यक्तस्वेदितोत्सृष्टमलं कृत्वा । उत्सृष्टमलं त्यक्तगलम्। नातिबुभुक्षितं किञ्चिद् बुभुक्षितम् ईषज्जातबुभुक्षं तथा प्रकृत्यादिभिः पुरुषमवेक्ष्य ज्ञात्वा । अवेक्ष्य प्रकृत्यादीनीत्यर्थः । दोषादीनि च विदित्वा । आदिशब्देन सात्म्यबलदेशकालादिपरिग्रहः । आदरशब्दो निरूहस्य सापायत्वात् । इत्येवं सर्वमवगत्य वैद्यो वस्तिं प्रकल्पयेद्. योजयेत् । ननु 'दूष्यं देशमि'त्यादिना सर्वमुक्तमेव । तत् किमनेनेति । ब्रूमः । निरूहमपि सापायं पश्यतैतदाचार्येण पुनरुक्तं, दूष्यादि महता यत्नेनालोचनीयमिति प्रतिपादनार्थम् 'निरूहमात्रा प्रथम' इत्यादि सर्वमत्रालोच्यम्, तद्विद्यैर्वैद्यकशास्त्रज्ञैः । अथवा तच्छब्देन वस्तिः परामृश्यते । 'तद्विद्यै'र्वस्तिविद्भिर्बहुभिर्वैद्यैरमत्सरैः सार्धं प्रकल्पयेत् ॥

अथ निरूहकल्पनामाह —

क्काथयेद्विंशतिपलं द्रव्यस्याष्टौ फलानि च ॥ २८ ॥

क्काथयेदित्यादि । द्रव्यस्य वस्तिकल्पोक्तस्य विंशतिपलानि अष्टौ फलानि च सामान्यपरिभाषया षोडशगुणं जलं दत्त्वा क्काथयेत् । चतुर्भागावशेषं च साधयेत् । अष्टौ फलानि चेत्यत्र चकारेण पलमात्रं मदनफलानां ग्राह्यमिति द्योतयति । अर्थः— द्रव्यस्य वस्तिकल्पोक्तस्य विंशतिपलं मदनफलाष्टकं च पानीयपलशतत्रये षट्त्रिंशदधिके क्षिप्त्वा चतुरशीतिपलशेषं कृत्वा क्काथयेत् ॥ २८ ॥

इति क्वाथकल्पः ।

ततः क्वाथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत् ।
पित्ते स्वस्थे च षष्ठांशमष्टमांशं कफाधिके ॥ ३९ ॥
सर्वत्र चाष्टमं भागं कल्काद् भवति वा यथा ।
नात्यच्छसान्द्रता वस्तेः

निरूहमात्राधिकारः । स द्विविधः समुदायावयवभेदात् । इदानीमवयवस्योच्यते । ततस्तस्मादेवं कृताद् क्वाथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत् । अष्टादशवर्षं पुरुषमारभ्य यावत्सप्ततिवर्षं द्वादशप्रसृतो निरूहः । तत्र स्नेहं चतुर्थांशं षट्पलिकं वातेऽधिके कल्पयेत् । पित्तेऽधिके स्वस्थे च पुरुषे षष्ठांशं स्नेहं चतुष्पलिकं, कल्पयेदिति प्रकृतम् । कफेऽधिकेऽष्टमांशं स्नेहं त्रिपलिकं कल्पयेत् । षट्चतुस्त्रिपलसंमिताः स्नेहा वातादिषु याज्या इत्यर्थः । अथवास्मादेवं कृतात् क्वाथाच्चतुर्थांशमेकविंशतिपलानि वाते स्नेहस्य क्षिपेत् । पित्ते स्वस्थवृत्ते च चतुर्दशपलानि क्वाथात् षष्ठांशं स्नेहस्य क्षिपेत् । कफे क्वाथादष्टमांशं दश सार्धपलानि स्नेहस्य क्षिपेत् इति । हाटकस्यायं पक्षः—" सर्वत्र वाते पित्ते श्लेष्मणि स्वस्थवृत्ते चाष्टमं भागं त्रीणि पलानि कल्कस्य कल्पयेत् क्वाथादष्टमभागं सार्धदशपलानि कल्कात् क्षिपेदि"ति । भवतीत्यादि । यथा वा यस्तिरत्यच्छोऽतिसान्द्रोऽतिघनो न भवति, तथा कल्कः कल्पयितव्यः । यावता कल्केन संयुक्तोऽत्यच्छोऽतिसान्द्रो वा न भवति निरूहः तावान् कल्को ग्राह्य इत्यर्थः । ननु स्वस्थस्य दोषचालनं प्रतिषिद्धं तन्त्रान्तरीयैः—तद्ग्रन्थो हि—

"यो हि सञ्चलयेत् सुप्तं वने सिंहं करादिभिः ।
स दोषाश्च्यावयेत् स्वस्थान् प्रच्छर्दनविरेचनैः ॥"

इति । तस्मात् स्वस्थवृत्ते निरूहस्य कल्पना न युक्तैव । तदेतदसत् । यस्मात् प्रागभ्यधायि— "शीतोद्भवं दोषचयं वसन्ते विशोधयन्" इत्यादि । तदेतस्मादाचार्यवचनाद् ज्ञायते स्वस्थवृत्तेऽपि शुद्धिविधानं मतमेव तन्त्रकारस्येति । तन्त्रान्तरीयमतं त्वसदेव सद्व्यवहारविरुद्धत्वात् ॥

पलमात्रां गुडस्य च ॥ ४० ॥

मधुपट्वादिक्षेपं च युक्त्या

पलमात्रां गुडस्य चेति । मात्राग्रहणेन निक्षिप्तधिक्यं न्यूनत्वं वा दर्शयति । पित्ते तदधिकानुज्ञानार्थं मात्राग्रहणमिति हाटकोऽरुण-

दत्तश्च। मधुपर्कादि द्रव्यं च शेषमनुक्तं युक्त्या दोषाद्यपेक्षया कल्पयेत्। आदिशब्देन यवक्षारक्षीरमूत्रमस्त्वारनालमासरसशुराशुक्तादीनां ग्रहणम्। तत्रेयं युक्तिः— माक्षिकस्य पलचतुष्टयं सैन्धवस्य च कर्षः क्वचिद् "यवक्षारस्येत्यादि॥

सर्वं तदेकतः।

उष्णाम्बुकुम्भीवाष्पेण तप्तं स्रजसमाहृतम्॥ ४१॥
प्रक्षिप्य वस्तौ प्रणयेत्पायौ नात्युष्णशीतलम्।
नातिस्निग्धं न वा रूक्षं नातितीक्ष्णं न वा मृदु॥ ४२॥
नात्यच्छसान्द्रं नोनातिमात्रं नापटु नाति च।
लवणं तद्वदम्ल च

तदेतत् सर्वमौषधमेकतः एकस्मिन् क्वेत्वा भेषजस्य पाकातिक्रान्तिपरिहारार्थमुष्णाम्बुकुम्भीवाष्पेण तप्तमौषधस्य विदाहानुपपत्त्यर्थमुष्णजलबाष्पतापमात्रं कर्तव्यमित्यर्थः। स्रजेन मन्थानेन समाहृतमालोडितम्। स्रजो मन्थानः पञ्चाङ्गुलो वा हस्तः। 'दर्वी'त्यरुणदत्तः। स्रजमथनात् क्वाथादयः सम्यक् संयुक्ताः सम्यग् योगमारभन्ते तथा 'ब्रह्मदक्षे'त्यादिना चाभिमन्त्रितम्। वस्तौ प्रक्षिप्य आवाप्य पायौ गुदे प्रणयेत्। नात्युष्णशीतलं नात्युष्णं नातिशीतम्। नातिशब्दप्रयोगादत्र मध्यमावस्थानुगमः। एवमुत्तरत्रापि। नातिस्निग्धं न वातिरूक्षं नातितीक्ष्णं नातिमृदु (तथातिनाच्छं 'तथा नात्यच्छं) नातिसान्द्रं नातिघनं नोनं नातिमात्रं नापटु नालवणं न चातिलवणम्। तद्वदम्लं चेति नानम्लं नात्यम्लम्। एवं भूतं ब्रह्मेत्यादिनाभिमन्त्रितमनुरूपप्रमाणं वस्तौ प्रक्षिप्य पूर्ववद् गुदे प्रणयेत्। अत्युष्णादिगुणयुक्तस्य वस्तेरबाधकरत्वम्। वचनं हि—

"स्तम्भं विधत्तेऽतिमृदुर्हिमश्च
तप्ताम्लतीक्ष्णो च भिदारमोहान्।
स्निग्धोऽतिजाड्यं पवनं तु रूक्ष-
स्त्वनल्पमाटोपणस्त्वयोगान्॥
करोति मात्राभ्यधिकोऽतियोगं
क्षोभं तु सान्द्रः सुचिरेण वैति।
दाहातिसारौ लवणोऽति कुर्यात्
तस्मात् सुयुक्तं सममेव दद्यात्॥"

सम्मतमन्यमतमभिधत्ते —

पठन्त्यन्ये तु तद्विदः ॥ ४३ ॥
मात्रां त्रिपलिकां कुर्यात्स्नेहमाक्षिक्कयोः पृथक् ।
कर्षांधं माक्षिकस्यैव स्नेहे कल्कपलद्वयम् ॥ ४४ ॥
सर्वद्रवाणां शेषाणां पलानि दश कल्पयेत् ।

पठन्तीत्यादि । अन्ये पुनराचार्याः तद्विदो वस्तिविदः एवं पठन्ति कथयन्ति । चस्तेर्मानमेवमाहुरित्यर्थः । स्नेहस्य मधुनश्च पृथक् त्रिपलिकां मात्रां त्रीणि त्रीणि पलानि कुर्यात् । माक्षिकस्य स्नेहस्य कर्षार्धं द्वाभ्यां कल्कस्य पलद्वयं युञ्ज्यात् । स्नेह इति । स्नेहविषयमेतत् । सर्वद्रवाणां शेषाणां क्वाथादीनां पलानि दशसङ्ख्यानि कल्पयेदिति । एवमेतेऽष्टादशपलानि वस्तेर्मानमिच्छन्ति ॥

सम्प्रति निरूहावयवानां माक्षिकादीनामावपने क्रममाह—

माक्षिकं लवणं स्नेहं कल्कं क्वाथमिति क्रमात् ॥ ४५ ॥
आवपेत निरूहाणामेष संयोजने विधिः ।

माक्षिकमित्यादि । कटाहे माक्षिकादीन् क्रमादावपेत युञ्ज्यादित्यर्थः । प्रथम पात्रे मधु प्रक्षिप्य मर्दयेत् । ततस्तत्रैव लवण क्षिप्त्वा मर्दयेत् । ततस्तत्रैव स्नेहमवाप्य मर्दयित्वा मिश्रयेत् । ततः कल्कं क्षिप्त्वा मृद्नीयात् । ततः क्वाथमासिच्य स्वजेनाहन्यात् । एवं योजना भेषजस्यैकरूपत्वमापद्यते हेतुरित्यर्थः । एवं योजने द्रव्याणि समरसतां यान्ति । समरसभावेन च निरूहस्य सम्यग् योगो भवति । क्वाथमित्युपलक्षणं मांसरससुराशुक्तादीनां ग्रहणार्थम् । निरूहाणां संयोजने मिश्रणे एष विधिः प्रकार । धान्वन्तरीयाः पुनराहुः—

"दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतद्वयम् ।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतत्रयम् ॥
स्वजेन मथिते तस्मिन् देयं कल्कपलद्वयम् ।
एकीभूते ततः क्वाथं चतुष्प्रसृतसंमितम् ॥
वितरेच्च तथावापमन्ते द्विप्रसृतोन्मितम् ।
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत् ॥"

इति ॥ मांसरसशुक्ताक्षिकक्षीरमूत्राणामावापसंग्रामयोगोपदेशः क्रियते —

"पिचुवर्त्या पिधायाग्रच्छिद्रं नेत्रमधोमुखम् ।
कृत्वा निजपदाङ्गुल्योर्मध्ये पादान्तरेण तत् ॥
आक्रम्य मूलसम्बन्धं चर्म सम्यक् प्रसार्य च ।
संगृह्य भेषजं क्षिप्त्वा बध्नीयात् सुसमाहितः ॥
पुनर्नेत्राग्रमुन्नाम्य पिचुवर्तिमपास्य च ।
वामहस्तेन नेत्राग्रं दक्षिणेन तु भेषजम् ॥
गृहीत्वा प्रणयेत् पायाविति वस्तिविदां मतम् ।"
इति ॥

उत्तानो दत्तमात्रे तु निरूहे तन्मना भवेत् ॥ ४६ ॥
कृतोपधानः सञ्जातवेगश्चोत्कुटिकः सृजेत् ।
आगतौ परमः कालो मुहूर्तो मृत्यवेऽपरः ॥ ४७ ॥
तत्रानुलोमिकं स्नेहक्षारमूत्राम्लकल्पितम् ।
त्वरितं स्निग्धतीक्ष्णोष्णं वस्तिमन्यं प्रपीडयेत् ॥ ४८ ॥
विदध्यात्फलवर्तिं वा स्वेदनोत्त्रासनादि च ।

उत्तान इत्यादि । निरूढे दत्तमात्रे तु उत्तानशायी स्यात् । वस्तिशक्तेर्देहव्याप्त्यर्थं तन्मनाश्च निरूहवेगप्रत्यागमने निहितमना दत्तावधानो भवेत् । कृतोपधानस्तिष्ठन् सञ्जातवेगश्च उत्कुटिकः सन् निसृजेत् त्यजेत् वेगमिति शेषः । उत्कटिक उत्तटिक इति वा पाठः ॥ निरूहस्यागतौ प्रत्यागमने प्रवृत्तौ परमः कालो मुहूर्तो नाडिकाद्वयम् । अपरः तस्मान्मुहूर्तादन्य द्वितीयो मुहूर्तो निरूहस्यागमनकाले मृत्यवे मरणाय स्यात् । तत्र मुहूर्तात् परमनागमने निरूहस्य त्वरितं वेगेनानुलोमिक वायोरानुलोम्यकरम् अपरं वस्तिं निरूह प्रपीडयेद् योजयेत् । क्षारो लवणादियवक्षारो वा । तथा मूत्रमम्लकाञ्जिकादि एतैः कल्पितं तथा स्निग्धं तीक्ष्णमुष्ण च एवंविध वस्त्यन्तरं पीडयेत् । आनुलोमिक इत्यध्यात्मादित्वात् ठक् । स्नेहयोगादेव स्निग्धत्वे सिद्धे पुनः स्निग्धग्रहण पूर्वसान्निरूहात् स्निग्धतरत्व प्रतिपादनार्थम् ।

"तीक्ष्णत्वं मूत्रपांश्वग्निलवणक्षारसैन्धवे ।
भोजनकाल विधानन्य श्लीगन्धैर्मार्दव तथा ॥"

इति तन्त्रान्तरे । आनुलोमिकस्नेहेति केचित् पठन्ति । अथवा फलवर्तिं विदध्यात् । फलवर्तिः पूर्वोक्ता । उदावर्ते च वक्ष्यमाणा । तथा स्वेदनोत्रास-नादि च वस्तिव्यापत्सि युक्त विदध्यात कुर्यात् । उत्तमन खड्गादिना ॥

स्वयमेव निवृत्ते तु द्वितीयो वस्तिरिष्यते ॥ ४९ ॥
तृतीयोऽपि चतुर्थोऽपि यावद्वा सुनिरूढता ।

स्वयमेव निवृत्ते वस्त्यन्तरप्रयोगादियत्नमन्तरेण प्रवृत्ते निरूहे सति द्वितीयो वस्तिनिरूह इष्यते । तृतीयोऽपि चतुर्थोऽपि वस्तिरिष्यते । अपिशब्दः समुच्चये । स्वय मरणेन यत्नविशेषेण निवृत्ते तदह. पुनर्वस्त्यन्तरप्रयोगप्रति-षेधं दर्शयति । यत्नविशेषेण निवृत्ते सति द्वितीयादिर्वस्तिर्नेष्यत इत्युक्त भवति । यावद् वेति । पञ्चमादयोऽपि वस्तयो देया । यावत् सम्यङ् निरूढत्व स्यात् । सुनिरूढलक्षणे जाते एव वस्तिप्रयोगनिवृत्तिरित्यर्थः ॥

कानि पुनः सम्यङ् निरूढलिङ्गानीत्येत आह-

विरिक्तवच्च योगादीन् विद्याद्

विरिक्तवादित्यादि । यस्तो च विरिक्त इव योगायोगातियोगान् विद्यात् । तत्र चोक्त— "दत्तुक्ष्यशुद्धिरुचिरि"त्यारभ्य 'यावद् भवन्त्यति विरिक्तस्य तथातिवमनान्नया' इति ॥

योगे तु भोजयेद् ॥ ५० ॥
क्षीणेन वारिणा स्नातं तनु धन्वरसौदनम् ।

योगे निरूहस्य सम्यग् योगे तु सति सुखोष्णजलेन स्नात धन्वमांस-रसौदन जाङ्गलमासरसेन युक्त शाल्योदन भोजयेत । ननु "यूषक्षीररसै क्रमाद्" इति वक्ष्यति । तत् कथमिहैतदुपपद्यते । ब्रूम । यानविकारशमनार्थो हि निरूह प्रायेणेष्यते । तस्मिंश्च रसौदनमेव पथ्य श्रेय. । अग्ने च दोषापे-क्षया पथ्य विशेषेणोपदेक्ष्यते इति न किञ्चिदनुपपन्नम् । ननु दोषनिर्हरण विरेकवमनाभ्यामिधानेन नियते । तत्र च यथा पेयादिक्रम उक्तस्तथेहापि युक्त स्यात् । नैवम् । विरेकवमनाभ्या हि बहिरयानमाच्छाद्यते । तेनाग्निमान्सं

च भवति । निरूहस्तु नाभेरूर्ध्वमगच्छन्नेव दोषनिर्हरणं करोति । तेन तत्र नाभिमान्द्यापत्तिः । तस्मान्नात्र पेयादिक्रमः । अपि च वातविकारविषयत्वाच्चात्र रसौदनप्रायमेव पथ्यं युक्तम् । हाटकोऽप्याह—"वमनविरेचनयोरन्यधिष्ठान-प्राप्तौ तच्छादनादग्निमान्द्यम् । अतः क्षामताप्रकर्षजनकत्वात् सद्यो दोषहरत्वाच्च भोजनक्रमभेदः" । परतन्त्रेऽपि—

"उक्तमामाद् विशुद्धस्य निरूहेण रसादिकम् ।
किमर्थं विहितं भोज्यं न क्रमो यो विरिक्तवत् ॥
विरेकः पावकं हन्ति तदधिष्ठानसंश्रयात् ।
न तु बस्तिस्तथा तस्मात् क्षेपयानि सोऽनलम् ॥"

इति । अन्यत्रापि —

"विशुद्धौ मण्डपेयादिर्विरेकादौ विधीयते ।
कथमत्र विशुद्धौ स्यादनुज्ञा भोजनं प्रति ।
अत्रोच्यते विरेकादौ बहिराच्छाद्यते मलः ॥
नाभिमात्रगतिर्बस्तिर्नाग्न्यवच्छादनक्षमः ।
अतो भोजनमुद्दिष्टं न पेयादिरिति स्थितिः ॥"

तादृशस्य भोजनस्य फलमाह —

विकारा ये निरूढस्य भवन्ति प्रचलैर्मलैः ॥ ५१ ॥
ते सुखोष्णाम्बुसिक्तस्य यान्ति भुक्तवतः शमम् ।

विकारा इत्यादि । निरूढस्य कृतनिरूहस्य प्रचलैर्मलैः प्रकर्षेण चलैर्दोषैर्ये विकाराः शूलदाहगुरुत्वादयो भवन्ति ते विकाराः कोष्णाम्बुस्नातस्य कृतभोजनस्य पुरुषस्य सद्यः शमनं गच्छन्ति । अत एव तत् कार्यमिति भावः ॥

अथ वातार्दितं भूयः सद्य एवानुवासयेत् ॥ ५२ ॥

अथेति । अथ निरूहादनन्तरं वातपीडितं पुरुषं भूयो निरूहे कृते सद्यस्तस्मिन्नेवाहनि रात्रावनुवासयेद् वातहरैरास्थापनद्रव्यैः सिद्धेन तैलेन । आगमो हि — 'यथा वातघ्नैर्द्रव्यैः साध्यते निरूहः, एवं पित्तश्लेष्महरैश्च आस्थापनद्रव्येभ्यः आनुवासनिकः स्नेहः कर्तव्यः शिरोविरेचनादयः' इति न्यसेत् ॥ ५२ ॥

१, 'विरूढस्य' मुद्रिताम्रडूबपाठः ।

सम्यग्योगातियोगाश्च तस्य स्युः स्नेहपीतवत् ।

तस्यानुवासनस्य स्नेहपानस्येव सम्यग् योगादय स्युः । स्नेहपानोक्त-लक्षणवद् द्रष्टव्याः । स्नेहपीतस्येव स्नेहपीतवत् । षष्ठ्यन्ताद् वति । 'नत्र वातानुलोम्यमि'त्यादि 'घ्राणवक्त्रगुदस्रवाः' इत्यन्तं स्नेहपानस्य सम्यग्योगातियोगलक्षणम् ॥

अन्यदप्यनुवासनस्य सम्यग योगलक्षणमाह —

किञ्चित्कालं स्थितो यश्च सपुरीषो निवर्तते ॥ ५३ ॥
सानुलोमानिलः स्नेहस्तत्सिद्धमनुवासनम् ।

किञ्चिदित्यादि । चशब्द पूर्वोक्तानुवासनसम्यग्योगलक्षणसमुच्चयार्थः । किञ्चिदल्पमात्र कालं कोष्ठाभ्यन्तरे स्थितः सन् सविट्कं सानुलोमानिल. सानुगुणपवनः प्रवृत्तवातसहितो यः स्नेहो निवर्तते निस्सरति एवंभूतश्च स्नेह., तदित्यनुवासनापेक्षया नपुसकनिर्देश । सिद्ध कृतफलम् । अभिमतकार्यकारि अनुवासन समस्त व्यस्त चेद सिद्धानुवासनलक्षणम् ॥

इदानीमनुवासनस्य प्रयोगभेदान् दर्शयन्नाह—

एकं त्रीन्वा बलासे तु स्नेहबस्तीन् प्रकल्पयेत् ॥
पञ्च वा सप्त वा पित्ते नवैकादश वानिले ।
पुनस्ततोऽप्ययुग्मांस्तु पुनरास्थापनं बलैः ॥ ५५ ॥
कफपित्तानिलेष्वन्नं यूषक्षीररसैः क्रमात् ।

एकं त्रीनित्यादि । हारीतोऽपि 'वातस्य दोषान्तरसंसृष्टस्य च बस्तिमाहे'त्याह । श्लेष्मविकारे स्नेहबस्तेरमुख्यत्वादल्पवक्तव्यत्वाच्च क्रमाभावेनेदमुच्यते । अग्र्यहित पूर्वमिति वातस्य प्रथमपाठे युज्यते इति चेत्—सत्य । स्नेहस्य प्रथमपाठः समासविषय । अल्पवक्तव्यस्य प्रथमोक्तिरिति प्रथमविषया अत्र विपर्ययाख्या तन्त्रयुक्तिर्वा । स्नेहबस्तीननुवासनानि एक त्रीन् वा बलासे श्लेष्मविकारे प्रकल्पयेत् । कार्ये कारणोपचारादेवमुक्तम । एवमग्रेऽपि चिन्त्यम् । पित्ते पित्तविकारे पञ्च स्नेहबस्तीन् अथवा सप्त दद्यात् । वातार्तस्य तु युग्मा अपि देया एव । तथैवामुनैवाग्र्यग्रहणे —"ग्र्याग्रामनित्यान्

दीप्ताग्नीन् रूक्षांश्च प्रतिवासरम् ' इति। अनिले वाते वातविकारे नवैकादश वा स्नेहवस्तीन् दद्यात्। यद्यपि अस्तिर्वातप्रधानेषूक्तः, तथा पित्ते श्लेष्मणि नाशशक्तिर्विद्यत एव। ततः पुनरप्ययुग्मान् वस्तीन् प्रकल्पयेत्। ततः पुनरप्यास्थापनं दद्यात्। अर्थ.— मृदुमध्यादिमात्राभेदात् वायोस्त्रिविधस्य वा अप्रशमे भूयोऽप्ययुग्मान् प्रयोजयेत्। अयुग्मस्य वस्तेर्वातप्रशमनत्वं प्रभावात्। अपि च अयुग्मप्रयोगो मङ्गलार्थः। अयुग्मस्य मङ्गलत्वं स्मृतिसिद्धम् —

"अयुजो भोजयेद् विप्रान् मङ्गलार्थेषु कर्मसु।"

इति। वक्ष्यति च—'अयुग्माश्च मृगा. शस्ताः' इति। अयुग्मवचनं चैतं बाहुल्येनायं व्यवहारो युक्त इति प्रतिपादयितुम्। वातार्तस्य तु युग्मपित्तश्लेष्मणोः क्रमान्तरोपदेशाद् वातावृतयोरेवमयुग्मं कर्तव्यमित्यर्थ.। तथा चागमः —

"एकं तथा त्रीन् कफजे विकारे
पित्तात्मके पञ्च तु सप्त वापि।
वाते नवैकादश वा पुनर्वा
वस्तीनयुग्मान् कुशलो विदध्यात्" ॥

इति।

कृतास्थापनस्य तु पथ्यमन्नं श्लेष्मपित्तप्रवनेषु तु यथासङ्ख्यं यूषादिभिः सहोपयोक्तव्यम्। हृद्याकारस्त्वाह—'तत इति आस्थापनेन शोधने जाते कफादिषु यूषादिभिः सह भोजनं कुर्यात्। क्रमादिति पूर्वोक्तः कफादिक्रमः" इति ॥ ५५ ॥

इदानीं वातादिक्रमेणैव वस्तीनाह—

वातघ्नौषधनिष्क्वाथः स्निग्धतासैन्धवैर्युतः ॥ ५६ ॥
वस्तिरेकोऽनिले स्निग्धः स्याद्वाम्लोष्णरसान्वितः।

वातघ्नेत्यादि। यदा धान्येवानिलो वायु. कुपितस्तदा वातघ्नौषधनिष्क्वाथादिगुण एक एव वस्तिर्निरूहो हितः, योज्य इति वा। वातघ्नानि दशमूलादीनि तत्क्वाथेन स्निग्धया सैन्धवेन च युक्तः। स्नेहादिना च स्निग्धो मधुराम्ललवणयुक्त एको वस्तिर्हितः। स्निग्धेत्यनेन 'सर्पिस्तैलवसामज्ञामि'ति हाटकः ॥

ननु वातादिषु वक्ष्यमाणबस्त्यादिशब्द विरोध अस्मिन्नध्याये सदृक्षवचनात् । ब्रूमः । दोषाणा विकारप्राबल्यापेक्षया तद्वचन दोषविकाराप्यपेक्षया एक श्लेष्मा बलास इत्यादि इद तु दोषमात्रापेक्षयाल्पदोष । दोष विकारकरणोन्मुख इति यावत् । अनया प्रकारान्तरेण बस्तिप्रयोगमेवाह —

उत्क्लेशनं शुद्धिकरं दोषाणा शमनं क्रमात् ।
त्रिधैनं कल्पयेद्बस्तिमित्यन्येऽपि प्रचक्षते ॥ ६१ ॥

उत्क्लेशनमित्यादि । अन्येऽप्याचार्या वैद्या वा । दोषयोगपथहरणे उत्क्लेशनादिभेदेन त्रिधैव बस्तिं कल्पयेदिति जगदु । उत्क्लेशनं शुद्धिकरं दोषाणा शमनमिति प्रतिदोष बस्तित्रय मयोज्यमिति तेषा पक्ष ॥ ६१ ॥

एतु मतमु किमीय मत आह्यमित्याह —

दोषौषधादिबलतः सर्वमेतत्प्रमाणयेत् ।

दोषेत्यादि । आदिशब्देन देशकालादेर्ग्रहणम् । दोषभेषजदेशकालात्म्यसत्त्वादिबलात् सर्वं मतभेदेनोक्तमेतत् प्रमाणयेत् समर्थयेत् । निर्भिनुयादित्यर्थ ॥

अथ सर्वमानुमानिकमाह —

सम्यङ्निरूढलिङ्गं तु नासम्भाव्य निवर्तयेत् ॥ ६२ ॥

सम्यङ् निरूढलिङ्गं तु असम्भाव्यासम्भाव्य न निवर्तयेत् । बस्तिप्रयोग न विरमयेदिति निष्कृष्टोऽर्थ. ॥ ६२ ॥

इदानीं कर्मकालयोगाख्यान बस्तिविशेषाणाह[1]

प्राङ् स्नेह एक पञ्चान्ते द्वादशास्थापनानि च ।
सान्वासनानि क्रमेण त्रिंशदीरिता ॥ ६३ ॥[2]

प्रागित्यादि । प्राक् पूर्वे स्नेहाग्नि । अन्तेऽन्ते पञ्च स्नेहा । तथा द्वादश निरूहा यावत्प्रमाणस्नेहव्यापत्तिरिता । इत्येव त्रिंशद्बस्तय कर्मेति गदिता ॥ ६३ ॥

काल. पञ्चदशैकोऽत्र प्राङ् स्नेहोऽन्ते त्रयस्तथा ।
षट् पञ्चवस्त्यन्तरिता

पञ्चदश यस्य काल उच्यते । कथमित्याह — एक पूर्वं स्नेहस्तथा अन्ते त्रय स्नेहा । तथा षट् स्नेहा पञ्चभि स्वस्वबस्तिभिरन्तरिता इति ॥

---

१ निरो, २ अनुवासनाद्यनुवासनाग

योगाऽष्टौ वस्तयोऽत्र तु ॥ ६४ ॥

त्रयो निरूहाः स्नेहाश्च स्नेहाद्यन्तयोरुभौ ।

अष्टौ वस्तयो योग उच्यते । कथमित्याह—त्रयो निरूहाः त्रीणि चानुवासनानि । तथा आद्यन्तयोर्द्वौ स्नेहाविति । यदा बस्तिः प्रयुज्यते सुदृढव्याधौ, तदा त्रियोगेनैकमस्थान्यतमो योज्यः, न तु यथेच्छमिति । हृदयकारोऽप्याह—

"त्रिविधा वस्तयः कर्मकाल्पयोगाद्भवाः क्रमात् ।
बल्कालविभागज्ञैर्योज्या. स्वस्थे सुरात्मनि ॥
स्वस्थस्य व्याधिभूपत्तमात्रेष्वपि चिकित्सके. ।
प्राक् स्नेह एक इत्याद्यास्ते सुबोधतमा स्मृताः ॥"

इति । तेषां सञ्ज्ञाकथन व्यवहारार्थमेव । एव ये प्रयुज्यन्ते तेषां कर्मादिसंज्ञा विद्यत इति सूचयितुम् ॥

स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ॥ ६५ ॥
उत्क्लेशाग्निवधो स्नेहान्निरूहान्मरणं भयम् ।

स्नेहवस्तिमथवा निरूहमेकमेव केवलम् अतिशयेन निरन्तर न तु शीलयेत् । कुत, यस्मादुत्क्लेशो दोषाणामग्निवधो हानिर्नित्य स्नेहादतिशीलिताज्जायते । निरूहादतिशीलितात् वातात् भयं जायते । 'अनुवासनस्य केवलस्य प्रयोगे शरीरस्य क्लिन्नताभिषश्च स्यात् । निरूहात् केवलात् वातकोपतो भय च स्यात्' इति हृदयकारः ॥

तस्मान्निरूढः स्नेह्यः स्यान्निरूढश्चानुवासितः ॥ ६६ ॥
स्नेहशोधनयुक्तैवं वस्तिकर्म निदोषजित् ।

अतोऽस्मात् कारणान्निरूढ इतनिरूह नर स्नेह्य अनुवास्यः अनुवासनार्हः । अनुवासितश्च कृतानुवासन पुरुषो निरूहणार्हो भवेत् । एवं स्नेहनशोधनयुक्तया पूर्वक्रिया वस्तिकर्मैवित निदोषजित् भवति त्रीन् दोषान् जयति ॥

अधुना मात्रावस्तिं लक्षयति—

द्वयया स्नेहपानस्य मात्रया योजितक्रमः ॥ ६७ ॥
मात्रावस्तिः स्मृतः स्नेहः

हस्वयेत्यादि । स्नेहपानस्य ह्रस्वया यामद्वयजरणलक्षणया स्नेहमात्रया समम्तुल्यो योजित स्नेहो मात्रागतो वस्ति स्मृत । सद्वैरिति शेषः । अन्यैरन्यथा स्नेहमात्रोक्ता । यथा —

"षट्पला तु भवेज्ज्येष्ठा त्रिपला मध्यमा भवेत् ।
कनीयस्यर्धपला त्रिधा मात्रानुवासने ॥"

इति ॥

शीलनीयः सदा च सः ।
बालवृद्धाध्वभारस्त्रीव्यायामासक्तचिन्तकैः ॥ ६८ ॥
वातभग्नबलालपाग्निनृपेश्वरसुखात्मभिः ।
दोषघ्नो निष्परीहारो बल्यः सृष्टमलः सुखः ॥ ६९ ॥

स च मात्रावस्तिर्बालादिभि सततमेव शीलयितव्य. । स च शीलितो दोषापह. । तथा निष्परीहारोऽनियन्त्रणो बल्यम हितो निर्गतपुरीषादिकः सुखकारित्वात् सुख इति ॥ ६८—६९ ॥

इदानीमुत्तरबस्ति दर्शयति —

बस्तौ रोगेषु नारीणां योनिगर्भाशयेषु च ।
द्वित्रास्थापनशुद्धेभ्यो विदध्यादुत्तरम् ॥ ७० ॥

बस्तावित्यादि । बस्तौ बस्तिस्थाने रोगेषूत्पन्नेषु नृणामित्यर्थाल्लभ्यते । तथा नारीणां योनिगर्भाशयेषु च ये प्रोक्ता तेषु । चकारात् बस्तिरोगेषु च नारीणा योनिव्याधिषु गर्भाशयव्याधिषु बस्तिव्याधिषु चेत्यर्थ. । पाठ्यकारोऽप्याह — "बस्तौ रोगेषु नारीणा पुरुषाणा चे"ति । द्वे वा त्रीणि वा द्वित्राणि स्नान्यास्थापनानि तै शुद्धा ये शुद्धाश्च ता शुद्धा तेभ्यो नरेभ्यः स्त्रीभ्यश्च उत्तरबस्तिं विदध्यात् कुर्यात् दद्यादित्यर्थ । गुदादुत्तरेण मार्गेण नीयते इत्युत्तरबस्ति ॥ ७० ॥

अथ नेत्रप्रमाणमाह —

आतुराङ्गुलमानेन नवाग्रं द्वादशाङ्गुलम् ।
पूरं गोपुच्छवन्मूलमध्ययो कृतकर्णिकम् ॥ ७१ ॥
सिद्धार्थकप्रवेशाग्रं श्लक्ष्णं हेमादिसन्नयम् ।
कुन्दाश्वमारसुमनःपुष्पबन्तोपमं दृढम् ॥ ७२ ॥

आतुरेत्यादि । तत्रैवमुत्तरबस्तेर्वक्ष्यमाणम् आतुराङ्गुलप्रमाणेन द्वादशाङ्गुलं द्वैदर्घ्येणेत्यर्थादवसीयते । पुरुषाणामेवमिति शेषम् । स्त्रीणां तु वक्ष्यति हि — नेत्रं दशाङ्गुलमि'ति। तथा वृत्तं तथा गोपुच्छाकृति तथा मूलमध्ययोः कृतकर्णिकं मूले मध्ये चोत्पादितकर्णिकम् । अस्य नेत्रस्य बहुप्रवेशत्वान्मध्ये कर्णिका कृता । तथा सिद्धार्थक प्रतिगत्यभिति सिद्धार्थकप्रवेशं तादृशमग्रं प्रान्तो यस्य तदेवम् । तथा श्लक्ष्णमतिकोमलम् । हेमादिजम् आदिशब्देन(न) धात्वादयः प्रागुक्ता गृह्यन्ते । तथा कुन्दादिपुष्पवृन्तसदृशम् । अश्वमारः करवीरः । सुमना जाति. । तथा दृढम् ॥ ७१, ७२ ॥

तस्य नास्तिर्मृदुन्घुर्मात्रा शुक्तिर्विकल्प्य वा ।

तस्य नेत्रस्य नास्तिर्मृदुन्घु. योज्य. इति शेष । मात्रा शुक्ति' यर्पद्वयम शुक्ति बेहस्येति शेष । विकल्प्य वा वयोबलशरीराणि मात्रा कार्येत्यन्वय' । शुक्तेरर्धपलान्यूनाधिका वा मात्रा देहबलापेक्षया कल्प्येदित्यर्थ । हाटकोऽपि– 'वयोबलदेहसत्त्वसात्म्यादिवशान्निरूप्य वा मात्रा कार्ये"त्याह ॥

अथ स्नाताशितस्यास्य स्नेहबस्तिविधानतः ॥ ७३ ॥
ऋजोः सुखोपविष्टस्य पीठे जानुसमे मृदौ ।
हृष्टे मेढ्रे स्थिते सर्जो शनैः स्रोतोविशुद्धये ॥ ७४ ॥
सूक्ष्मां शलाकां प्रणयेत्तया शुद्धेऽनुसीवनम् ।
आमेढ्रनाभ्यन्तं नेत्रं च निष्कम्पं गुदयक्तः ॥ ७५ ॥
पीडितेऽनुगते स्नेहे स्नेहबस्तिक्रमो हितः ।

अथेत्यादि । अथेति मङ्गले । निरूहवत् कृतमङ्गलस्यास्य रोगिणः तथा पूर्वं स्नातस्य पश्चादाशितस्य । कथमाशितस्य, स्नेहबस्तिविधानतः । तृतीयार्थे तसिल् । स्नेहवन्तौ यादृशावाहारौ विहितौ तेन कृतभोजनस्य । तथा ऋजोः सरलशरीरस्य सुखोपविष्टस्यासीनस्य । तथा सुखेनोपविष्टस्यासीनस्य । क, पीठे आसने किम्भूते, जानुतुल्ये । मृदावकठिने शिश्ने हृष्टे स्तब्धे । तथा ऋजु स्पष्टं कृत्वा स्थिते सति । शनैर्नलिकया । सूक्ष्मां शलाकां प्रणयेत् मालतीपुष्पवृन्तप्रमाणाम् । स्थूला तत्र शनैरुपात् प्रवेशायोग्या । तया शलाकया शुद्धे मेढ्रे सति अनुसीवनी (सीवनी)लक्षणं यावेद्वान्त नेत्रं प्रणयेत् । यदसुल प्रवेशयेदित्यर्थः । कथं,

---

' 'न्तर्गत' इति वाग्भटहृदयपाठ ।

गुदमिव निष्कम्पं प्रणयेत्। ततो निष्कम्पस्थापनानन्तरं पीडिते पुटके स्नेहेऽनुगते प्रविष्टे सति पाणिना नाडयेत्। स्फिग्गदित्यादिकोऽनुवासनक्रमो हितः। स्नेहवस्तिनामः स्फिक्पीटनादिः शास्त्रोक्तोऽपि गृह्यत इति वेदयम् ॥ ७३-७५ ॥

वस्तिनेत्रेन विधिना दद्यान्त्रीश्चतुरोऽपि वा ॥ ७६ ॥
अनुवासनवच्चैषं सर्वमेवास्य चिन्तयेत्।

त्रीश्चतुरो वा वस्तीननेनैव विधानेन दद्यात्। शेषं विधिपरिहारादिकं सम्यग्योगान्तिकस्योत्तरवस्तेरनुवासनस्येव चिन्तयेत्। चरकादौ चोक्तम्—

"यथादोषं प्रवेश्याथ स्नेहस्यार्धपलं नयेत्।
प्रत्यागते द्वितीयं वा तृतीयं वा प्रदापयेत् ॥
स चेदनुविशेत् तत्र स्यात् क्लेशं विड्भपतः।
पिप्पल्यागुरुधागारधूमवत्तक्रसैन्धवैः ॥
मूत्राम्लपिष्टैर्गुलिका माषसर्षपसन्निभा।
छायाविशुष्कास्ताः स्निग्धे दद्यात् सर्षपसन्निभा ॥
पूर्वं मात्रोपमाः पश्चात् तासिः स्नेहं समानयेत्।
स्नेहे प्रत्यागते दद्यादनुवासनिकं विधिम् ॥"

इति। गुलिकाप्रयोग एवानुवासनिकः क्रियाविशेषः ॥ ७६ ॥

अथ पुष्पाणनुत्तरवस्तिविधिं ननस्यं स्नानमाह—

स्त्रीणामार्तवकाले तु योनिर्गृह्णात्यपावृतेः ॥ ७७ ॥
विदध्यात् तदा तस्मादनृतावपि चात्यये।

स्त्रीणामार्तवकाले ऋतुरेवार्तवः तस्मिन्। स च 'ऋतुस्तु द्वादशनिशा' इत्यादि वक्ष्यमाण। तत्र ऋतौ योनिः कर्णौ, अपावृतेः विवृतत्वाद्दतोरुत्तरवस्तिस्वभावं स्नेहं गर्भवद् गृह्णाति। अन्यथा तु संवृतत्वान्न स्नेहमाददीत। दृष्टान्तोऽप्याह—"आर्तवकाले ऋतुजनितस्य शोणितस्य प्रवृत्तिकाले योनिर्विवृतं गृह्णाति"। तदा ग्रहणे हेतुमाह—अपावृतेः स्रोतोविवरणात्" इति। तस्माद्दतोस्तदा ऋतुकाले विदध्यात् प्रकृतत्वादुत्तरवस्तिम्। अनृतावपि चात्यये आत्ययिके तीव्रे व्याधौ समुत्पन्ने अनृतावपि विदध्यात् ॥

---

१ 'स चेदनुविशेत्' इति पाठान्तरो दृश्यते।

स्तिति मुद्गप्रवेशम । मुद्गप्रवेशाग्रमिति बोध्यम् अन्त्यलोपाल्यया तन्त्रयुक्त्या । मुद्गप्रवेशाग्रच्छिद्रमित्यर्थः । वृत्तगोपुच्छाकारादि शेषं पूर्वोक्तमत्र वेद्यम् । पुष्पवृन्तोपमं तत्र न युज्यते, यतो मूत्रस्रोतःपरिणाहं हि तद् विधातव्यं पुरुषेन्द्रियाकारम् । तथाच मुनिः—

'पुष्पनेत्रप्रमाणं तु प्रमदाना वदाङ्गुलम् ।
मूत्रस्रोतः परीणाहम्', इति । तत्र चतुरङ्गुलं यावत् प्रवेश्यम् । चतुरङ्गुलादूर्ध्वं कार्णिका कर्तव्या अतिप्रवेशनिराकरणार्थम् । न तु मेहननेत्रं इव मध्येकर्णिकेत्ययमत्रार्थः साक्षादेवोक्तोऽवगम्यमानत्वात् ।

अत एव प्रवेशप्रदेश) नेत्रप्रमाणमाह —

चतुरंगुलम् ।

अपत्यमार्गे योज्यं स्याद् द्व्यंगुलं मूत्रवर्त्मनि ॥ ७९ ॥
मूत्रकृच्छ्रविकारेषु बालानां त्र्यंकमंगुलम् ।

चतुरङ्गुलमपत्यमार्गे योज्यं स्यादिति । अपत्यमार्ग इत्यनेन स्त्रीगर्भग्रहणप्रसवादिसमर्थो सूच्यते । गर्भग्रहणप्रसवादिसमर्थायाः स्त्रियाश्चतुरङ्गुलं प्रवेशयितव्यमिति गर्भव्यापत्सु अपत्यमार्गे चतुरङ्गुलं योज्यम् । मूत्रवर्त्मनि द्व्यङ्गुलं योज्यम् । या स्त्री सुरतव्यवहारगर्भग्रहणयोग्या अथवा बालाया अप्रौढा तस्या योनौ मूत्रस्यैव केवलं मार्गः । तस्या मूत्रमार्गे नेत्रं द्व्यङ्गुलं प्रवेश्यम् । केषु रोगेषु, मूत्रकृच्छ्रविकारेषु । स्त्रीणां हि योनिमार्गो द्विविधः एको गर्भमार्गः द्वितीयो मूत्रमार्ग इति । बालानां तु स्त्रीणामेकमङ्गुलं प्रवेश्यम् । उक्तादूर्ध्वं तु प्रवेशाद्योनेः क्षतिः स्यात् । हृद्याकारस्त्वाह—"अपत्यमार्ग, इति योनौ द्वे स्रोतसी अपत्यमार्गो मूत्रमार्ग इति । योनिविभ्रंशादिषु अपत्यमार्गे चतुरङ्गुलं योज्यम् । मूत्रकृच्छ्रविकारेषु मूत्रवर्त्मनि द्व्यङ्गुलं योज्यम् । बालानां त्विति । तुर्विशेषे । नासा मूत्रमार्ग एव वस्तिप्रयोगः, एकाङ्गुलमेव प्रवेश्य स्रोतसामगम्यगृजुवितेः" इति । मारकृत् तु वेद्यमाह—"वृत्तं गोपुच्छाकारादि शेष पूर्वोक्तमत्र वेद्यम् । पुष्पवृन्तोपमं तत्र न युज्यते, यतो मूत्रस्रोतःपरीणाहं हि तद् विधातव्यं पुरुषलिङ्गाकारमि'ति। यदुवाच श्रीमानरुणदत्तो वाचाटः तदबुधैश्चिन्त्यम् । 'मूत्रस्रोतः परीणाहमि'त्यस्य ग्रन्थस्य मुनिप्रोक्तस्याप्यर्थो न ज्ञातस्तेन प्रायशः तस्मान्मूत्रस्रोत इति वराङ्गविवर मन्यमानेन । पुरुषलिङ्गाकारं करणीयमिति प्रोक्तमि'त्यादि मारकृतो मतम् । अस्माभिस्तु हाटकारुणहृदयोः प्रामाणिकयो-

मनमेवाङ्गीकृत्य व्याख्यातम् । नेत्रं दशाङ्गुलमिति । अत्राह—स्त्रीणां दशाङ्गुलं नेत्रमित्यपुक्तम्, समाननन्त्वविरोधात् । उक्तं हि मालुकिना—"पुष्पनेत्रं स्त्रीणां चतुरङ्गुलं अपत्यपथे, मूत्रनाड्यां द्व्यङ्गुलप्रवेशं, कन्यानामङ्गुलप्रवेश"मिति । उच्यते । नैतत् शास्त्यकर्तृणां मतं कायचिकित्सकानामभिप्रेतम् । सर्वेषां कायचिकित्सकानां मते दशाङ्गुलाधिकमेव नेत्रम् । तथाच मुनिः—

"पुष्पनेत्रप्रमाणं तु प्रमदानां दशाङ्गुलम् ।"

इति । हिरण्याक्षोऽप्येवमाह—

"पुष्पनेत्रं नराणां तु द्वादशाङ्गुलमिष्यते ।
चतुर्दशाङ्गुलं स्त्रीणां मांसवृत्तमकर्णिकम् ॥
विशेषस्त्वत्र नारीणां प्रमाणं चतुरङ्गुलम् ।
व्यङ्गुलं कर्णिका चाग्रात् कन्यानामङ्गुलं भवेत् ॥"

इति । भोजसारमोक्तस्य मन्थस्यापि पाठान्तरेणार्थविशेषं वर्णयन्ति केचित् । तद्यथा—'निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुले' इति । इह स्त्रीकन्यापुरुषाणां नेत्रायामपरिणाहः । स्रोतः प्रमाणं तुल्यं, प्रवेशप्रमाणं पुनरतुल्यस्यारम्भः । तथा— तदेव चतुर्दशाङ्गुलं नेत्रं मध्ये निविष्टकर्णिकं पुरुषाणां स्याद् । नारीणां चतुरङ्गुले निविष्टकर्णिकं स्यात् कन्यानामङ्गुले कार्यमिति । यद्येवं पुरुषाणां निविष्टकर्णिकत्वप्रयोजनं किमिति चेत् । उच्यते 'निविष्टकर्णिकं मध्ये पुरुषाणा'मिति वचनात् सप्ताङ्गुलं परमं प्रवेशप्रमाणं नेत्रस्य भवतीत्यवगन्तव्यम् । उक्तं च क्षारपाणिना—

"अङ्गुलान्यष्ट चत्वारि पञ्च षट् वाथ सप्त वा ।
सप्ताङ्गुलं परं नेत्रं प्रविशद्याद् भिषग्वरः ॥
हिंस्याद् वक्ति नरस्येह प्रमाणादधिकं वृथा ।"

इति ॥ ७९ ॥

प्रङ्खो मध्यमा माया बालानां शुक्तिरेव तु ॥ ८० ॥

स्त्रीणामुपरितलो स्नेहस्य मध्यमा मात्रा प्रङ्खः पक्ष्म् । नोपमा कनिष्ठा वा । उपना च कल्पा । बालानां तु शुक्तिरेवार्धपलनेव स्नेहस्य मध्यमा मात्रा ॥ ८० ॥

अधुना स्नेहभाये आप स्त्रियो उत्तरबस्तावधिकारान् दर्शयति । अनुस्नानं प्रभृतिनम् ।

उत्तानायाः शयानायाः सम्यक् सङ्कोच्य सक्थिनी ।
ऊर्ध्वजान्वास्त्रिचतुरानहोरात्रेण योजयेत् ॥ ८१ ॥
ध्रस्तोत्तरात्रमेवं च स्नेहमात्रां विवर्धयन् ।
व्यहमेव च निश्रम्य प्राणिदध्यात्पुनरव्यहम् ॥ ८२ ॥

उत्तानाया इत्यादि । उत्तानायाः न त्वधुङ्मुख्याः पार्श्वस्थितायाः वा । शयानायाः न त्वासीनायाः । किं कृत्वा, सक्थिनी सङ्कोच्य । तथोर्ध्वजान्वा अहोरात्रेण त्रिचतुरान् बस्तीन् योजयेत् । अनुवासने त्वेक एव वस्तिरहोरात्रेण योज्यत इत्यस्य भेदः । ऊर्ध्वजान्वा इति । 'ऊरूतः' (४- १- ६४) इत्यूङ् । एवम्, सप्तत्र व्यहं वस्तिदानं कार्यं, न त्वनुवासनवत् ततोऽये पञ्चमे सप्तमे । किं कुर्वन्, स्नेहमात्रां यथास्वमर्धर्षादिक्रमेण वर्धयन् । तत्रैकव्यहमेव च विश्रम्य त्रीणि दिनानि विलम्ब्य ततः पुनः पूर्वोक्तेनैव प्रकारेण व्यहं प्राणिदध्यात् कुर्यादित्यर्थः । एष एव क्रमो मेढ्रेऽपि योज्यः तज्जातार्थत्वादस्यार्थस्य । अत एवान्तेऽयमुपदिष्टः उभयसम्बन्धार्थः ॥ ८२ ॥

पूर्वागतमर्थमुपसंहरन् गद्येनैव गमग्रहार्थं पुनराह—

पक्षाद्विरिक्तो वमिते ततः पक्षान्निरूहणम् ।
हृद्यो निरूढश्चान्वास्यः सप्तरात्राद्विरेचितः ॥ ८३ ॥

पक्षादित्यादि । हृदयाकारस्त्वाह— "अथ पञ्चकर्मसु चतुर्दशत्वमुक्तम् । तत्र क्रमेण दर्शितेषु एकैकस्मान्तरालिकः कियान् काल इत्याशङ्क्याह- पक्षादित्यादि" इति । उत्तमशुद्ध्या शुद्धे वमिते पक्षादनन्तरं विरेकः कार्यः । यस्मात् प्रवरया शुद्ध्या शुद्धे वमिते पेयादिक्रमेण सप्ताहात् प्रकृतिभोजनापत्तिः । ततः सप्ताहेन स्निग्धस्य विरेक इति पक्षेणैव युज्यते । ततोऽनन्तरं पक्षात् परतो निरूहो यतः कृतविरेकस्य हि सप्ताहात् प्रकृतिभोजनापत्तौ स्नेहनार्थमनुवासनेनैवान्तरितेन स्निग्धस्य निरूहो योज्य इति पक्षेणैव युक्तः । निरूढश्च सन्न एवानुवास्यः । तथा च प्रागभ्यधायि—

"अथ वातार्दित भूयः सन्न एवानुवासयेत् ।"

---

१. 'निरूहयेत्' मुद्रितपाठः

इति। विरेचितः सप्तरात्रादूर्ध्वमनुवास्यः। यत. सप्ताहेन प्रकृतिभोजनापत्तिः ततः स्नेहनार्थमनुवासनं युक्तम्। विरेकानिरूहयोर्मध्येऽनुवास्यत इत्यर्थः। हृद्याकारोऽप्याह—"वमने कृते पञ्चमनिक्रम्य विरेकः कर्तव्यः। प्रकृतिभोजनार्थं सप्ताहः स्नेहनार्थं सप्ताह इति पक्षोक्तिः। तेनैव क्रमेण पक्षातिक्रान्तिः। कृतविरेकस्य निरूहणे प्रकृतिभोजनार्थं सप्ताहः। अनुवासनस्यैकदिनान्तरितस्य सप्ताहः कृतनिरूहः सप्त एवान्वास्यः। कृतविरेचनस्य सप्तरात्रातिक्रान्तौ स्नेहवस्ति"रिति ॥ ८३ ॥

विरेचननिरूहयोर्मध्येऽनुवास्यस्य किं भोजनमित्याह—

यथा कुसुम्भादियुताच्चोयाद्रागं हरेत्पटः।
तथा द्रवीकृताद्देहाद्दोषान्निर्हरते मलान् ॥ ८४ ॥

यथेत्यादि। यथा ननु दोषाणां धातूनां च स्नेहस्वेदाभ्यां प्रकर्षोत्कर्षभावात् कथं वस्तिर्दोषानेव निर्हरेत् न धातूनित्येवमर्थं दृष्टान्तप्रदर्शनपरिजिहीर्षुराह— यथा कुसुम्भमञ्जिष्ठादियुक्तात् चोयात् पटो रागं हरन् गृह्णाति, न तु जलम्। हाटकोऽपि—"यथा पटो रागं गृह्णाति जलं त्यजत"-मित्याह। अरुणदत्तस्तु "यथा पटो रागं गृह्णाति न कुसुम्भादिकम्"इत्याह। तद्वत् स्नेहस्वेदद्रवीकृताद् देहाद् दोषः धातुसाम्येऽवस्थानेऽपि वस्तिर्मलान् दोषानेव दुष्टान् निर्हरेत् न धातूनिति। हाटकस्त्वाह—"इति दोषाणां किञ्चिदुद्रेके क्रमः। भूयोऽल्पेऽन्यः, संसर्जनानन्तरमेव सप्तरात्रेण शुद्धेः"। आगमो हि—

"नरो विरिक्तस्तु निरूहदानं
विवर्जयेत् सप्तदिनान्यवश्यम्।
शुद्धो निरूहेण विरेचनं च
तद्वच्च शून्यं विकषेच्छरीरम्॥"

इति। अर्थः—चतुष्कोटिकं चात्र; विरेचनानिरूहस्य निरूहाद् विरेचनस्य विरेचनाद् विरेचनस्य वमनाद् वमनस्य चेति। शोधनरूपत्वाद् वमनस्यापि विरेचनसंज्ञा स्वीकृतेति जज्जटः॥ ८४ ॥

अथ वायोः स्वरूपं प्रथयन् वस्तिं श्लाघयन्नाह—

शरीरगताः कोष्ठगताश्च रोगा
मर्मोर्ध्वसर्वावयवाङ्गजाश्च।

ये सन्ति तेषां न तु कश्चिदन्यो
वायोः परं जन्मनि हेतुरस्ति ॥ ८५ ॥

शाखागता इत्यादि। हृद्याकारोऽपि "वर्त्तिं स्तौती"त्याह। द्वे सक्थिनी द्वौ बाहू इति शाखाः तासु गतास्तदुत्पन्नाः। एव कोष्ठो महास्रोतः तत्र गताः। तथा मर्माणि च ऊर्ध्वं च सर्वावयवाश्च मर्मोर्ध्वसर्वावयवाः तेषामङ्गं तत्र जाताः मर्मोर्ध्वसर्वावयवाङ्गजा.। तत्र मर्माणि तलहृदादीनि मर्मविभागे वक्ष्यन्ते। ऊर्ध्वशब्देन ऊर्ध्वजत्रुगृह्यते। तत्र जाता मुखरोगादयः। सर्वाङ्गजा ज्वरादयः। अवयवजा. श्वित्रादयो रोगाः। हृद्याकोऽप्याह—"द्वे सक्थिनी द्वौ बाहू च शाखा तद्गतास्तदुत्पन्ना। तथा कोष्ठगताः। तथा मर्माणि च ऊर्ध्वं च सर्वं चावयवाश्च मर्मोर्ध्वसर्वावयवाः तेषु जाताः। तत्र मर्माणि तज्जा वक्ष्यन्ते। ऊर्ध्वजत्रुजाता मुखरोगादय.। सर्वाङ्गजा ज्वरादयः। अवयवजाः श्वित्रादयः" इति। हृद्याकारस्त्वन्यथावोचत्—"शाखा रक्तादयः। कोष्ठमुदरम्। मर्मोर्ध्वसर्वावयवाङ्गजाश्चेति मर्मजा ऊर्ध्वसर्वावयवजा अङ्गजाः सकलशरीरजाता ये व्याधयः" इति। तेषां जन्मन्युत्पत्तौ वायोरपर. कश्चिदपि हेतुर्नास्ति। परम् अतिशयेन इतरयोरपि दोषयोः प्रेरको वायुरिति। किञ्चिन्मात्रेणानुबलभावेन पित्तश्लेष्माणावपि हेतू भवत एव, यथा पामाददद्रवादीनाम्। ततस्तेषां जन्मनि वायुरेव कारणम्। अवयवग्रहणेनैवोर्ध्वग्रहणे लब्धेऽप्यूर्ध्वग्रहणं प्राधान्यख्यापनार्थं, यथा "ब्राह्मणा आयाताः वसिष्ठोऽप्यायात." इति। एतदेवाधिकृत्य वक्ष्यमाणाः पञ्च विधय. सकलमेवोचरतन्त्रम्। तस्मात् प्रधाना ऊर्ध्वाङ्गजाः॥ ॥ ८५ ॥

ननु कुतो हेतोर्मारुत एतेषु कारणमित्याह—

विट्श्लेष्मपित्तादिमलाचयानां
विक्षेपसंहारकरः स यस्मात्।
तस्यातिवृद्धस्य शमाय नान्य-
द्वस्तेर्विना भेषजमस्ति किञ्चित् ॥ ८६ ॥

विडित्यादि। विट् च श्लेष्मा च पित्तं च विट्श्लेष्मपित्तानि तान्यादियेषाम्। आदिशब्देन मूत्रस्वेदादिपरिग्रहः। त एव शरीरमलिनीकरणान्मलाः तेषामाचयाः सञ्चयाः समुदायाः तेषाम्। स वायुर्यस्माद् विक्षेपसंहारकरः। विक्षेपश्च

संहारश्च तौ करोतीति । 'कृन्नो हेतु—'(३-२-२०)इत्यादिना हेतौ टः । दिशे-षसंहारकरणे हेतुरित्यर्थः, तस्य क्रियावत्त्वात् । वायुश्च शेषदोषाभ्यां न कदाचिद् विक्षिप्येन न सद्दियते वा, तयोर्निष्क्रियत्वात् । तस्मात् तस्य वायोरतिवृद्धस्य शमनार्थं वस्तिमन्तरेणापरं भेषजं नास्ति । स्नेहस्वेदादिकं तु विद्यमानमपि न तथा समर्थमित्यगण्यत्वात् तदविद्यमानमित्युच्यते ॥ ८६ ॥

तस्माच्चिकित्सार्ध इति प्रदिष्टः
कृत्स्ना चिकित्सापि च वस्तिरेकः ।
तथा निजागन्तुविकारकारि-
रुक्तौषधत्वेन भिषग्व्यथोऽपि ॥ ८७ ॥

'तस्मात्' प्रधानदोषपवनशमनार्थत्वात् कारणाद् 'वस्तिश्चिकित्सार्ध' इति कश्चित् एकेराचार्यः । सकला वा चिकित्सा वस्तिः प्रदिष्टः इति कायचिकित्स-कानां पक्षः । तथाहि—त्रिदोषघ्नो हि वस्तिरिति । आगमो हि—"अथ मारुतं पित्तश्लेष्मसहितं वस्तिः समूलमेवाकर्षति ।

वस्तिर्बलं स्थापयिता बलघ्नु-
स्त्वग्मांसमेधाबलवर्णकर्ता ।
सर्वार्थकारी (शुद्ध! गिशु) वृद्धयुना
निरत्ययः सर्वगदापहश्च ॥"

इति । सर्वार्थकारित्वं स्थौल्यैकार्श्यधातुसाम्यापादनात् । त्रिदोषघ्नत्वात् सर्वग-दापहत्वं चेति । ननु 'चतुर्णां भिषगादीनामि'त्यादिलक्षणा चिकित्सा । तत् कथं भागकल्पना कर्तुं युज्यते । न च सर्वा चिकित्सा वस्तिरिति वक्तुं शक्यते । शेषचिकित्साशास्त्रविस्तरस्यानर्थक्यप्रसङ्गात् । तस्मादेतदयुक्तमिवाभाति । अत्रोच्यते । वायुविकारा अशीतिरुक्ता । पित्तश्लेष्मविकाराश्च षष्टिरुक्ताः । तत्र वायुविकाराणां प्रधानोपक्रमो वस्तिः । तस्माच्चिकित्सार्धं वस्तिः कार्यद्वारेणोक्तः । अथ मारुतं पित्तश्लेष्मविदूषितं वस्तिः समूलमेवाकर्षतीति सर्वैव चिकित्सा कार्यद्वारेण वस्तिरेकेऽदिष्टः । अन्यत्रापि चैव मायो निर्देशः कृत एवाचार्यैः । तथा च मुनिः— 2425 8

"यानीह कर्माण्युक्तानि विसर्पाणां निवृत्तये।
एकतस्तानि सर्वाणि रक्तमोक्षणमेकत" ॥

इति। चिकित्सार्धमित्ययं तु पाठो न युक्त एव। अर्धशब्दस्य हि समप्रतिभाग एव नपुंसकत्वम्। न चात्र समप्रविभागो गम्यते। तस्मान्नपुंसकत्वमत्रान्याय्यम्। तथेत्यादि। तथा वस्तिवत् सिराव्यधोऽपि। अर्थ — न केवलं वस्तिर्यथावत् सि-
* राव्यधोऽपि चिकित्सार्धः सर्वा वा चिकित्सेत्युपदिष्टः इति शल्यकृन्तकाः। कथं, निजा वातादिसमुत्था, आगन्तवोऽभिघातादिसमुत्था, निजाश्च आगन्तवश्च ते च ते विकाराश्च निजागन्तुविकाराः, तान् कर्तुं शीलं यस्य तत् निजागन्तुविकारकारि, तद्रक्तं च निजागन्तुविकारकारिरक्तं तस्य रक्तस्यौषधत्वेन प्रधानौषधत्वात्। तत्र विसर्पविद्रध्यादि रोगविशेषोपशमनकारणाच्चिकित्सार्धं सिराव्यधः। तथापरेऽपि ये रोगाः शीतोष्णस्निग्धरूक्षैरुपक्रमैरनुपशान्तास्तेऽपि सिराव्यधेन साध्यन्त इति सर्वा चिकित्सा सिराव्यध उपदिष्टः। आगमो हि—

"यानीह कर्माण्युक्तानि विसर्पाणां निवृत्तये।
एकतस्तानि सर्वाणि रक्तमोक्षणमेकतः॥"

इति। चिकित्सार्धः शीतोष्णस्निग्धरूक्षैरुपक्रान्तानामपि रोगाणां साधनात् चिकित्सा सर्वा।

"शीतोष्णस्निग्धरूक्षैरुपक्रान्ताश्च ये गदाः।
सम्यक् साध्या न सिध्यन्ति रक्तजास्तान् विभावयेत्॥"

इत्यागमात्। वातादीनामुपक्रमैः शीतोष्णादिभिरप्यसाध्यानिति यावत्। तस्मात् सिराव्यध एवमुपदिष्टः। कायचिकित्सकत्वाद् वस्तिप्राधान्यमङ्गीकृत्य तन्मतसङ्गात् सिराव्यधोऽपीत्युक्तवान्। उक्तं—

"सिराव्यधश्चिकित्सार्धं वृत्तं वापि चिकित्सितम्।
शल्यतन्त्रे स्मृतं तद्वद् वस्तिः कायचिकित्सिते॥"

इति। 'निजागन्तुविकारकारि सिराव्यधोऽपि तथा, इति वृद्धाकारः॥ ८७॥

इति इदमधिकाद्यध्यायोपेतो निदानस्थानाख्यो द्वितीयोऽध्यायः।

---

* इदं वर्धनस्तर्वंचतुर्थांस्यवाक्योद्धरणरहितं दृश्यते।

अथ त्रिंशोऽध्यायः ।

पञ्चकर्मविधुक्तिरम्नायाद् वमनविरेचनाञ्जनानुवासनास्थापनशिरो [illegible] सर्वविधि वक्ष्यते इत्यादि ।

अथातो नस्यविधिमध्यायं व्याख्यास्यामः ।

वृद्धाकारोऽप्याह—

"पञ्चकर्मसु शिष्टत्वादिदानीं नस्यमुच्यते ।
नासिकाया नवाद्वित्वे यस्मात् नस्यस्य भेषजं ॥"

इति । अथवा अथ शोधनमुक्त्वा तर्पणोपयोगमाह—

ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते ।

जत्रु अक्षकयोः सन्धिः । जत्रुण ऊर्ध्वं जत्रूर्ध्वं । 'मयूरव्यंसका'दित्वात् समास । तत्र विकारादिषु ऊर्ध्वजत्रुविकारेषु जत्रूर्ध्वभवेषु विकारेषु विषये । विशेषेण नस्यमिष्यते । विशेषशब्दाद् बृंहणसिराव्यधादयोऽपि व्यन्त एव । नासया प्रणीयमानमौषधं नस्यं नासायां भवम् । "तत्र भव." (४. ३. ५३) इति यत् । 'नस् नासिक्यमा यत्तमुञ्छेषु, (वा० ६. १. ६१) इति नसावेद्यः । वृद्धाकारोऽप्याह—

"ऊर्ध्वसंभवे व्याधौ नस्यकर्मोचितोत्तमम् ।
छेदभेदसिरावेधवमनप्रच्छनादिकम् ॥
उत्तमाङ्गगदेष्विष्टं ततो नस्य विशिष्यते ।
विषदुष्टज्वरोन्मादस्मृत्यपायादिषूदितम् ॥
नस्यकर्म ततोऽप्येतदुत्तमाङ्गगदे वरम् ।"

इति । नन्वु किमिति नस्यमेषु रोगेषु विशेषेणेष्टमित्याह—

नासा हि शिरसो द्वारं तेन तद्व्याप्य हन्ति तान् ॥ १ ॥

नासा हीत्यादि । हि यस्मान्नासा शिरसो द्वारं तेन द्वारेण नासाग्रन्थेन श्रोत्रनेत्रकर्णादिशिरामुखानुप्रवेशेन तच्छिरो व्याप्य तान् विकारान् हन्ति । वृद्धाकारस्त्वन्यथा—"तेन द्वारेण तत्सर्वं व्याप्य प्राप्य तानूर्ध्वाङ्गजातान् रोगान् नाशयति । नासिकाद्वारेण शिरः सर्वं गत्वा ऊर्ध्वं जत्रूर्ध्वगतान् रोगान् प्रायशो हन्ति" इत्याह ॥ २ ॥

तच्च नस्य विरेचनबृंहणशमनभेदेन त्रिधा स्यात् । क्रमेण तेषां प्रयोगमाह—

*विरेचनं शिरश्शूलजाड्यस्यन्दगलामये ।
श्वोफगंडकृमिग्रन्थिकुष्ठापस्मारपीनसे ॥ २ ॥

विरेचनमित्यादि । शिरःशूलादिषु विरेचनं नस्यमिष्यत इति सम्बन्धः । अपस्मारो यद्यप्यूर्ध्वजत्रूत्थो न भवति, तथापि विरेचननस्येन शाम्यतीति यदुपादानम् । उपलक्षणं चेदम् । कफजेषु पीनसप्रसेकास्यवैरस्यगन्धाज्ञानादिष्वपि विरेचनमेव हितम् । हाटकोऽपि "ऊर्ध्वजत्रूपादानं बाहुल्योपलक्षणार्थम् । कफजेषु पीनसादिष्वपि विरेचनमेव हितम्" इत्याह ॥ २ ॥

बृंहणं वातजे शूले सूर्यावर्ते स्वरक्षये ।
नासास्यशोषे वाक्संगे कृच्छ्रोन्मेषेऽवबाहुके ॥ ३ ॥

वातोद्भवशूलादिषु अवबाहुकपर्यन्तेषु बृंहणं नस्यमिष्यते हितमित्यर्थः । सूर्यावर्तः शिरोरोगविशेषः । कृच्छ्रोन्मेषः कृच्छ्रोन्मीलनाख्यो वर्त्मरोगः । अवबाहुको वात(रोग)विशेषः ॥ ३ ॥

शमनं नीलिकाव्यङ्गकेशदोषाक्षिराजिषु ।

शमनं नस्य नीलिकादिष्विष्यते हितमित्यर्थः । नीलिकाव्यङ्गौ क्षुद्ररोगविशेषौ । 'वक्त्रादन्यत्र नीलिका' इति वक्ष्यति । हाटकस्तु—"नीलिका नेत्ररोगविशेषः । व्यङ्गः क्षुद्ररोगविशेषः" इत्याह । केशदोषः केशशातः ।

तेषां क्रमेण साधनान्याह—

यथास्वं यौगिकैः स्नेहैर्यथास्वं च प्रमाथितैः ॥ ४ ॥
फलकक्वाथपादिभिश्चाद्यं मधुपट्वासवैरपि ।

यथास्वमित्यादि । यथास्वं मकरणोक्तैः स्नेहैः । किंभूतैः ? यौगिकैः योगार्हैः तैलसर्षपतैलादिभिः, न तु घृतादिभिः । तथाच यथास्वं सर्षपमरिचशुण्ठ्यादिभिः प्रमाथितैः सम्भृतैः । तथा फलकक्वाथपञ्चरसादिभिश्च यथास्वं कफघ्नैर्गिरिकर्णिकादिके शिरोविरेचनानां मध्ये आद्यं विरेचनाख्यं नस्यं भवति । न केवलमेतैर्यावन्माक्षिकादिभिश्च । आद्यवो मध्यविशेषः । इत्थाकारोऽपि—

---

* विरेचनं बृंहणं च शमनं च त्रिधापि तत् ।
मुद्रितार्धेऽष्टहृदये अयमभिन्न पाठो दृश्यते ।

१. 'अपस्माहृद्धे' इति मुद्रिताष्टाङ्गहृदयपाठः ।

"योगयोग्यैः स्नेहैस्तैलवसादिभिर्यथाद्यं प्रतिदोषं रोगहरैर्द्रव्यैः सिद्धैः साधिते. कल्ककषायस्वरसचूर्णैर्मधुना सैन्धवेन च आसवैर्मद्यैश्चाद्यं नस्यं युञ्जयादि" त्याह । 'स्नेहैरिति सामान्यवचनाच्चतुर्विधोऽपि यथर्तु यथादोषं च प्रयोज्यः' इति केचित् । उक्तञ्च निमिना—

"नस्तः कर्म वसन्ते तु घृतमाज्यं तथाधिकम् ।
तथा ग्रीष्मे विरेचेन यत् स्यात् क्षीरघृतं स्मृतम् ॥
प्रावृट्काले हितं तैल शमनं यत् प्रकीर्तितम् ।
तथा शरदि हेमन्ते स्नेह तैलं समाचरेत् ।
शिशिरे च निदाघे च नस्त कर्म विवर्जयेत् ॥"

इति । भोजनाप्युक्तम्—

"स्नेहश्चतुर्विधो यस्तु नस्तो दत्तः स वै नृणाम् ।
यथास्वं विधिना युक्तो विज्ञेयो नस्यसंज्ञकः ॥
तत्र तैलं प्रधानं स्याद् विशेषेण गुणैर्मम. ।
श्लेष्मवातविरोधित्वात् सात्म्याद्दोष्यात् तथैव च ॥
वातरोगनिमित्तेषु तस्माद्योगेषु पूज्यते ।
पित्तरक्तसमुत्थेषु सर्पिर्नस्यः प्रशस्यते ॥
माधुर्याच्छीतभावाच्च सौम्यत्वात् स्नेहनादपि ।
मज्जुक्षयमामज्जमेद क्षीणेषु शस्यते ॥
वसामज्जो द्वितं तत्र स्वभानगुणयोनितः ।"

इति ॥

वृद्धणं धन्वमांसौत्थरसासृक्शूकपूरपि ॥ ५ ॥
शमनं योजयेत्पूर्वैः क्षीरेण च जलेन च ।

"विरेचनं कफहरं बृंहणं वातपित्तजित् ।
शमनं च मरुत्पित्तनाशनं नस्यमिष्यते ॥
त्रिविधस्यापि नस्यस्य बहुत्वं कल्पनावशात् ।
अस्ति साधनभेदाच्च मात्रया यत्तदुच्यते ।"

अथवाधुनान्यानपि नस्यविशेषान् उपपादयन्नाह—

मर्शश्च प्रतिमर्शश्च द्विधा स्नेहोऽत्र मात्रया ॥ ६ ॥

मर्शश्चेत्यादि । षसु स्नेहकल्कादिनस्यभेदेषु मध्ये मर्शाख्यः प्रतिमर्शाख्यश्चेति स्नेहो द्विधा भवति । कथं, मात्रया मात्राभेदेन न तु वस्तुभेदेन । मर्शप्रतिमर्शयोर्मात्रया भेदः । तौ च तैलादिभिः स्नेहः क्रियते ॥ ६ ॥

कल्काद्यैरवपीडस्तु सतीक्ष्णैर्मूर्धरेचनम् ।

कल्काद्यैरित्यादि । तुरवधारणे भिन्नक्रमः । अतीक्ष्णैः कल्काद्यैरेवावपीडसंज्ञो नस्यविशेषः, न स्नेहेन । कल्कीकृतादौषधादवाक्पीडितो रसोऽवपीडः । स चावपीडः तीक्ष्णैः शुण्ठ्यादिकल्पक्काथरसाद्यैरमृदुभिः कृतो मूर्धविरेचनं शिरोविरेचनाख्यं नामान्तरमस्य । अतीक्ष्णैस्तु शमनसंज्ञमेतत् । हाटकोऽप्याह—"स चावपीडस्तीक्ष्णैः कृतः शिरोविरेचनसंज्ञः, अतीक्ष्णैस्तु शमनसंज्ञः ।" इति ।

अस्य विरेचनस्य प्रकारान्तरमाह—

ध्मानं विरेचनश्चूर्णो

कथं पुनरसौ नासायां ध्मातव्यम् इत्याह—

ध्मानमित्यादि । ध्मानं प्रधमनाख्यं स्यात् । तत्तु विरेचनो बहिर्दोषनिरसनश्चूर्णो मरिचादिभिः कृतो नाम्ना प्रदर्शितः ॥

युञ्जीत तन्मुखवायुना ॥ ७ ॥
षडंगुलद्विमुखया नाड्या भेषजगर्भया ।
स हि भृशतरं दोषं चूर्णत्वादपकर्षति ॥ ८ ॥

तद् ध्मानं चूर्णं वा मुखवायुना हुङ्काराख्येन युञ्जीत प्रवेशयेत् । कथं, नाड्या करणभूतया । षडङ्गुलानि यस्याः सा षडङ्गुला यथास्वं षडङ्गुलायामया । तथा द्वे मुखे यस्याः सा द्विमुखा तया उभयान्तर्द्वारयुक्तया । भेषजगर्भया त्रिकटुकादिचूर्णभरितया तदन्तर्गतया । तथाविधया नाड्या करणभूतया प्रेरयेत् ।

---

१ 'मूर्धरेचन' इति मुद्रितवाग्भटहृदयपाठः

दोषानुरोधतश्च पुनः पुनरिति योजयेत् । स हि प्रयोगश्चूर्णो वा भूरितरं बहुतरं दोषं चूर्णत्वादपकर्षति निर्हरति । चूर्णत्वादिति । चूर्णत्वादेवात्यन्तं प्रत्यनीकभूतः कफस्य स्कन्दस्य द्रवीभूतस्य च विरुद्धत्वात् बहुतरं दोषं नाशयति, न तथा कल्कस्वरसादयः । तस्माद् विरेचनाख्योऽयमित्यर्थः । हृद्याकारस्त्वाह— "कल्कादैरित्यादि । कल्ककाथस्वरसचूर्णैरवपीडकसंज्ञो नस्यविशेषः सुतीक्ष्णैस्त्रिकटुकादिभिः श्लेष्महरैः कर्तव्यः । मूर्धरेचनैः शिरःशोधनैर्वेल्लादिचूर्णैः क्रियमाणस्यावपीडविशेषस्य ध्मानमिति च नामान्तरम् । तदाह —ध्मानमिति । ध्मानं विरेचनं शिरःशोधनम् । तन्मुखवायुना फूत्कारस्वरूपेण सुश्रुत्यादि"ति । अत्रैवमाह वाहटः सङ्गहे—"विरेचनचूर्णस्तु प्रधमनाख्यः । परिशेषं तु नावनमवपीडसंज्ञं च । कल्कीकृतादौषधाद्व-पीडितः स्रुतो रसोऽवपीडकमिति । अपरेषां तत्र पुनस्तीक्ष्णैर्वैशेषिकी शिरो-विरेचनसंज्ञा । तथान्ये सर्वमेव नस्यं शिरोविरेचनमित्याहुः सद्यः श्लेष्मविरेचन-सामान्यात्" इति ॥ ८ ॥

एतेषां द्रव्याणां मात्रया विशेषोऽस्तीति मात्रां लक्षयति—

प्रदेशिन्यंगुलीपर्वद्वयान्मग्नसमुद्धृतात् ।
यावत् पतत्यसौ बिन्दुर्दशाष्टौ षट् क्रमेण ते ॥ ९ ॥
मर्शस्योत्कृष्टमध्योना मात्रास्ता एव च क्रमात् ।
बिन्दुद्वयोनाः कल्कादेः

प्रदेशिनीत्यादि । प्रदेशिनी तर्जनी अङ्गुष्ठस्य समीपजा अङ्गुली, तस्याः पर्वद्वयं तस्मात् । किंभूतात्, पूर्वं स्नेहादौ मग्नात् पश्चात् समुद्धृतात् यावत्परिमाणं स्नेहादि पतति असौ बिन्दुरुच्यते इति शेषः । तावान् बिन्दु-संज्ञक इत्यर्थः । ते बिन्दवो यथासंख्यं दश मर्शस्योत्कृष्टा प्रधाना मात्रा, अष्टौ मध्यमा, षट् ऊना कनिष्ठा । ता एव मात्राः क्रमाद् बिन्दुद्वयोनाः बिन्दुद्वयवर्जिताः कल्कस्वरसादेरुत्कृष्टमध्योना मात्राः । तेनाष्टौ बिन्दवः कल्कादिरुत्तमा मात्रा, षण्मध्यमा, चत्वारः कनिष्ठेत्यवसेयम् । यावदिति यत् परिमाणमस्येति 'यत्तदेतेभ्यः परिमाणे मतुप्' 'आ सर्वनाम्नः' (६-३-९१) इत्याकारः । अथ कल्कचूर्णयोर्बिन्दुग्रहणं कथमिति चेत्—उच्यते । तोलयित्वा यावद्बिन्दून् तुल्यमानं कल्कचूर्णयोर्ग्राह्यमिति । घनीभूतस्य कल्कस्य द्रवारो-पितस्य नस्ये प्रयोगः ॥

अधुना नस्यायोग्यानाह—

योजयेन्न तु नावनम् ॥ १० ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्ताशिरःस्नातस्नातुकामश्रुतासृजाम् ॥ ११ ॥
नवपीनसवेगार्तस्रुतिकाश्वासकासिनाम् ।
शुद्धानां दत्तबस्तीनां तथानार्तवदुर्दिने ॥ १२ ॥

योजयेदित्यादि । तोयादि पीत यैस्तेषाम् । आहिताग्न्यादित्वात् परनिपात. । तथा पातुमिच्छता नस्य न योजयेत् । एषा हि नस्य नयन-नासास्योपदेहशिरोरोगान् कुर्यात् । भुक्तभक्तस्य च नस्येरितो दोष ऊर्ध्वं स्रोतास्याधृत्य छर्दिश्वासकासमतिश्यायान् जनयेत् । शिर स्नातस्य शिरोऽक्षि-कर्णशूलकण्ठरोगपीनसहनुमन्यास्तम्भार्दितशिरःकम्पान् । स्नातुकामस्य मूर्ध्नि स्तिमितो दोषो जाड्यारुचिपीनसान् । स्रुतरक्तस्य च क्षामतामरुचिमग्नि-सादं च । नवप्रतिश्यायस्य स्रोतोरोधात् कृमिकण्डूमूर्धतोदादीन् जनयेत् । मूत्रपुरीषादिवेगार्तानां भृशतर वेगरोधजान् रोगान् । सुतिकायाः स्रुत-रक्तोक्तान् दोषान् । श्वासकासिनोऽर्त्यधिवृद्धिम् । शुद्धाना कृतवर्मनविरेचनाना श्वासं कासं स्वरेन्द्रियहानिं शिरोगौरव च । दत्तबस्तीनां विवृतस्रोतसया अभिव्याप्त्या श्वासकासादीनेव । तथा अनार्तवदुर्दिनेऽपि सहसैव शैत्यात् शिरोरुग्वेपथुस्तैमित्यतालुनेत्रकण्डूपाकमन्यास्तम्भकण्ठोर प्रतिश्यायारूपि । 'ऋतु-दुर्दिनेऽपि शीतो दोष । शीतदोषोपदेशेन तत्परिहारे सत्यदोग इत्यभिप्रायः । अनृतावपीति न युक्त, ऋतावपि दुर्दिने प्रतिषेध इष्ट । वर्षास्वदुर्दिनेऽप्यस्तु एतदपि वक्तव्य जायते वर्षास्वदुर्दिने चेति । अनृतावित्यस्यानभिधाने वर्षाणा दुर्दिनस्वभावत्वात् स्वस्थानत्वात् तत्रैव वृत्ति. स्यान्नान्यत्रेति । अथवा सर्वदा दुर्दिने नस्यस्य निषेधे वर्षासु नस्यसाध्ये व्याधावुत्पन्ने दुर्दिनेऽपि नस्य विधात-व्यमिति दर्शयितुमनार्तवग्रहणमि'ति हृद्याकारः । एषु च नस्यदोषेषु यथास्व-मायतन दोषोद्रेकं चावेक्ष्य स्नेहस्वेदशिरोवक्त्रलेपतीक्ष्णावर्षाद्यूमगण्डूषादीनि यथास्व कुर्यात् । सङ्ग्रहे चोक्तं—"गर्भिण्याश्च नस्येन गर्भद्वेषज्वरमूर्च्छार्धावभेदका. स्युः । अपत्य च विकलेन्द्रियमुन्मादापस्मारयुक्त च स्यात् । तस्माद्गर्भिण्या वर्ज्ये नस्यकर्मणि कृते वर्षागुडाकोलीकपिकच्छूभे श्रृत पयः पिबेत् । बलाविदार्यश्वगन्धामेदाभिर्वा एभिरेव च श्रृत हवि. यातरसिद्धश्च स्नेहः शिरोबस्तौ कर्णपूरणे च योज्य । सर्वं च बृंहणमन्नपानम्"इति ॥ १०-१२ ॥

तोयपीतादिषु सदैव किं नस्यं न योज्यमित्याह—

अन्यत्रात्ययिकाद्याधेः

अन्यत्रेत्यादि । आत्ययिके व्याधौ तेषामपि नस्यं योज्यमेव ॥

इदानीं नस्यकालं वक्ति—

अथ नस्यं प्रयोजयेत् ।

प्रातः श्लेष्मणि मध्याह्ने पित्ते सायंनिशोश्वले ॥ १३ ॥

अथेत्यादि । श्लेष्मणि श्लेष्मरोगेषु प्रातः पूर्वाह्णे नस्यं प्रयोजयेत् कुर्यात् । पित्ते पित्तरोगेषु मध्याह्ने । वातरोगेषु सायमपराह्णे निशि च रात्रौ नस्यं प्रयोजयेत् । वचनं हि संग्रहे—"लालास्रावमुखप्रशोषदन्तपुष्टकदायनकथन-कृच्छ्रोन्मीलनपूतिमुखकर्णनादार्दितशिरोरोगश्वासकासादिषु रात्रावि"ति ॥ १३ ॥

अधुना दोषाद्यपेक्षया नस्यकालं निगमयति—

स्वस्थवृत्ते तु पूर्वाह्णे शरत्कालवसन्तयोः ।
शीते मध्यन्दिने ग्रीष्मे सायं वर्षासु सातपे ॥ १४ ॥

स्वस्थेत्यादि । स्वस्थवृत्ते तु स्वस्थस्य व्याध्यनुत्पत्त्यर्थं शरदि वसन्ते च पूर्वाह्ण एव नस्यं प्रयोजयेत् । शीते शिशिरलक्षणे हेमन्तशिशिरयोर्मध्याह्ने, ग्रीष्मे सायमपराह्णे, वर्षासु सातपे आतपसहिते दृश्यमानदिवाकरे दिवसे प्रयोजयेत् ॥ १४ ॥

वाताभिभूते शिरसि हिध्मायामपतानके ।
मन्यास्तम्भे स्वरभ्रंशे सायंप्रातर्दिने दिने ॥ १५ ॥
एकाहान्तरमन्यत्र सप्ताहं च तदाचरेत् ।

वाताभिभूतमूर्धादिषु स्वरभ्रंशान्तेषु दिने दिने प्रतिदिनं नैकान्तरितं सायंप्रातरुभयकालं वा एकवारम् अनेन विधिना आ सम्यग्योगान्नस्यं प्रयोजयेत् । न तत्रर्तुभेदापेक्षेत्यभिप्रायः यत्र प्रतिदिनं नस्यं विहितं, ततोऽन्यत्र वाताभिभूत-मूर्धादिभ्योऽपरस्मिन् रोगे एकाहान्तरम् एकाहमन्तरीकृत्य सप्ताहं च नस्य-माचरेत् । चशब्दो नियमार्थः सप्ताहमेवाचरेत् न ततः परमिति । सप्तदिवस-नियमो नस्याचारे । व्यवधायकानि दिवसानि च सप्त । तेन चतुर्दशसु दिवसेषु व्यवस्थितेषु सप्ताहमेकदिनान्तरितं नस्यमाचरितं भवेत् । सप्ताहादूर्ध्वं न विदध्यात् । उक्तं च निमिना—

"नस्य दद्यात्तु सप्ताह पञ्चाहमथवा त्र्यहम् ।
पर नवाहमूर्ध्वं तु नवाहात् सात्म्यतां व्रजेत् ॥ "
नस्य न गुण कुर्यात् सातत्यान्न हरेत् कफम् ।"
तस्मान्नस्यप्रयोगस्तु सैहिको न हित सदा ॥"

इति । भोजेनाप्युक्तम् —

एकान्तर व्यन्तर वा नस्य दद्याद् विचक्षण ।
सप्ताह परम देय विश्रान्तस्य पुन पुन ॥
पक्ष विंशतिरात्र वा यावद् वा साधु मन्यते ।"

इति ॥ १५ ॥

इदानी यादृशस्य पुरुषस्य यथास्थितस्य नस्य दातव्य तथाह—

स्निग्धस्विन्नोत्तमाङ्गस्य प्राक्कृतावश्यकस्य च ॥ १६ ॥
निवातशयनस्थस्य जत्रूर्ध्वं स्वेदयेत् पुनः ।

स्निग्धेत्यादि । पूर्वं स्निग्ध पश्चात् स्विन्नमुत्तमाङ्ग मूर्धा यस्य तस्य । अथवा पूर्वं स्निग्धस्य पश्चात् स्विन्नशिरसः । तथा प्राक् पूर्वं कृतमवश्यकरणीयमुच्चारप्रस्रावदन्तधावनादि येन स प्राक्कृतावश्यक तस्य । तथा निवाते देशे कल्पित यच्छयन तल्प तत्स्थस्येवभूतस्य सतो जत्रूर्ध्वं पुन स्वेदयेत् नस्यप्रयोगकाले स्वेद कार्य । सामान्योऽय निर्देश । यथाकाल यथादोष च स्वेदमन्तरेणापि नस्य दातव्यमेव । उक्त च चैतरणेन—

"रक्तपित्तविकारेषु पित्तप्रकृतये तथा ।
काले चोष्णे विशेषेण विना स्वेद प्रयोजयेत् ॥"

इति ॥ १६ ॥

अथोत्तानर्जुदेहस्य पाणिपादे प्रसारिते ॥ १७ ॥
किञ्चिदुन्नतपादस्य किञ्चिन्मूर्धनि नामिते ।
नासापुटं पिधायैकं पर्यायेण निषेचयेत् ॥ १८ ॥
उष्णाम्बुतप्तं भैषज्यं प्रणाल्या पिचुनाथवा ।

अथेत्यादि । अथानन्तरम् उत्तानस्पष्टस्थितशरीरस्य सत हस्तचरणे प्रसारिते तथेषदुन्नतचरणस्य किञ्चिच्छिरसि नामिते सति नासापुटमेक पिधाय

वामहस्तप्रदेशिन्यनामिकाभ्यामेकैकं नासापुटं पिधाय स्थगयित्वा इतरस्मिन् नासास्रोतसि मध्यमयाङ्गुल्या नासाग्रमुन्नमय्य पर्यायेण क्रमेण न तु युगपद् दक्षिणहस्तेन भैषज्यं निषेचयेत्[1]। कीदृशम्, उष्णाम्बुतप्तम् उष्णीकृतं भेषजस्य भदेयस्य त्रिभागमुष्णाम्बुनाप्यतप्तं कुर्यात्। ततो द्वितीयं भागम् एवं कुर्यात्। ततस्तृतीयं भागम्। अन्यथा शीतीभवति। केन निषेचयेत्, अनाड्या करणभूतया। अथवा पिचुना वर्त्येत्यर्थः। पिचुः कार्पासः। सुश्रुते चाभ्यधायि— "वस्त्रादिच्छादितनेत्राय प्रदेशिन्युन्नामितनासाग्राय दक्षिणहस्तेन स्नेहमुष्णाम्बुना तप्त रजतादिशुक्तिनामन्यतमस्थमभ्युच्छ्रितधारं सिञ्चेत्" इति॥

॥ १८ ॥

दत्ते पादतलस्कन्धहस्तकर्णादि मर्दयेत् ॥ १९ ॥

शनैरुच्छिङ्ग्य निष्ठीवेत् पार्श्वयोरुभयोस्ततः।
आभेषजक्षयादेवं द्विस्त्रिर्वा नस्यमाचरेत् ॥ २० ॥

दत्ते च नस्ये सति पादतलादि मर्दयेत्। आदिशब्देन ग्रीवाललाटादिपरिग्रहः। ततो मर्दनादनन्तरं शनैरुच्छ्वङ्ग्य घ्राणवायुना ऊर्ध्वमुत्क्षिप्य पार्श्वयोरुभयोर्निष्ठीवेत्। उभयपार्श्वनिष्ठीवनेन सर्वा सिराः भेषजेन व्याप्यन्ते। एकपार्श्वनिष्ठीवनेन सर्वाः सिराः भेषजेन न सम्यक् व्याप्यन्ते। आ भेषजक्षयात्। नासायां दत्तस्य भेषजस्य यावत् क्षयः, तावदुच्छिङ्ग्य निष्ठीवेत्। सङ्ग्रहेऽप्येवमेव प्रोक्तम्— "शनैश्चोच्छिङ्गेत्[2]। अनभ्यवहरंश्च वामदक्षिणपार्श्वयोरौषधं निष्ठीवेत्। सकृफं हि तदभ्यवहृतमभिभवसादयेत्" इति। हृद्याकारस्त्वन्यथावदत्— "उभयोः पार्श्वयोरुच्छिङ्ग्य नासिकापुटद्वयेन बाह्यं वायुं गृहीत्वा शिर आरोप्य निष्ठीवेत्। नासिकायां निहितस्य भेषजस्य यावन्नोशस्तावदेवं कुर्यात्" इति। उक्तं च निमिना—

"नासापुटौ तथाङ्गुल्या वारं वारं पिधाय तु।
आतुरं तु भिषग् ब्रूयादुच्छिङ्गेति मुहुर्मुहुः॥
आतुरं पूर्णवक्त्रं तु ज्ञात्वा द्वौ परिचारकौ।
बाह्वोः पृष्ठे च संगृह्य समुत्थापयतां सुखम्॥
आसीनः शयने स म्यादुदङ्मुखमवस्थितः।
शनैरजिह्मं निष्ठीवेदजुगात्रस्तु सर्वतः॥

---

१. 'न्नासिकासना', २ 'यावन्नेशस्तावदेवं' इति पाठान्तरं दृश्यते।

परिचारगृहीते तु भाजने पुरतः स्थिते ।
शनैः प्रीचिनवन्तं तं पुनः सशाययेच्छनैः ॥
स संविष्टः पुनः शीघ्रं निष्ठीवेद्योत्थितः पुनः ॥"

इत्यादि । एवं निमिप्रोक्तमन्यदर्शनाद् हृद्याकारप्रोक्त एवार्थो हृदयं प्राप्नोति । एवमनेन क्रमेण द्विः द्वौ वारौ त्रिर्वा त्रीन् वारान् वा दोषाद्यपेक्षया नस्यं कुर्यात् । न तु मात्रा सकृदेव प्रक्षेतव्या । हीनमात्रं चौषधं न देयम् । तद्धि दोषानुत्क्लेश्य अनिर्हरन् गौरवारुचिकासप्रसेकपीनसच्छर्दिकण्ठरोगादीन् कुर्यात् । सकृदेव सर्वं दत्तमुच्छिद्यमानं मूर्च्छाशिरोरोगमतिश्यायघ्राणभेदानुच्छ्वासोपरोधं च कुर्यात् । अधिकं च न योजयेत् । अधिकं वातविकारान् कुर्यात् । अत्युष्णं दाहपाकज्वरमूर्च्छाभ्रमान् । अतिशीतं हीनदोषानेव । स्नेहस्यायोगे वातविकाराः । अतियोगे कफविकाराः । विरेचनस्यायोगे कफविकाराः । अतियोगे वातविकाराः भवन्ति । अत्युन्नतशिरसः सम्यगप्रतिपद्यमानं हि दोषान् कुर्यात् । अत्यवनतशिरसो दूरगमनमूर्च्छाजाड्यज्वरान् । सङ्कुचितगात्रस्य सम्यग्वमनीरनाप्नुवद्दोषोत्क्लेशं कुर्यात् । संग्रहेऽप्युक्तम्—"आभेषजदर्शनादुच्छ्वेत् निष्ठीवेच्च । ततश्चैवमेव द्वितीयमंशमनुसेचयेत् । तथा तृतीयम् दोषादिबलेन वा । विरेचने त्ववंपीडे दोषबलमवेक्ष्य पश्चात् स्नेहमवसेचयेदि"ति ॥ २० ॥

यदि च नस्ये दीयमानेऽतितीक्ष्णभेषजवशादसात्म्यत्वेन वा मूर्च्छा स्यात् । तदा किं कार्यमित्याह—

मूर्छायां शीततोयेन सिञ्चेत् परिहरञ्छिरः ।

मूर्च्छायामित्यादि । मूर्च्छायां सत्यां शीतजलेन मूर्धवर्जं सिञ्चेत् संग्रहे चोक्तम्— "न च नस्ये दीयमाने कोपहासव्यापारस्पन्दनोच्छिङ्घनान्याचरेत् । तथाह्येवं शिरोरुक्प्रतिश्यायकासतिमिरखलतिपलितातिलकन्यङ्गतिलकालकमुखदूषिकादीनां संभवः" इति ॥

स्नेहं रेचननस्यान्ते दद्याद्दोषाद्यपेक्षया ॥ २१ ॥
नस्यान्ते वाक्शतं तिष्ठेदुत्तानो

विरेचने नस्ये दत्ते पश्चाद् दोषदेशसात्म्याद्यपेक्षया स्नेहं नस्यमवसेचयेत् । नस्यावसाने वाक्च्छतं मात्राशतमुत्तानो निद्रामसेवमानस्तिष्ठेत् शयीत ॥

धारयेत्ततः ।
धूमं पीत्वा कवोष्णांबु कवलं कण्ठशुद्धये ॥ २२ ॥

ततो वाक्क्लेशावस्थानादनन्तरमुत्क्लिष्टदोषशेषोपशान्तये अविशेष्याभिधानाद् विरेचनाद्यन्यतमं धूमं पीत्वा दोषाद्यपेक्षया कण्ठशुद्ध्यर्थमीषदुष्णाजलकवलं धारयेत् । हृद्याकारोऽपि — 'अविशेष्याभिधानात् स्निग्धमध्यमतीक्ष्णानामन्यतमं धूमं पीत्वा दोषाद्यपेक्षये'त्याह । ततो धूमपानकवलानन्तरं भोजनविधानमत्रानुक्तम्, स्नेहाचारेणैव सिद्धत्वात् । तन्त्रान्तरे तु स्पष्टमुक्तम् —

"नस्यात् संशुद्धशिरसो हितं मद्यस्तु भोजनम् ।
शुद्धे शिरसि वायुस्तु जन्तोः कुप्येदभोजनात् ॥"

इति ॥ २२ ॥

सम्यक्स्निग्धे सुखोच्छ्वासस्वप्नबोधाक्षपाटवम् ॥ २३ ॥

सम्यक्स्निग्धे शिरसि बृंहणशमनयोरेकतरेण सम्यक्स्निग्धे । नस्यप्रयोगे सम्यग् जाते सुखोच्छ्वासादयः स्युः । सम्यग्विरिक्तेऽप्येवमिति बोद्धव्यम् । उक्तं हि सङ्ग्रहे — "सम्यक्स्निग्धे मूर्धनि विरिक्ते वा सुखोच्छ्वासनिःश्वासक्षवथुस्वप्नबोधाक्षिपाटवानि स्यु"रिति ॥ २३ ॥

रूक्षे तु स्तब्धता शोषो नासास्ये मूर्धशून्यता ।

रूक्षे तु शिरसि स्तब्धता स्यात् । तथा नासायामास्ये च शोषः मूर्धः शून्यता च स्यात् । हृद्याकारस्तु — "रूक्षेऽतिरूक्षे विरेचननस्येन कृतेन स्तब्धता शोषश्च नासिकायामास्ये च स्याताम् । शिरसः शून्यता च, कफक्षयादि"त्याह । 'रूक्षेऽक्षिस्तब्धता' इति वा पाठः ॥ २३ ॥

स्निग्धेऽतिकण्ठहृद्गुरुता प्रसेकारुचिपीनसाः ॥ २४ ॥

अतिस्निग्धे शिरसि बृंहणशमनयोरन्यतरेण कण्ठहृदयः स्युः ॥२४॥

सुविरिक्तेऽश्लिलघुताम्बुवक्त्रविशुद्धयः ।

कफक्षयात् सुविरिक्ते विरेचननस्येन सम्यग्विरिक्ते शिरसि अश्लिलघुताद्यः स्युः ॥ २४ ॥

दुर्विरिक्ते गदोद्रेकः क्षामतातिविगर्हिते ॥ २५ ॥

दुर्विरिक्ते गदोद्रेको विरेचननस्येन कृतस्य सम्यगनिर्हरणात् व्याधेर्वृद्धिः । अतिविरेचिते अतिकफक्षयात्क्षामता स्याद् । ग्लानिः ॥ २५ ॥

अधुना प्रतिमर्शस्य विषयमाह—

प्रतिमर्शः क्षतक्षीणबालवृद्धसुखात्मसु ।
प्रयोज्योऽकालपलिते

प्रतिमर्श इत्यादि । प्रतिमर्शः क्षतादिषु प्रयोज्य. । अकालपलितेऽपि योज्यः ॥ २५ ॥

न त्विष्टो दुष्टपीनसे ॥ २६ ॥
मद्यपीतेऽबलश्रोत्रे कृमिदूषितमूर्धनि ।
उत्कृष्टोत्क्लिष्टदोषे च

नत्विष्ट इत्यादि । दुष्टपीनसादिषु तु षट्सु न प्रयोज्यः । दुष्टपीनसो नासारोगेषु वक्ष्यमाणः । मद्यपीत. पीतमद्य. । अबलश्रोत्रो दुर्बलश्रोत्रो रुद्धश्रवणमार्गः । कृमिदूषितो मूर्धा यस्य सः (कृमिदूषितमूर्धा) । एवमुत्कृष्टः प्रवृद्धो दोषो यस्य स उत्कृष्टदोष । तथा उत्क्लिष्टः प्रबलक्षोभो दोषो रोगकारी यस्य सः उत्क्लिष्टदोषः । सञ्चिताना स्वस्थानस्थितानां दोषाणा कारणान्तरेण स्थानात् प्रच्युताना प्रबलविकारकारितोत्कलेश. । पाठ्यकारस्तु— "उत्क्लिष्टोत्क्लिष्टदोषेषु अत्यन्तोत्क्लिष्टदोषेष्वि"त्याह । एषु प्रतिमर्शो न योज्यः ॥ २६ ॥

कुतो हेतोरित्याह—

हीनमात्रतया तु सः ॥ २७ ॥

हीना मात्रा यस्य सः हीनमात्रः तस्य भावो हीनमात्रता यस्मादसौ हीनमात्रतया प्रयुज्यते । एषां चोदीर्णरोगत्वात् तावता दोषोत्क्लेश एव भवति, न शम । प्रतिमर्शो दुष्टपीनसादिषु हीनमात्रतया व्याधिवृद्धिमेव करोतीत्यर्थः । तुशब्देन दुष्टपीनसादिषु विरेचनं नस्यं कार्यमिति सूचयति ॥ २७ ॥

निशाहर्षुक्षवान्ताहःस्वप्नाध्वश्रमरेतसाम् ।
शिरोऽभ्यञ्जनगण्डूषप्रसवाञ्जनवर्चसाम् ॥ २८ ॥
दन्तकाष्ठस्य हासस्य योज्योऽन्तेऽसौ द्विपञ्चकः ।

असौ प्रतिमर्शो द्विपञ्चको निशादीना पञ्चदशानां कालानामन्ते प्रयोज्य । द्विपञ्चक इत्यनेन प्रतिमर्शस्य मात्रां वक्ति ॥ २८ ॥

---

१. 'धूम्धाम', २. 'धवश्वि' ३. 'द्वि' इति मुद्रितहृदयपाठः

"जातमात्रमुपादाय प्रतिमर्शो विधीयते ।
पञ्चवर्षमुपादाय कार्ये कवलधारणम् ॥
सप्तवर्षमुपादाय नस्त कर्म विधीयते ।
तदूर्ध्वं द्वादशे वर्षे भक्षयेद् दन्तधावनम् ॥"

इत्यादि । स प्रतिमर्शो नित्योपसेवनात् सततमभ्यस्यमानो मर्श इव गुणान् सुखोच्छ्वासादीन् कुर्यादिति स्तुतिः । अथवा स प्रतिमर्शो नित्योपसेवनात् शिरोवस्तिसदृशान् (गुणान्) करोति मर्शसदृशांश्च गुणान् सुखोच्छ्वासादीन् करोति । अत्र प्रतिमर्शे यन्त्रणा 'उष्णोदकोपचारी स्यादि'त्यादिका नास्ति । व्यापद्धर्थैः 'अक्षिस्तब्धता शोष' इत्यादिभ्यो मर्श इव भय नास्ति मर्शवत्, सप्तम्यन्ताद् वति ॥ ३२ ॥

तैलमेव च नस्यार्थे नित्याभ्यासेन शस्यते ॥ ३३ ॥
शिरसः श्लेष्मधामत्वात् स्नेहाः स्वस्थस्य नेतरे ।

तैलमित्यादि । तैलमेव नित्याभ्यासेन प्रतिमर्शन्यायेन नस्यार्थे भेषजं भवति स्वस्थस्य । कुत, मूर्ध्नः कफस्थानत्वात् । न त्वपरे स्नेहा वसामज्जघृतादयः, तेषां श्लेष्मलत्वादिति भावः ॥ ३३ ॥

आशुकृच्चिरकारित्वं गुणोत्कर्षापकृष्टता ॥ ३४ ॥
मर्शे च प्रतिमर्शे च विशेषो न भवेद्यदि ।
को मर्शं सपरीहारं सापदं च भजेत्ततः ॥ ३५ ॥
अच्छपानविकाराख्यौ कुटीवातातपस्थिती ।
अन्वासमात्रावस्ती च तद्वदेव च निर्दिशेत् ॥ ३६ ॥

आशुकारी मर्शः, चिरकारी प्रतिमर्शः । गुणोत्कर्षयुक्तो मर्शः, गुणापकृष्टतान्वितः प्रतिमर्शः । इत्यनयोर्भेदः । यदि च मर्शे प्रतिमर्शे च विशेषो न स्यात् ततो मर्शं सपरिहार सव्यापद च को भजेत, न कश्चिदपि भजेदित्यर्थः । प्रतिमर्शविशेषवदच्छपानविकाराख्यौ स्नेहौ शीघ्रकारित्वादिना विशेषेण निर्दिशेत् । तथा कुटीप्रवेशस्थित्या यद्रसायनमुपयुज्यते, यच्च वातातपाद्यपरिहारस्थित्या रसायन क्रियते ते च द्वे अपि तथैव विशेषेण निर्दिशेत् । तथान्वासोऽनुवासन मात्रावस्तिश्च । तावप्येव चिरकारित्वादिगुणौ निर्दिशेत् ॥ ३४–३६ ॥

बलस्थस्य तैलमेव विहितमिति तैलं दर्शयन् नस्यार्थं प्रधानमणुतैलमाह जीवन्तीत्या-दिना —

जीवन्तीजलदेवदारुजलदत्नकुमेव्यगोपीहिमं
दार्वीत्वङ्मधुकप्लवागरुवेरीपुण्ड्राह्वविल्वोत्पलम् ।
धावन्यौ सुरभिः स्थिरे कृमिहरं पत्रं त्रुटिं रेणुकां
किञ्जल्कं कमलोद्भवं बलां शतगुणे दिव्येऽरमासि क्वाथयेत् ॥३७॥
तैलाद्रसं दशगुणं परिशेष्य तेन
तैलं पचेच्च सलिलेन दशैव वारान् ।
पाके क्षिपेच्च दशमे सममाजदुग्धं
नस्यं महागुणमुशन्त्यणुतैलमेतत् ॥ ३८ ॥

जीवन्त्यादीनि सप्तविंशतिद्रव्याणि तैलसमानि आढकानीति वृद्ध-वैद्यव्यवहारात् तैलसमानि परस्परसमभागानि गृहीत्वा एकीकृत्य परिच्छिद्य तुल्या ततः शतगुणे दिव्ये जले मेघमुक्ते गाङ्गे आकाशादेव पटा-दिभिर्गृहीते क्वाथयेद् विपाचयेत् । पाठ्यकारोऽपि—"औषधाच्छतगुणं दिव्यं जलम्" इत्याह । "तैलाच्छतगुणम्" इत्यरुणदत्तः । तावत् क्वाथयेत् यावद् दशगुणो रसः तैलात् स्यात्, यावत् क्वाथो दशभागशेष. स्यादित्यर्थः । तेन च क्वाथेन तैलं दशैव वारान् पचेत् । तैलाद् दशगुण क्वाथं परिशेष्य तं क्वाथं दशधा विभजेत् । तेषु क्वाथभागेषु एकस्मिन्नेकस्मिन् सकृत् सकृत् पचेत्। हाटकोऽप्याह—"ततः क्वाथाद् दश भागा. समाः कार्याः । तत्रैकांशे समं तैलं तेन सह पाचयेत् । तत् पक्वं पुनर्द्वितीयेन पचेत् । एवं शेषांशैः इति। दशमे च पाके तैलसममाजं दुग्धमजाक्षीरं क्षिपेत् । एतत् तैलं नस्यार्थं महागुणं सर्वोत्तमगुणमणुतैलमंशुं कथयन्ति । (अणुषु तैलम्) अणुतैलम् अणुस्रोतोगामित्वात् । अणुनीन्द्रियस्रोतांसि प्रविशतीत्यर्थः । सूक्ष्मसिराप्रवेशेने-न्द्रियगुणाधायकत्वं दर्शयति । गोपी शारिवा । पुण्ड्राह्वं सपुण्डरीकम् । धावन्यौ कण्टकारिका बृहती च । सुरभिः सहचरी । स्थिरे साढपर्णी पृश्निपर्णी च । सर्वद्रव्याणि पर्यन्तान्यभिधाय सुरभिरिति कथं मोक्षदान् न जानीमः । संग्रहेऽपि—"बृहतीद्वयांशुमतीद्वये" इति मोक्तम्। सुरभी इति कोचित् पठन्ति । सुरभिमित्यस्मद्गुरवः पठन्ति ॥ १७, १८ ॥

---

१. 'बला' २ 'रेणुकं' ३ 'कमलाह्वयं' मुद्रितोऽयमादर्शपाठः

नस्याभ्यङ्ग कर्तव्य इति त्र प्रस्तौति—

घनोन्नतप्रसन्नत्वक्स्कन्धग्रीवास्यवक्षसः ।
दृढेन्द्रियास्त्वपलिता भवेयुर्नस्यशीलिनः ॥ ३९ ॥

घनेत्यादि । नस्यशीलिनो निबिडोच्चसुररमणीयत्वगादयः स्युः । घनादिगुण त्वगादि येषा त घ्वम् । घनादीना त्वगादिभिर्यथासभव सबन्ध । तथा पुष्टेन्द्रिया पलितवर्जिता भवेयुरिति । केचित् स्नेहस्वेदाभ्या सह सप्तकर्माणीति प्रत्यवतिष्ठन्ते । तन श्रद्धेयम् "आशु सकलदोषनिर्हरणसामर्थ्य-रूपस्य कर्मलक्षणस्य स्नेहस्वेदयोरभावात्" इति न्यासे ॥ ३९ ॥

इति श्रीदामोदरगुप्तविरचित या हृदयद्योतिकाया
त्रिंशोऽध्याय. ॥

अथ एकत्रिंशोऽध्यायः ।

ऊर्ध्वाङ्गविकितसाप्रसङ्गाद् धूमपानविधिं त्रिगदितुराह —

अथातो धूमपानविधिनामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ।
जत्रूर्ध्वकफवातोत्थविकारणामजन्मने ।
उच्छेदाय च जाताना पिबेद्धूमं सदात्मवान् ॥ १ ॥

जत्रूर्ध्वेत्यादि । "उत्तमाङ्गाद् दोषनिर्हरणप्रसङ्गे धूमस्यापि तद्गुणत्वात् तद्विधानप्रदर्शनार्थोऽयमध्याय आरभ्यते" इति हाटकः । "धूम पीत्वे-त्युक्तत्वाद् धूमविधिमाहे"ति पाठ्यकारः । "अथ धूमविधिर्नेत्र्यविधा धूमप्र-सक्तव जत्रूर्ध्वव्याधिहन्तृत्वादथवा धूमवर्णना" इति हृद्याकारः । जत्रुण ऊर्ध्वं कफवातोत्थविकाराणां कफेन वातेन च कफवाताभ्यां वा उत्था उत्थिता उत्थानशीला इत्यर्थ । तेषा श्लेष्मवातोद्भवाना विकाराणामजन्मने असम्भवायानुत्पत्त्यै इत्यर्थ । तथा जाताना सम्भूतानाम् । उत्पन्नाना-मुच्छेदाय विनाशाय सदा सर्वर्तुषु धूमं पिबेत् । आत्मवान् सुमति हिताहार-विहार इत्यर्थ. । "आत्मवान् जितात्मे"ति हृद्याकारः । धूनोति दोषवैषम्यमि-ति धूमः । कम्प्यते वायुनेति वा धूमः । जत्रूर्ध्वमिति वा पाठः ॥ १ ॥

स्निग्धो मध्यः स तीक्ष्णश्च याते वातकफे कफे ।
योज्यः

स च धूमः स्निग्धमध्यतीक्ष्णभेदेन त्रिविधो यथाक्रमं वातादिषु योज्यः । स्निग्धो याते, मध्यो वातकफसंसर्गे, तीक्ष्णः कफे योज्य इति । स्निग्धो बृंहणो मृदुरिति पर्यायाः । शमनः प्रायोगिको मध्यम इति द्वितीयस्य । शोधनो विरेचनस्तीक्ष्ण इति तृतीयस्य ।

त्रिविधस्यापि प्रतिषेधविषयमाह—

न रक्तपित्तार्तिविरिक्तोदरमेहिषु ॥ २ ॥
तिमिरोर्ध्वानिलाध्मानरोहिणीदत्तबस्तिषु ।
मत्स्यमद्यदधिक्षीरक्षौद्रस्नेहविषाशिषु ॥ ३ ॥
शिरस्यभिहते पाण्डुरोगे जागरिते निशि ।

(रक्त)पित्तार्त्यादिषु निशि जागरितान्तेषु धूमो न योज्यः नाचरणीयः । याते वातकफे कफे च धूमस्यानुशांतत्वात् पित्तार्ता प्राप्तिरेव नास्ति । तत् किं प्रतिषेधेन ? ब्रूमः । वातप्रकृतेर्वातपित्तार्तौ सत्यो कश्चिद् भिषक्पाशौ भ्रान्त्या प्रकृत्यनुरूपोपक्रमचिकीर्षया धूमं नियोजयेत् । तन्निषेधार्थमिदमुक्तम् । अथवा पित्तप्रकृतेर्वातश्लेष्मव्याध्युद्भूतौ न योज्यमिति प्रतिपादनार्थमिदं गदितमिति । आशिशब्दो मत्स्यादिषु विषान्तेषु प्रत्येकं योज्यः । अत्र च यथासंभवं पानं मद्यादिषु, भोजनं मत्स्यादिषु । अशितमहणं चतुर्विधेऽप्याहारेऽस्तीति चतुर्विधेऽपि चाहारे अशनशब्देनास्त्येव व्यवहारः । यथा "मात्राक्षी सर्वकालं स्यादि"ति । केचित्तु यवागूपायिन्यपि धूमपानं नेच्छन्ति । तेषां हि प्रयुक्तो धूमो भ्रमज्वरशिरोविघातेन्द्रियोपतापतालुशोषपाकधूमायनच्छर्दिमूर्च्छारक्तपित्तादितानि मृत्युं वा जनयति ॥ २–३ ॥

रक्तपित्तान्ध्यबाधिर्यतृण्मूर्छामदमोहकृत् ॥ ४ ॥
धूमोऽकालेऽतिपीतो वा

अकाले पित्तः काले वातिपीतो धूमो रक्तपित्तादीन् करोति । मूर्छा संज्ञानाशः । मोहश्चिन्तानाशः, 'मुह वैचित्ये' इति पाठात् । आन्ध्यबाधिर्यमहण-

मुत्तमाङ्गोपलक्षणार्थम् । तेन संग्रहोक्तमर्दितमपि गृह्यते । अकाले अयोग्यव्याधौ पूर्वोक्ते रक्तपित्तार्त्यादौ पीतः प्रयुक्तो धूमो रक्तपित्तादिकृत् । अप्रतिषिद्धेऽपि काले क्षुतादावतिमात्रया पीतो रक्तपित्तादिकृत् ॥ ४ ॥

तत्र शीतो विधिर्हितः ।

तत्राकाले पीतेऽतिमात्रया च पीते धूमे शीतः सर्पिष्पाननस्यालेपपरिषेकादिविधिरुपक्रमो रक्तपित्ताध्यायोक्तो हितो नाशान्तः कर्तव्यः । "तत्र रक्तपित्तादौ" इति हाटकः ॥

"हृत्कण्ठेन्द्रियसंशुद्धिः शिरसो लाघवं शमः ।
यथेरितानां दोषाणां सम्यक्पीतस्य लक्षणम् ॥"

इदानीं त्रयाणां धूमानां पृथक् पृथक् कालं दर्शयन्नाह—

क्षुतजृम्भितविण्मूत्रस्त्रीसेवाशस्त्रकर्मणाम् ॥ ५ ॥
हास्यस्य दन्तकाष्ठस्य धूममन्ते पिबेन्मृदुम् ।
कालेष्वेषु निशाहारनावनान्ते च मध्यमम् ॥ ६ ॥
निद्रानस्याञ्जनस्नानछर्दितान्ते विरेचनम् ।

क्षुतेत्यादि । क्षुतादीनामष्टानामन्ते मृदुं स्नेहनाख्यं धूमं पिबेत् । एष्वेव पूर्वोक्तेषु कालेषु क्षुतान्तादिषु निशादीनामन्ते च मध्यमं धूमं पिबेत् । मध्य एव मध्यमः । 'मध्यान्मः' (४-३-८) इति मः । निद्रादीनामन्ते विरेचनं तीक्ष्णं धूमं पिबेत् । एषु हि कालेषु वातकफोत्क्लेशो भवति ॥ ५-६ ॥

साम्प्रतमस्य नेत्रस्य स्वरूपमाह—

वस्तिनेत्रसमद्रव्यं त्रिकोशं कारयेद्ऋजुम् ॥ ७ ॥
मूलाग्रेऽङ्गुष्ठकोलास्थिप्रवेशं धूमनेत्रकम् ।

वस्तीत्यादि । वस्तौ नेत्रं वस्तिनेत्रं वस्तिनेत्रेण समं द्रव्यं वस्तिनेत्रतुल्यं द्रव्यमुपादानकारणं हेमादिधातूदार्वस्थिवेण्वादि यस्य धूमनेत्रस्य । तद् वस्तिनेत्रसमद्रव्यं हेमादिसम्भवमित्यर्थः । त्रिकोशं त्रिपर्व यस्य वंशस्येवान्तः स्तोकस्तोके त्रीणि सूक्ष्मच्छिद्राणि विनन्धनानि भवन्ति । तैर्हि प्रतिहतो धूमः शनैः शिरः प्रविशन् सुखकरो भवति । तथाचागमः—

ऋजित्यादि । ऋजु अवक्राङ्गम् उपविष्ट आसीन । तथा तच्चेताः धूमपानगतचित्त. । तथा विवृतास्यः प्रसारितमुखः व्यात्तमुख इत्यर्थ । नेत्रा अनिमिषदृष्टिरित्यपि वक्तव्यम् । हृद्याकारोऽपि— "धूमनेत्रगताक्षश्च स्याद्" इत्याह । कथं पिबेत, त्रिपर्ययम् आक्षेपविसर्जनावपनार्थं त्रयो पर्याया क्रमा यस्य स त्रिपर्यय तम् । आदानविसर्गयोस्त्रितयेन युक्त धूम मुखेन पिबेदित्यर्थ । आक्षेप, आदानम् । मोक्ष स्वीकृतस्य विसर्गः । ताभ्यामेक पानम् । त्रिपर्यय त्रिवारान् । पिधायच्छिद्रमिति, प्रकृतत्वान्नासिकाया छिद्रम् । एकैकमिति, 'एक बहुर्नाहिवत्' (८-१-९) इति (बहुत्वगुलोपन [1]) । तेनायमर्थ — एकं नासापुटमङ्गुल्या पिधाय स्थगयित्वा अपरेण नासापुटेनाकृष्य धूम पिबेत् । "ऋजूपविष्ट इत्यादिना नासिक्या पिबेदित्येवमन्त्रेकमेव वाक्यम्, नासिकाधूमपानविषयमेव च" इति केचित् ॥

नासिकामुखपानयोर्विषयभेदमाह —

प्राक् पिबेत् नासयोत्क्लिष्टे दोषे प्राणाशिरोगते ॥ १० ॥
उत्क्लेशनार्थं वक्त्रेण विपरीतं तु कण्ठगे ।

'प्रागित्यादि । घ्राणगते शिरोगते वा दोषे उत्क्लिष्टे स्वस्थानाच्चलिते सति प्राक् पूर्वं नासया पिबेत् पश्चान्मुखेन । अनुत्क्लिष्टे दोषे उत्क्लेशनार्थं वक्त्रेण प्राक् पिबेत् पश्चान्नासिकया । कण्ठगते दोषे उत्क्लिष्टे प्राङ्मुखेन पिबेत् । कण्ठगे दोषेऽनुत्क्लिष्टे तु विपरीतम् । उत्क्लेशनार्थं प्राङ्नासिकया पिबेत् पश्चाद् वक्त्रेणेति विपरीतत्वम् ॥

मुखेनैवोद्वमेद् धूमं नासया दृष्टिघातकृत् ॥ ११ ॥

मुखेनेत्यादि । नासया आस्येन वा पीत धूम वक्त्रेणैवोद्वमेद् उत्सृजेत्, न तु घ्राणेन । तत्र हेतुमाह— नासया उत्सृज्यमानो धूमो दृष्टेर्विघातं नाशं तिमिरादिं करोति । तस्मान्मुखेनैवोत्सृज्यते नतु घ्राणेन ॥ ११ ॥

उत्क्लेशनप्रकार दर्शयति—

आक्षेपमोक्षैः पातव्यो धूमस्तु त्रिस्त्रिभिस्त्रिभि ।

आक्षेपेत्यादि । आक्षेप आदानं धूमस्य । मोक्ष आत्तस्य विसर्जनम । आक्षेपमोक्षैरादानविसर्गैस्त्रिभिस्त्रिभि सयुक्तान् वारान् धूम पातव्य उत्क्ले-

---

१. एकमेकं तु शेषाणां द्विबहुत्वयोः स्मृतम् ।

थानार्थम् । त्रिरिति 'द्वित्रिचतुर्भ्यः सुच्' (५-४-१८) इति सुच् । 'आक्षेपमोक्षैः पातव्यः स च धूमस्त्रिभिस्त्रिभिः' इति वा पाठः । त्रिपर्यय इत्यध्याहार्यम्। आगमो हि—

"तस्य धूमस्य पेयाः स्युरापानस्त्रिस्त्रयस्त्रयः"

इति । त्रिभिरेवापानैः प्रयोग एक मृनो भवति । आक्षेपमोक्षावापानमित्याहुः॥ [११ ॥

अह इत्यादिना धूमत्रयस्य पानसंख्यां दर्शयति—

अह्नः पिबेत् सकृत स्निग्धं द्विर्मध्यं शोधनं परम् ॥ १२ ॥

त्रिश्चतुर्वा

अह्नः अहोरात्रे सकृदेकवारं स्निग्धं मृदु धूमं पिबेत्। *अह इति षष्ठी सप्तम्यर्थे । "कृत्योऽर्थप्रयोगे कालेऽधिकरणे" (२-३-६४) इति मायोगिकः । मध्यमं धूम द्विः अहो द्वौ वारौ पिबेत् । अह इत्यत्राप्यनुवर्तते । शोधनं तीक्ष्णं धूमं त्रिस्मिन् वारान् चतुर्वा चतुरो वारान् अहः पिबेत् । कृत्वसुजर्थे वारशब्दः ॥

मृदौ तत्र द्रव्याण्यगरुगुग्गुलु ।
मुस्तस्थौणेयजैलेयनलदोशीरवालकम् ॥ १३ ॥

वराङ्गकौन्तीमधुकाश्वित्रमञ्जलवालुकम् ।
श्रीवेष्टकं सर्जरसो ध्यामकं मदनं प्लवम् ॥ १४ ॥

सल्लकीकुङ्कुमं माषा यवाः कुन्दुरुकं तिलाः ।
स्नेहः फलानां सारणां मेदो मज्जा वसा घृतम् ॥ १५ ॥

मृदावित्यादि । तत्र तेषु त्रिषु धूमेषु मध्ये मृदौ स्नेहने धूमे द्रव्याण्यगुरुप्रभृतीनि घृतान्तानि योज्यानि । वराङ्गो लवङ्गः । कौन्ती हरेणुः । सल्लकी परूषकः । फलानामक्षोलनालिकेरादीनां स्नेहः । तथा सारणां खदिरासनादीनां स्नेहः । 'मधु(क)मदनयोरेकयोनित्वादुष्णत्वोपयोगो मदनस्यात्र विरुद्धः' इति केचित् । तच्चायुक्तम् द्रव्यान्तरसंयोगत्वात् । घृतं चात्र गव्यमेव प्रायं मुख्य(त्वमु)क्तं हि— 'गव्ये क्षीरघृते श्रेष्ठे' इति ॥ १३-१५॥

* अह्न इति 'कृत्योऽर्थप्रयोगे कालेऽधिकरणे' इति षष्ठी। १. 'द्वयस्यो' इति अरुणदत्तः ।

शमने सक्तुकी लाक्षा पृथ्वीका पद्मोत्पलम् ।
न्यग्रोधोदुंबराश्वत्थप्लक्षलोध्रवचाः सिता ॥ १६ ॥
यष्टीमधु. सुवर्णत्वक् पद्मकं रक्तयष्टिका ।
गन्धाश्चाकुष्ठतगरा , तीक्ष्णे ज्योतिष्मती सिता ॥ १७ ॥
दशमूलमनोह्वालक्षा श्वेता फलत्रयम् ।
गन्धद्रव्याणि तीक्ष्णानि गणो मूर्धविरेचन ॥ १८ ॥

शमने मध्यमे धूमे द्रव्याणि सक्तुमयार्दानि योज्यानि । सुवर्णत्वक्=(ചമ്പാമരത്തിന്റെ തൊലി) । रक्तयष्टिका=(ചെമ്പരത്തിക്കൊടി) । **गन्धाश्चाकुष्ठतगराः** गन्धद्रव्याणि कुष्ठतगरवर्जानि शमने योज्यानि । गन्धशब्देन गन्धद्रव्याण्येवोच्यन्ते । नच गुणशब्देन गुणिषु प्रयोग· शिष्टसम्त । यथाह—

"न कदाचित् प्रयोगोऽस्ति चन्दन गन्ध इत्यपि"

इति । गन्धशब्देन गन्धवन्ति एलादिगणपठितानि द्रव्याणि गृह्यन्ते । कुष्ठतगरवर्जन किमिति चेत् तयोरतितीक्ष्णत्वादिति भाव ।

तीक्ष्णे धूमे द्रव्याणि ज्योतिष्मत्यादीनि योज्यानि । गन्धद्रव्याणि तीक्ष्णान्युभाणि कुष्ठतगरादीनि लाक्षादीनि च । यथाह—

"लाक्षा सर्जरसश्चैव श्रीवास कुन्दुरुस्तथा ।
नवो नळश्च धूमैतैरमधूप इति स्मृत ॥"

इति । **गणो मूर्धविरेचन** शिर शोधन शोधनादिगण । सङ्ग्रहे 'वेल्लापामार्गे'-त्यादि पठितः ॥ १६-१८ ॥

जले स्थितामित्यादिना धूमवर्तिविधानमाह । अथवा धूमार्थं धूमद्रव्यैर्वर्तिकल्पना-माह—

जले स्थितामहोरात्रमिपीकां द्वादशाङ्गुलाम् ।
पिष्टैर्धूमौषधैरेवं पञ्चकृत्वः प्रलेपयेत् ॥ १९ ॥
वर्तिरङ्गुष्ठकस्थूला यवमध्या यथाभवेत् ।
छायाशुष्का विगर्भा ता स्नेहाभ्यक्ता यथायथम् ॥ २० ॥
धूमनेत्रार्पितां पातुमग्निप्लुष्टां प्रयोजयेत् ।

पूर्वं शुष्कामिपीकां कुशदर्भादिमूल वा शुष्कमहोरात्र सकलजले स्थापयेत् । अहोरात्रमित्यत्यन्तसयोगे द्वितीया । रात्रिन्दिवमम्भसि स्थितत्वादु-

खदिरनदरादिदारुस्थिराङ्गारपकरपूर्णे शरावे कासहरचूर्णं सक्षेहं गुलिकां वा न्यस्य ओष्ठैकदेशे वृत्तच्छिद्रेण मध्यच्छिद्रेण वा शरावेण सम्यक् पिधाय तासिन् पार्श्वच्छिद्रे मध्यच्छिद्रे वा नाडीं न्यस्य निवेश्य कासामयी मुखेन धूमं पिबेत् । कासवतो धूमपाने नासया न प्रयोगः । सङ्ग्रहे चोक्तम्— "कासघ्नं तु चूर्णं गुलिकां वा निर्धूमदीप्तस्थिराङ्गारपूर्णे सुसंस्थिते शरावे प्रक्षिप्यान्येन मूर्ध्नि प्रवृत्तच्छिद्रेण शरावेणापिधाय तत्स्रोतसि नेत्रं कृत्वा मुखेनैव धूमं पिबेत् । नरःमासं च मुखेनैवोद्वमेत् । प्रशान्ते च धूमे पुनः क्षिपेत् पिबेद्वा दोषशुद्धेर्लाघवात् । तद्वद्वमनमपि कृसरामनतिघनां पीत्वा पिबेत् । तद्वद् व्रणमपि धूपयेत्, वैशद्याय क्लेदवेदनोपशमाय च" । धूपनं शरीरस्य बहुधा प्रयोज्यम् । धूमोऽन्तः । "धूञ् कम्पने" धातुः । 'इषियुधीन्धिदसिश्यसिधूभ्यो मक्' (उ० १—१५०) इति औणादिको मकारः कर्त्रर्थः । कफवातयोः कम्पन करोतीति । धूमस्यायोगे दोषोत्क्लेशाद् रोगवृद्धिः । अतियोगे पित्तरक्तकोपनिमित्ता व्याधयः स्युः । सम्यग् लक्षणं सङ्ग्रहाद् ज्ञेयम्—

"हृत्कण्ठेन्द्रियसंशुद्धिः शिरसो लाघवं शम ।
यथेरितानां रोगाणां सम्यक् पीतस्य लक्षणम् ॥"

इति ॥ २१ ॥

कासः श्वासः पीनसो विस्वरत्वं
पूतिर्गन्धः पाण्डुता केशदोषः ।
कर्णास्याक्षिस्रावकण्ड्वार्तिजन्यं
तन्द्रा हिध्मा धूमपं न स्पृशन्ति ॥ २२ ॥

कास इत्यादि । कासादयो धूमपं न स्पृशन्ति धूमं पातुरेते न संभवन्तीति भावः । पूतिर्गन्धः आस्यनासिकयोः । पाण्डुता मुखस्य । केशदोषा अकालपलितपिङ्गरत्वादयः । कर्णादिषु प्रत्येकं स्रावादिचतुष्टयं योज्यम् [२२ ॥

इति हृदयबोधिकायाम् एकविंशोऽध्यायः ॥

अथ द्वाविंशोऽध्यायः प्रारभ्यते ।

"जमृर्ध्वगेगप्रस्तावादाह—'भूमविधिरनुगण्डूपादिविधि पश्चादाश्ये नादिविधि तत ।
अथवा कवोष्णाम्बुकवलम्" इत्युक्तत्वाद् गण्डूषादिविधिमाह । अथ वा,

भूमगण्डूषणेवक्त्रयोज्यत्वसमभावतः ।
भूमानन्तरमुच्यन्ते गण्डूषाद्यास्तु संप्रति ॥

अथातो गण्डूषादिविधिनामाध्यायं व्याख्यास्यामः ।
इति ह स्माहुरात्रेयादयो महर्षयः ॥

चतुष्प्रकारो गण्डूषः स्निग्धः शमनशोधनौ ।
रोपणश्च, त्रयस्तत्र त्रिषु योज्याश्चलादिषु ॥ १ ॥

गण्डूषादयोऽस्मिन् विधीयन्ते इति गण्डूषादिविधिरध्यायः । आदिग्रहणेन कवलादयो बोद्धव्याः । गण्डूषः स्निग्धादिभेदेन चतुष्प्रकारः । चत्वारः प्रकारा भेदा यस्य स चतुष्प्रकारः । गण्डे धार्यो द्रवो गण्डूषः । गण्डशब्दोऽस्य वाचकः 'गण्डुं वदनैकदेशे' इति धातु । तत्र वदनैकदेशे मुखे ऊष इत्यौणादिको धार्यमाणद्रवमाचष्टे । तानेव प्रकारानाह— स्निग्धः इति । शमनश्च शोधनश्चेति द्वन्द्वसमासः । रोपणश्च ।

अन्त्यो व्रणानां, स्निग्धोऽत्र स्याद्बल्यपटुसाधितैः ।

तत्र तेषु गण्डूषेषु मध्ये त्रयः स्निग्धादयो गण्डूषाः यथासंख्यं त्रिषु वातादिषु योज्याः । वाते स्निग्धः पित्ते शमनः श्लेष्मणि शोधन इत्यर्थः । अन्त्यश्चतुर्थो रोपणाख्यो व्रणानां आस्यव्रणशोधने योज्य इत्यर्थः ॥

तेषां साधनान्याह—

स्नेहैः, संशमनस्तिक्तकषायमधुरैरपैः ॥ २ ॥

स्निग्ध इत्यादि । अत्र एषु गण्डूषेषु मध्ये स्निग्धो वातहरैः स्वाद्वादिभिर्भवति । अरुणदत्तस्तु 'स्निग्धो मधुरादिसाधितैः स्नेहैर्भवती'त्याह ।

---

१. 'कि' इति मुद्रितपाठपाठः.

(सं)शमनस्तिक्तकषायमधुरशीतैरोपधैः घृतेलारिष्टजम्ब्वाम्रमार्त्तीपल्लवोत्पल-मधुककाथशर्करोदकक्षौद्रक्षीरेक्षुरसघृतादिभि स्यात ॥ २ ॥

शोधनस्तिक्तकट्वम्लपटूष्णै , गोपण पुन ।
कषायतिक्तकै ,स्तत्र स्नेह. क्षीरं मधूदकम् ॥ ३ ॥

शोधनो गण्डूष स्तिक्तकट्वादिभिरोपधैर्भवति । रोपणस्तु गण्डूष कषायतिक्तके स्यात् ॥

ननु द्रव्याणा शुष्कत्वात् गण्डूषानुपपत्तिरित्या—

शुक्त मद्यं रसो मूत्रं धान्याम्लञ्च यथाऽध्वम् ।
कल्कयुक्त विपक्वं वा यथास्पर्शं प्रयोजयेत् ॥ ४ ॥

तत्रेत्यादि । 'तत्र तेषु पूर्वोक्तेषु गण्डूषेषु स्नेहादिक कल्कयथास्व युक्त विपक्व वा कल्कयथास्पर्शं शीतमुष्ण वा प्रयोजयेत् । हृद्याकारोऽप्याह—'वाते तलादय स्नेहा यथायथं कल्केर्वातादिहरद्रव्य पिष्ट्वा चूर्णयित्वा वा सयोज्य धार्या तद्वदित्तयोगेपि विपक्व वातादिहरद्रव्यसिद्धै कषायेर्वा गण्डूषो धार्य.' इति ॥ ३, ४ ॥

दन्तहर्षे दन्तचाले मुखरोगे च वातिके ।
सुखोष्णमथवा शीत तिलकल्कोदक हितम् ॥ ५ ॥

दन्तहर्षादा सुखोष्णमथवा शीत दोषवशात् तिलकल्कोदक हितम् । हृद्याकारोऽप्याह—'दन्तहर्षादिषु वातिकेषु सुखोष्णमीषदुष्ण तिलकल्कमिश्रमुदक हितम् । अथवा शीत पित्तसम्बन्धे रक्तसम्बन्धे च सति शीतम्' इति ॥ ५ ॥

गण्डूषधारणे नित्यं तैलं मासरसोऽथवा ।

गण्डूषधारणे नित्यं तैलं मासरसो वा हितम् । नित्यमिति स्वास्थ्य-विषयम् । गण्डूषधारणे नित्य तैल हितम् ।

आगमो हि—

'दन्तोर्हर्षे स्थिरत्वे च बलोपचय, परं ।
स्यात् पर रसज्ञानत्वे च श्लक्ष्णदन्तता ॥

न चास्य कण्ठदोषः स्यादोष्ठयोः स्फुटनाद् भयम् ।
न च दन्ताः क्षय यान्ति दृढमूला भवन्ति च ॥
न शूल्यन्ते न चाम्लेन हृष्यन्ते भक्षयन्ति च ।
खरानपि परान् भक्ष्यान् खेदगण्डूपधारणात् ॥"

इति ॥

ऊषादाहान्विते पाके क्षते वागन्तुसम्भवे ॥ ६ ॥
पिप्पलाराग्निदग्धे च सर्पिर्धार्यं पयोऽथवा ।

ऊषादिषु सर्पिर्गण्डूषे धार्यं क्षीरं वा । ऊषादाहान्विते—वक्त्रे इति शेषः । ऊषा प्रादेशिको दाहः । पाको व्रणपाकः । क्षते वागन्तुजे । आगन्तुश्चूर्णादिः । तथा पिप्पे क्षाराग्निभ्यां दग्धे च ॥

वैशद्यं जनयत्यास्ये संदधाति व्रणानपि ॥ ७ ॥
दाहतृष्णाप्रशमनं मधुगण्डूषधारणम् ।

माक्षिकगण्डूषधारणं मुखे वैशद्यं जनयति पिच्छिले वदने मधुधारणे सति वैशद्यमपेक्ष्येदमुच्यते । कफहरं हि तत् । मुखे व्रणांश्च सन्दधाति व्रणहरं चेत्यर्थः । तथा दाहं तृष्णां च प्रशमयति ॥

धान्याम्लमास्यवैरस्यमलदौर्गन्ध्यनाशनम् ॥ ८ ॥

धान्याम्लं गण्डूष उपयुक्तं वदनवैरस्यं तथा मलं दौर्गन्ध्यं चापनयति ॥ ८ ॥

तदेवालवणं शीतं मुखशोषहरं परम् ।

तदेव काञ्जिकम् अलवणमीषल्लवणयुक्तं परमतिशयेन मुखशोषहरम् । अलवणमिति लवणनिषेधात् पूर्वत्र लवणविधिर्न भवतीत्यभिप्रायः ॥

आशु क्षाराम्बुगण्डूषो भिनत्ति श्लेष्मणश्चयम् ॥ ९ ॥

क्षाराम्बु क्षारेण स्वर्जिकादिना युक्तं जलं कफस्य चयं भिनत्ति ॥ ९ ॥

सुखोष्णोदकगण्डूषैर्जायते वक्त्रलाघवम् ।

सुखोष्णोदकगण्डूषैर्मुखलाघवं सम्पद्यते । सुखोष्णोदकधारणं कफहरत्वे सति लाघवस्यैवोपदेशाद् गौरवस्य कफसाध्यत्वादिति ॥

निवाते सातपे स्विन्नमृदितस्निग्धगात्रः ॥ १० ॥
गण्डूषमपिबन् स्निग्धमुष्णाम्भो विधारयेत् ।

निवात इत्यादिनेतिकर्तव्यतोक्ति । निवाते वातरहिते सातपे च आतपसहिते देशे आसीन. । हाटकोऽपि—"निवाते आतपसहिते स्थाने सुखोपविष्टः" इत्याह । तथा स्विन्नमृदितस्कन्धकन्धरः स्कन्धौ च कन्धरा च स्कन्धकन्धरं पूर्वं स्विन्नं पश्चान्मृदितं स्कन्धकन्धरं यस्य स एवम् । गण्डूषं वरमध्यावरं क्रमाद् चक्रार्धत्रिभागचतुर्भागपूरणद्रवरूपं कोलप्रमाणकल्करूपं वा गण्डूषं धारयेत् । अपिबन्, अतत्वादधोगामित्वं हि तस्य सम्भाव्यत इति तन्निषेधः । तथा किञ्चिदुन्नतास्य' । उक्तवाश्च—"अथ निवाते सातपे सुखोपविष्टस्तन्मनाः स्विन्नमृदितस्कन्धकपोललाटदेश क्रमाद् चक्रार्ध. त्रिभागचतुर्भागपूरणीं द्रवमात्रां कल्कं वा कोलप्रमाणं किञ्चिदुन्नामितमुखोऽन्यवहरन् धारयेत्" इति ॥

कियातरय काल इत्याह—

कफपूर्णास्यता यावत् स्रवद्घ्राणाक्षताथवा ।

साधारणे यावत् कफपूर्णास्यत्वं भवेत, अथवा यावत् स्रवद्घ्राणाक्षता भवेत् तावद् गण्डूषं धारयेत् । स्रवद्घ्राणाक्षि यस्मिन् स स्रवद्घ्राणाक्षः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' (५·४-११२) इति षच् । तस्य भावः स्रवद्घ्राणाक्षता । एव च गण्डूषाः पञ्च सप्त वा धारयितव्या, यावद्वा स्वास्थ्यं स्यात् ।

गण्डूषकबलयो· पर्यायत्वे सत्यपि स्वरूपभेदमाह—

असञ्चार्यो मुखे पूर्णे गण्डूषः कवलोऽन्यथा ॥ ११ ॥

असञ्चार्य इत्यादि । मुखे पूर्णे सति यः सञ्चारयितुमशक्यः स गण्डूष उच्यते । गण्डूषस्य तिस्रो मात्राः । तासामर्धमुखपूरणी श्रेष्ठा, त्रिभाग-मुखपूरणी मध्या, चतुर्भागमुखपूरण्यधमा । कल्कस्यापि कर्षो मुख्यः, अर्ध कर्षमानं मध्यं, चतुर्भागमानमधमम् । सञ्चारयितुं शक्यते मुखे पूर्णे सति यः स कवल उच्यते । अर्धं पूरणीं मात्रां धृत्वा श्लेष्मपूरितास्यत्वं यावत् तावद् धारणं गण्डूषः, मध्यमाधममात्राधारणेन स्रवद्घ्राणाक्षत्वं यावत्तावद् धारणं कवल इति । हाटकोऽपि "कवलगण्डूषयो सञ्चारासञ्चारकृतो-विशेष. । एवञ्च गण्डूषाः पञ्च वा सप्त वा धारयितव्याः यावद्वा स्वास्थ्यं स्यात् । यावद्वा सम्यक् पीतधूमलिङ्गोत्पत्ति" इत्याह । वचनं हि—

"त्रीन् पञ्च सप्त वा वारान् धारयेत् कवलमुखम् ।
अयोगयोगातियोगाः कवलस्य च धूमवत् ॥"

इति ॥ ११ ॥

मन्याशिरःकर्णमुखाक्षिरोगाः
प्रसेककण्ठामयवक्त्रशोषाः ।
हृल्लासतन्द्रारुचिपीनसाद्या
साध्या विशेषात् कवलग्रहेण ॥ १२ ॥

मन्याशिर इत्यादि । मन्यादीनां रोगेण सम्बन्धः । प्रसेकादीनां द्वन्द्वः । आमयशब्दस्य कण्ठेन सम्बन्धो विविधकण्ठरोगसूचनार्थः । मन्यारोगादयो विशेषेण कवलग्रहेण कवलधारणेन साध्याश्चिकित्स्याः । कवलग्रहेणेत्यत्र न स्वसंज्ञाग्रहणम्, वक्त्रान्तःप्रयुज्यमानत्वात् ॥ १२ ॥

प्रतिसारणमाह—

कल्को रसक्रिया चूर्णस्त्रिविधं प्रतिसारणम् ।

कल्क इत्यादि । प्रतिसारणं कल्कादिभेदेन त्रिधा त्रिप्रकारं स्यात् । प्रतिसारणं प्रतिघर्षणं स्नापनमिति पर्यायाः=(लौकाक्ष) । कल्को जलादिपिष्टः । मांसिकादिना द्रवीक्रियते यद् द्रव्यं सा रसक्रिया । चूर्णः प्रथितमेव । हृद्योकारोऽप्याह—'कल्को द्रवपिष्टः, रसक्रिया घनीभूता द्रवप्राया,' चूर्णमद्रवम्' इति ॥

तस्य कफरोगेष्वेव प्रयोग इत्याह—

युञ्ज्यात्तत् कफरोगेषु गण्डूषविहितौषधैः ॥ १३ ॥

तत् प्रतिसारणं कल्कादिरूपं यथायोग्यं कफरोगेषु गण्डूषोक्तैरौषधैर्युञ्ज्यात् । सामान्योक्तावपि कफरोगविषयत्वात् शोधनगण्डूषोक्तैरिति वेदम् ।

"गन्धशुण्ठ्युपकिल्लादौ वक्त्रान्तर्वेन प्रक्षिप्यते ।
प्रतिसारणमुद्दिष्टं तद् गण्डूषोक्तभेषजैः ॥ १३ ॥"

मुखे प्रयुज्यमानत्वात् त्रिविधत्वाच्च मुखालेपोऽपि—

मुखालेपस्त्रिधा दोषविषहा वर्णकृच्च सः ।
उष्णो वातकफे शस्तः शीतः पित्तेऽत्यर्थशीतलः ॥ १४ ॥

मुखेत्यादि । मुखालेपस्त्रिप्रकारः । दोषघ्नो विषघ्नो वर्णकरश्च । स च मुखालेपो वातकफे उष्णः शस्तः वाते कफे च कोष्णो हित इत्यर्थः

तत्र तेषु मध्ये रौक्ष्यादिषु अभ्यङ्गः प्रयोक्तव्यः । अरूंषिकादिषु परिषेकः प्रयोक्तव्यः । अरूंष्येवारूषिका । केशशातादिषु पिच्चुः प्रयोक्तव्यः । वस्तिः पुनः प्रसुप्त्यादौ प्रयोज्यः ॥ २३-२५ ॥

अस्य शिरोवस्तेरप्रसिद्धत्वात् तद्विधानमुच्यते—

विधिस्तस्य निषण्णस्य पीठे जानुसमे मृदौ ॥ २६ ॥
शुद्धाक्तस्विन्नदेहस्य दिनान्ते गव्यमाहिषम् ।
द्वादशाङ्गुलविस्तीर्णं चर्मपट्टं शिरस्समम् ॥ २७ ॥
आकर्णबन्धनस्थानं ललाटे वस्त्रवेष्टिते ।
चेलवेणिकया बध्वा मापकल्केन लेपयेत् ॥ २८ ॥

विधिरित्यादि । तस्य शिरोवस्तेर्विधिर्विधानमुच्यत इति शेषः । जानुसमे जानुतुल्ये तथा मृदौ वस्त्राद्यास्तरणादिनास्तृतत्वादकठिने निषण्णस्य उपविष्टस्यासीनस्य तथा शुद्धाक्तस्विन्नदेहस्य नरस्य शुद्धो वमनादिना अक्तस्तैलादिना स्विन्नश्च स्वेदेन सङ्करादिना देहः शरीरं यस्य सः एवं तस्य । वृद्धाकारस्तु 'शुद्धो वमनविरेचनाभ्यां, यद्यपि शुद्धिरिति निरूहणस्याप्यनुवर्तनामप्याख्या । तथापि वमनविरेचनयोरेवात्र ग्रहणम्' इत्याह । 'अक्तस्तैलेन' इति च । कदा दिनान्ते सायं रात्रौ वा । चर्मपट्टं चर्मखण्डम् । गव्यं वा माहिषं वा गव्यं गोर्माहिषं महिषस्य । तथा द्वादशाङ्गुलविस्तीर्णं तथा 'शिरस्समं' शिरस्तुल्यं दैर्घ्येण तथा आकर्णं कर्णं यावद् बन्धनस्थानं बन्धनस्थितिर्यस्य तदेवं कर्णप्रवेशनमिति यावत् । तदेवंविधं चर्मपट्टं ललाटे वस्त्रवेष्टिते वस्त्रखण्डेन बद्धे निवेश्य चेलवेणिकया वस्त्रपट्टिकया बध्वा मापकल्केन कदुष्णाम्बुमृदितेन लेपयेद् गोधूमकल्केन वा । संग्रहे तूक्तम्— "निवातस्थस्य स्नेह्यतस्विन्नस्य जानुसमसोपाश्रयासनोपविष्टस्य केशान्ते ललाटे अङ्गुलं मापपिष्टेन सूक्ष्मेण सघृतमुष्णाम्बुना मृदितेनोभयतः परिघे वस्त्रं बध्नीयात् । तस्योपरि संघाय वस्तिमूलं दृढमवलोकं चेलवेणिकया बध्वा पुनर्मापपिष्टेनापरिसार्यमनं कृत्वा" इत्यादि ॥ २६-२८ ॥

ततो यथाव्याधि मृदु स्नेहं कोष्णं निषेचयेत् ।
ऊर्ध्वं केशभुवो यावदङ्गुलं धारयेन्नरम् ॥ २९ ॥

---

१ 'स्नेह' २. 'वस्त्रं' इति मुद्रितपुस्तकपाठः ।

तत एव कृते सत्यनन्तरं यावद्व्याधि व्याध्यनुसारेण मृतं पक्वमन्यतम स्नेहं सुखोष्णमासेचयेत् केशभुवो यावत् केशभूमेः केशभूकादुपरि यावदङ्गुलं तावत् स्नेहं निषेचयेत्।

स च स्नेहः कियन्तं काल धारयितव्य इत्याह—

आवक्त्रनासिकोत्क्लेदाद्, दशाष्टौ षट् चलादिषु।
मात्रासहस्राण्यं, रुजेच्चैक, स्कन्धादि मर्दयेत् ॥ ३० ॥
मुक्तस्नेहस्य, परमं सप्ताहं तस्य सेवनम्।

धारयेदित्यादि। तं च स्नेहमावक्त्रनासिकोत्क्लेदाद् यावद् वक्त्रनासिकाद्रुति स्यात् तावत् धारयेत्। दशेत्यादि। चलादिषु वातादिषु यथासङ्ख्यं दशाष्टौ षट् मात्रासहस्राणि स्नेहं धारयेत्। वाते दशमात्रासहस्राणि, पित्तेऽष्टौ, कफे षण्मात्रासहस्राणीत्यर्थः। अरुजे तु स्वस्थवृत्ते एकमात्रासहस्रं धारयेत्। मुक्तस्नेहस्यापनीतशिरोबस्ते स्कन्धादिषु मर्दयेत्। आदिशब्देन ग्रीवालाटपृष्ठशिरांसि गृह्यन्ते। स्नेहबस्तिर्हि स्नेहशब्देनात्र गृह्यते। तत उष्णाम्बुस्नातं च यथाहं भोजयेत्। स्नेहोक्तं चास्याहारविहारमादिशेत्। अत्र ह्युवाच। 'उष्णोदकोपचारी स्यात्' इत्यारभ्य

'सर्वकर्मस्वयं प्रायो व्याधिक्षपिषु च क्रमः'।

इति। तस्य च स्नेहबस्तेः परमं सेवनं सप्त दिनानि। तस्मात् त्रीणि पञ्च सप्त वाहानि रोगापेक्षया कर्तव्यं शिरोबस्तिरित्यवतिष्ठते ॥ ३० ॥

स्नेहधारणप्रस्तावात् कर्णपूरणधारणोक्त —

धारयेत् पूरणं कर्णे कर्णमूलं विमर्दयन् ॥ ३१ ॥
रुजः स्यान्मार्दवे यावन्मात्राशतमवेदने।

धारयेदित्यादि। तथा कर्णपूरणं स्नेहं धारयेत्। किं कुर्वन्, कर्णमूलं विमर्दयन्। कियन्तं कालं, यावत्पीडाया मार्दवं भवेत्। अवेदने स्वस्थवृत्ते मात्राशतं यावत् तावद् बिभृयात् ॥

मात्राप्रसङ्गात् तस्या अपि लक्षणमाह—

यावत् पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम्।
निमेषोन्मेषमात्रेण सम मात्रा तु सा स्मृता ॥ ३२ ॥

अत्युष्णस्य कफविलयनतो रोगवृद्धिरिति कफोल्प इति चेदम्। शेषेषु पित्ते श्लेष्मविषे वातविषे च रक्ते च रक्तसंसर्गे चातिशयेन शीतलः शीतः शस्तः ॥ १४ ॥

त्रिभागश्चतुर्भागस्त्रिभागार्धाङ्गुलोन्नतिः ।
अशुष्कस्य स्थितिस्तस्य शुष्को दूषयति त्वचम् ॥ १५ ॥
तमार्द्रीयित्वापनयेत् तदन्तेऽभ्यंगमाचरेत् ।
विवर्जयेद्दिवास्वप्नमाप्यान्यातपशुष्कुधः ॥ १६ ॥
न योज्यः पीनसेऽजीर्णे दत्तनस्ये हनुग्रहे ।
अरोचके जागरिते, स तु हन्ति सुयोजितः ॥ १७ ॥

अकालपलितव्यंगवलीतिलकनीलिकाः ।

स च त्रिभागः त्रीणि पर्वाणि यस्य स त्रिभागः । कथमित्याह— वातादिष्वङ्गुलचतुर्भागोन्नतिः अङ्गुलत्रिभागोन्नतिः अङ्गुलार्धभागोन्नतिरिति । उन्नतिरुत्सेधः । अङ्गुलशब्दस्य समस्तन्यापि निष्कृष्यान्यत्राप्यन्वयोऽर्थवशात् । तस्य सुखालेपस्याशुष्कस्य स्थितिः । न च शुष्कस्येत्यर्थः । हृद्याकारोऽपि 'अशुष्कमेवापनयेद्' इत्याह[1] । शुष्कस्तु सुखालेपश्छविं त्वचो दूषयति । तं सुखालेपमार्द्रयित्वा जलादिभिरित्यर्थः । 'त शुष्कम्' इति केचित् । हृद्याकारोऽपि 'शुष्कश्चेदार्द्रयित्वापनयेत्' इत्याह । तदन्ते आलेपान्ते तस्मिन् अपनीते अभ्यङ्गं कुर्यात । सुखालेपी च दिवास्वप्नादीन् वर्जयेत् । सुखालेपे क्रियमाणे दिवास्वप्नादयो वर्जनीया । यतः स्वप्नजागरणात् त्वक्कफदूषणसंदुष्टयुपघातादिभयं स्यात् । पीनसादिषु जागरितालेपे सुखालेपो न योज्य ।

स तु सुखालेप सुयोजित[2] सम्यक् प्रयुक्तः विधिना सेवितः अकालपलितादीन् नाशयति ॥

ऋतुभेदेन लेपद्रव्यभेदानाह—

कोलमज्जा वृषान्मूलं आचरं गौरसर्षपाः ॥ १८ ॥
सिंहीमूलं विलः कृष्णा दार्वीत्वङ् निस्तुषा यवाः ।

---

१ 'स च' इति हृदयपुस्तके २. 'सिंहि' इति हृदयाष्टाङ्गहृदये सङ्ग्रहे च.

दर्भमूलहिमोशीरशिरीषमिसितण्डुलाः ॥ १९ ॥
कुमुदोत्पलकह्लारदूर्वामधुकचन्दनम् ।
कालेयकतिलोशीरमांसीतगरपद्मकम् ॥ २० ॥
तालीसगुन्द्रापुण्ड्राह्वयष्टीकाशनतागरुः ।
अर्धार्चैर्विहिता लेपा हेमन्तादिषु षट् स्मृताः ॥ २१ ॥

कोलमज्जेत्यादि । कोलमज्जादयोऽर्धार्चैर्विहिताः अर्धश्लोकोक्ताः षट् सुखालेपा हेमन्तादिषु षट्सु ऋतुषु हेमन्तशिशिरवसन्तग्रीष्मवर्षाशरत्सु क्रमात् स्मृता. । मुनिभिरिति शेषः । इत्यर्धार्चैर्दिनालेपा इति वा पाठ· । कालेयकं पीतचन्दनम् । 'रक्तपत्री'ति केचित् ॥ १८-२१ ॥

सुखालेपनशीलानां दृढं भवति दर्शनम् ।
वदनञ्चापरिम्लानं श्लक्ष्णं तामरसोपमम् ॥ २२ ॥

सुखालेपाभ्यासवतो दर्शनं दृष्टिः दृढं स्यात् । चक्षुः सबलं भवति, मुखं च विकसित पद्मामिव कोमलं पद्मतुल्यं च जायते ॥ २२ ॥

अभ्यङ्गप्रसङ्गात् तमाह—

अभ्यङ्गमेकपिचवो वस्तिश्चेति चतुर्विधम् ।
मूर्धतैलं, बहुगुणं तद्विद्यादुत्तरोत्तरम् ॥ २३ ॥
तत्राभ्यंगः प्रयोक्तव्यो रौक्ष्यकण्डूमत्कादिषु ।
अरूंषिकाशिरस्तोददाहपाकव्रणेषु तु ॥ २४ ॥
परिपेकः, पिचुः केशजातस्फुटनधूपने ।
नेत्रे स्तब्धे च, वस्तिस्तु प्रसुप्त्यर्दितजागरे ॥ २५ ॥
नासास्यशोषे तिमिरे शिरोरोगे च दारुणे ।

अभ्यङ्गेत्यादि । अभ्यङ्गादिभेदेन मूर्धतैलं चतुर्विधं भवति । शिरसि यत् तैलं दीयते तन्मूर्धतैलमुच्यते । मूर्ध्नि तैलप्रयोगो मूर्धतैलमित्यर्थः । तच्च मूर्धतैलमुत्तरोत्तरं बहुगुणं विद्यात् । वस्ति· सर्वशरीरे प्रयुज्यत इति प्रसिद्धः । मेकस्तैलेन । पिचुः कार्पासमयः । वस्तिरिति 'वस निगमे' वसतीति वस्तिः "वसेस्तिपू" इति तिपूप्रत्ययः । चिरकालं शिरसि तिष्ठतीत्यर्थः ।

---

१. 'इत्यर्धार्चैर्दिन लेपा' मर्धश्लोकोक्तद्रव्य लेपे प.

यावदित्यादि । दक्षिणं हस्ताग्रं कर्तृ यावज्जानुमण्डलं दक्षिणं पर्येति परिवृत्यैति आवृत्य गच्छति परिवर्तत इत्यर्थः । क्रियता कालेन, निमेषोन्मेषमात्रेण समं निमेषोन्मेषकालेन समम्, न तु विश्रम्य । सा मात्रा स्मृता । तावान् कालो मात्रा स्मृता मुनिभिरिति शेषः । दक्षिणशब्देनात्र काकाक्षिन्यायेन द्वयोरपि युज्यते । अन्यत्राप्युक्तम्—

"निमेषोन्मेषण पुंसा स्फोटन वा तथाङ्गुलेः ।
अक्षरस्य ह्रस्वोर्वापि मात्रा तूच्चारण स्मृतम् ॥" इति ॥

कचसदनसितत्वपिञ्जरत्वं
परिपुटनं शिरसः समीरोगान् ।
जयति जनयतीन्द्रियप्रसादं
स्वरहनुमूर्धबलं च मूर्धतैलम् ॥ २३ ॥

कचानां सदनादिभि सम्बन्धः । परिपुटनं कचानामेव । प्रकृतत्वाच्छिरसः समीरोगान् शिरसि स्थितान् वातरोगाश्च जयति हन्ति । कचशतनेति पाठे कचानां शतनादय । शिरस परिपुटन समीरोगाश्च शिरसि स्थिता एव । इन्द्रियाणां चक्षुरादीनां प्रसादं जनयति । तथा स्वरादिबल च जनयति मूर्धतैलं कर्तृ ॥ २३ ॥

इति हृदयबोधिकायां द्वाविंशोऽध्याय ॥

अथ त्रयोविंशोऽध्यायः ।

—०—

ऊर्ध्वाङ्गस्य प्रकृतत्वात् तत्र च नेत्रयोः प्राधान्यात् शालाक्यस्य चाक्षिप्रयोजनत्वात् सूत्रस्थाने नेत्रोपचाराध्याय आरभ्यते । अथवा—

'शिरोवस्तिविधावुक्तमिन्द्रियाणां प्रसादनम् ।
तेन नेत्रप्रसादार्थमप्याश्च्योतनमुच्यते' ॥

'कफलादिप्रसङ्गादाश्च्योतनाञ्जनविधिमाह' इति पाठान्तरम् ॥

अथात आश्च्योतनाञ्जनविधिमध्यायं व्याख्यास्यामः ।

आश्च्योतनं नयनसेकः । तथाञ्जनं च । तयोर्विधिर्यस्मिन्नध्याये स एवम् ।

सर्वेषामक्षिरोगाणामादावाश्च्योतनं हितम् ।
रुक्तोदकण्डूघर्षाश्रुदाहरागनिबर्हणम् ॥ १ ॥

सर्वेषामित्यादि । सकलानामक्षिरोगाणां वक्ष्यमाणानामादौ प्रथममाश्च्योतनं नयनसेकः कषायादिना यथास्वं नानाद्रव्यपरिकल्पितेन हितं शस्तम् । यत्तस्मादाश्च्योतनमुपयुक्तं रुगादिघ्नं स्यात् । रुगादिनाशनत्वादाश्च्योतनं कार्यमित्यर्थः । अव्यक्तेषु रुगादिषु आश्च्योतनद्रव्यैरक्षिलेपो हितः । उक्तवांश्च—

'आश्च्योतनं हि सर्वाक्षिरोगेष्वाद्य उपक्रमः ।'

इति ॥

नानाद्रव्यकल्पनया रागाश्रुघर्षरुक्तोददाहशोफकण्डूनाम् । अव्यक्तेष्वेवक्षुण्णेन पक्ष्मपरिहारेणाक्षिकोशालेपनमाश्च्योतनद्रव्यैः । तत् पुनर्विलाक्यसंज्ञं भवति । आश्च्योतनविलाक्ययोरकाले रात्रिः कालश्च सर्वमहरिति ॥ १ ॥

उष्णं वाते कफे कोष्णं तच्छीतं रक्तपित्तयोः ।

तत्र आश्च्योतनं वाते वातिकेषु रोगेषु उष्णं नात्युष्णम् । कफे कोष्णम् अत्यल्पोष्णमिति माध्यम् । स्पर्शशीतोचितत्वाद् दृष्टेः । रक्ते पित्ते च शीतलं हितम् ।

आश्च्योतनविधानमाह —

निवातस्थस्य यामेन पाणिनोन्मील्य लोचनम् ॥ २ ॥
शुक्त्या प्रलम्बयान्येन पिचुवर्त्या कनीनिके ।
दश द्वादश वा बिन्दून् व्यङ्गुलादवमेचयेत् ॥ ३ ॥

---

१ अष्टाङ्गपाठे 'आश्च्योत्य इत्येव दृश्यते ।

ततः प्रमृज्य मृदुना चेलेन कफवातयोः ।
अन्येन कोष्णपानीयप्लुतेन स्वेदयेन्मृदु ॥ ४ ॥

निवातस्थस्येत्यादि । निवातदेशे शयनस्थितस्यातुरस्य वैद्यो वामेन पाणिनोन्मील्य लोचनमपाङ्गदेशे भाजनं निधायान्येन दक्षिणेन पाणिना शुक्तौ प्रलम्बया पिचुवर्त्या दश द्वादश वा बिन्दून् कनीनिके नासानिकटे नेत्रप्रदेशे व्यङ्गुलाद् व्यङ्गुलोच्छ्रायादवसेचयेत् । नातिदूरान्नातिनिकटात् । एवमस्य बिन्दुपतेनाक्षिताडनाद् रागादयो न जायन्ते । हृद्याकारोऽपि 'अङ्गुलसन्ने कृत न दोषं स्रावयति । व्यङ्गुले कृतमक्षिरागाय स्यादिति व्यङ्गुलवचनम्' इत्याह । अनन्तरं कोमलेन चेलेन वस्त्रखण्डेन प्रमृज्य शोधयेत् । शोधयित्वान्येन शोधनाच्चेलादन्येन चेलेन वस्त्रखण्डेन कोष्णजलाप्लुतेन कफवातयोरक्षि मृदु नातिशयेन स्वेदयेत । न तु रक्तपित्तयोरित्यर्थः ॥ ४ ॥

आश्च्योतन द्रव्यस्वरूप वक्तुकामस्त्याज्यस्वरूपमाह —

अत्युष्णतीक्ष्णं रुग्रागदाहनाशायाक्षिसेचनम् ।
अतिशीतं तु कुरुते निस्तोदस्तम्भवेदनाः ॥ ५ ॥
कषायवर्मतां घर्षं कृच्छ्रादुन्मेषणं बहु ।
विकारवृद्धिमत्यल्पं संरम्भमपरिस्रुतम् ॥ ६ ॥

अत्युष्णेत्यादि । अत्यर्थमुष्णमतितीक्ष्णं चाक्षिसेचनमाश्च्योतनं रुजे रोगाय दाहनाशाय च स्यात् । हृद्याकारस्तु — 'अत्युष्णतीक्ष्णं अत्युष्णैरतितीक्ष्णैश्च द्रव्यैरक्षिनेत्रकादिभिः कृतं रागादिकर नेत्रयोरिति तत् त्याज्यम्' इत्याह । अक्षिसेचनमिति सर्वत्र संबध्यते । अतिशीतं चाश्च्योतनं निस्तोदादीन् विधत्ते । निस्तोदः सूच्येव व्यधः । स्तम्भोऽक्ष्णः स्तम्भनमिव । वेदना शूलम् । बहु अतिमात्रमाश्च्योतनं, कषायवर्मतादीन् कुरुते । कषायवर्मता बहलवर्मता । स्थूलवर्मता वर्मनोरीषच्छोफोत्पत्तिरित्यर्थः । अथवा कषायवर्मता रक्तवर्मता । (ഇഷ പ്രയോഗം) घर्षः वर्मनोः परस्पर संश्लेषात् कंटकटायनम् । अथवा कषायवर्मता श्लिष्टवर्मता । घर्षः पांसुपूर्णमतिभासः (കക്കരകടം) । अत्यल्पमक्षिसेचनं विकारस्य वृद्धिं कुरुते । अपरिस्रुतं बहुशः पटेनागालितमाक्षिसेचनं संरम्भं नेत्रयोः क्षोभं कुरुते । अपरिस्रुतं = (ഗാഢീകൃതം) 'संरम्भो सह्या वेदना' इति हृद्याकारः । 'संरम्भः = (കക്കരകടം)' इति पाठ्यकारः ॥ ६ ॥

तदारुच्योतनं कियन्मात्रं किदृक्षं कदा कया युक्त्या दोषरहितमित्यत आह—

गत्वा सन्धिशिराघ्राणमुखस्रोतांसि भेषजम् ।
ऊर्ध्वगान्नयने न्यस्तमपावर्तयते मलान् ॥ ७ ॥

गत्वेत्यादि । 'कया युक्त्या नेत्रप्रयुक्तमौषधं दोषानपनयतीत्याह—गत्वेत्यादिना' इति हाटकः । सन्ध्यादीनां द्वन्द्वः । स्रोतःशब्देन षष्ठीसमासः । सन्धिशब्देन अक्षिकोशसबन्धिनः सन्धयो गृह्यन्ते । तेनाक्षिकोशसन्धिस्रोतांसि शिरास्रोतांसि घ्राणस्रोतांसि च गत्वा नयने न्यस्तं क्षिप्तमौषधं जन्तुण ऊर्ध्वगान् दोषानपावर्तयते आकर्षति । यावन्मात्रेण सन्ध्यादिषु सर्वं गच्छति तावता सेकः कार्य इति मात्रोक्तिः । सन्धिशिराघ्राणमुखस्रोतस्सु रसाभिव्यक्तिरिति कालोक्तिः । सन्ध्यादिषु स्थितं दोषं चालयित्वापावर्तयति नाशयति । नयने प्रयुक्तं तदिति युक्त्यभिधानम् ॥ ७ ॥

अथाञ्जनं शुद्धतनोर्नेत्रमात्राश्रये मले ।
पक्वलिङ्गेऽल्पशोफार्तिकण्डूपैच्छिल्यलक्षिते ॥ ८ ॥

अथारुच्योतनादनन्तरम् अञ्जनं प्रयोक्तव्यम् । कीदृशस्यातुरस्य, शुद्धतनोः शोधितशरीरस्य वमनादिभिर्नस्यादिभिश्च मले दोषे नेत्रमात्राश्रये न तु सकलशरीरव्यापिनि नेत्र एव तिष्ठति दोषे तदाञ्जनप्रयोगः । तथा पक्वलिङ्गे पक्वलिङ्गता कथं वास्येति विशेषणद्वारेणाह—अल्पशोफेनार्तिकण्डूपैच्छिल्येन लक्षिते अवगते पक्वलिङ्गे सति । हृन्दुरपि 'पक्वलिङ्गेऽल्पशोफादिभिर्लक्षिते उद्भाविते ज्ञाते सति' इत्याह । हृद्याकारस्तु—'पक्वलिङ्गेऽल्पशोफार्तिकण्डूपैच्छिल्यलक्षणे' इति पठति । अर्थः—पक्वलिङ्गे परिपाकलक्षणे सति कीदृशे अल्पशोफार्तिकण्डूपैच्छिल्यलक्षणे अल्पो मन्दः शोफः अल्पार्तिर्वेदना अल्पा कण्डूश्च श्लेष्मणः पैच्छिल्यम् । लक्षणशब्दः स्वरूपवचनः । अल्पाः शोफादय एव स्वरूपं पक्वलक्षणमित्यर्थः ॥ ८ ॥

पक्वलिङ्गतामपि नेत्रविशेषणेन दर्शयति—

मन्दघर्षाश्रुरागेऽक्ष्णि प्रयोज्यं घनदूषिके ।
आर्ते पित्तकफासृग्भिर्मारुतेन विशेषतः ॥ ९ ॥

मन्दघर्षाश्रुरागेऽक्ष्णीति । **मन्दाः** अल्पाः घर्षादयो यस्मिन् नयने तस्मिन् । एतदपि पक्कलिङ्गमेव । तथा **घनदूषिके** चाक्षिणि अञ्जनं प्रयोज्यम् । घना दूषिका यस्मिन् नयने तस्मिन् । तदपि दोषाणां पक्कलिङ्गमेव । **दूषिका**=(ပြိန်စ)। तथा पित्तेन कफेन रक्तेन चार्ते पीडितेऽक्ष्णीति सम्बन्धः । मारुतेन संसृष्टैः पित्तादिभिरार्तेऽक्षिणि विशेषेणाञ्जनं प्रयोज्यम् । केवलेन वा वातेनार्ते स्रावणस्यानपेक्षितत्वान्मारुतेन संसृष्टैरिति वाच्यम् । अथवा विशेषतः पित्तादिभिरार्द्रे नेत्रे । न विशेषशब्दस्य मारुतेन सम्बन्धः । पित्तादिदोषक्रमो नं विवक्षितः । वातपित्तकफशोणितैर्दूषिते नेत्रे विशेषतोऽञ्जनं प्रयोजयेदिति ॥ ९ ॥

लेखनं रोपणं दृष्टिप्रसादनमिति त्रिधा ।
अञ्जनं, लेखनं तत्र कषायाम्लपटूषणैः ॥ १० ॥

रोपणं तिक्तकैर्द्रव्यैः, स्वादुशीतैः प्रसादनम्

तदञ्जनं लेखनादिभेदेन त्रिप्रकारम् । लिख्यते शल्येनेव शुक्लार्मादीति **लेखनम्** । रोप्यते संरोह्यतेऽभिष्यन्दादीति **रोपणम्** । प्रसाद्यते निर्मलीक्रियतेऽनेनेति प्रसादनं दृष्टेः **प्रसादनम्** । सङ्ग्रहे च—'यत् स्नेहनमञ्जनं कथितं तद् रोपणदृष्टिप्रसादनयोरेवान्तर्भूतत्वात् पृथङ्नोक्तम्' । हारीतोऽपि—'रोपणदृष्टिप्रसादनयोरन्तर्भूतत्वात् स्नेहनमञ्जनं पृथङ्नोक्तम्' इत्याह । हृद्याकारोऽप्याह—'शुक्लार्मादिकं विलिख्य नाशयतीति लेखनं, व्रणादीनां संरोहणं करोतीति रोपणं, प्रसन्नत्वं निर्मलत्वं करोतीति प्रसादनम्' इति । अन्यत्रोक्तं सङ्ग्रहे—'तत्तु लेखनं रोपणं स्नेहनं प्रसादनमिति चतुर्विधं भवति' इति । सारकृत्याह—'त्रिधाञ्जनं' इति । 'षड्विधं प्रतिरसभेदादञ्जनं' इति केचित् । 'तीक्ष्णमृदुकल्पनया द्विविधमञ्जनं' इति केचित् । 'स्नेहनेन सह चतुर्विधम्' इति सङ्ग्रहे । अत्र त्रिविधग्रहणं प्रसादनस्नेहनयोरेकत्वविवक्षयेति । तत्र तेषु त्रिष्वञ्जनेषु मध्ये लेखनमञ्जनं कषायादिभिर्द्रव्यैः शुक्लार्मादिषु प्रयोज्यम् । रोपणं तिक्तकैर्द्रव्यैः स्यात् । तिक्तग्रहणमुपलक्षणार्थम् । तेन सङ्ग्रहोक्तैः कषायद्रव्यैः सक्षौद्रैः रोपणमञ्जनं वेद्यम् । स्वादुशीतैर्द्रव्यैः प्रसादनम् । यत्तु हि—'तत्राम्लादिरसः पञ्चभिः शुक्लार्मादिषु लेखनम् । तिक्तकषायैः सक्षौद्रैरभिष्यन्देषु रोपणम् । सर्पिर्दिवसाभिर्यातनिमिरादिषु स्नेहनम् । स्वादुशीतैः सक्षौद्रैरभिष्यन्दान्ते सूर्योपरागादानिविघुत्सम्पात-

भूतपिशाचात्यद्भुतदर्शनोपहतायां दृष्टौ स्वस्थवृत्ते च प्रसादनम्' इति । प्रसादनमेव चूर्णं तीक्ष्णेनाञ्जनेनाभिसन्तप्ते चक्षुषि प्रयुज्यमानं प्रत्यञ्जनसंज्ञां लभते ।

अञ्जनप्रयोगे करणभूतं शलाकायन्त्रमाह—

दशाङ्गुला तनुर्मध्ये शलाका मुकुलानना ॥ ११ ॥
प्रशस्ता लेखने ताम्री रोपणे काललोहजा ।
अङ्गुली च सुवर्णोत्था रूप्यजा च प्रसादने ॥ १२ ॥

दशेत्यादि । दशाङ्गुला राजमाषसदृशपरिमाणा शलाका प्रशस्ता । मध्ये तनुः तथा मुकुलानना वृश्चिकामुकुलाकारे द्वे आनने मुखे यस्याः सा' अतीक्ष्णाग्रेत्यर्थः । लेखने अञ्जने ताम्री ताम्रमयी शलाका प्रशस्यते । रोपणे काललोहजा आयसी प्रशस्ता । काललोहं कृष्णायसम् । अङ्गुली च हस्तावयवविशेषो रोपणे एव । प्रसादने अञ्जने सुवर्णोत्था कनकमयी रूप्यजा च रूप्यमयी शलाका प्रशस्तेत्यन्वयः ॥ १२ ॥

पिण्डो रसक्रिया चूर्णस्त्रिधैवाञ्जनकल्पना ।
गुरौ मध्ये लघौ दोषे ताः क्रमेण प्रयोजयेत् ॥ १३ ॥

अञ्जनं त्रिप्रकारं स्यात् । कथम् ? पिण्डो रसक्रिया चूर्ण इति । पिण्डो वर्तिः । रसक्रिया मध्वादिना द्रवीकृता । चूर्णो रेणुः । तान् पिण्डरसक्रिया-चूर्णान् यथापूर्वं बलिनो गुरुदोषादिषु क्रमेण प्रयोजयेत् । गुरौ बलवति दोषे पिण्डः प्रयोज्यः । मध्ये मध्यबले दोषे रसक्रिया । लघौ मृदुबले दोषे चूर्ण इत्यर्थः ॥ १३ ॥

द्रव्यमात्रं पिण्डस्य चेक्षुमाया रसक्रिया ।
तीक्ष्णस्य द्विगुणं तस्य मृदुनः, चूर्णितस्य च ॥ १४ ॥
द्वे शलाके तु तीक्ष्णस्य तिस्रः स्युरितरस्य च ।

पिण्डस्येत्यादि । तीक्ष्णद्रव्यस्य तीक्ष्णद्रव्यकृतपिण्डस्य द्रव्यमात्रं प्रमाणं भवतीति । मृदुद्रव्यकृतस्य पिण्डस्य द्विगुणं प्रमाणं द्विद्रव्यमात्रं भवतीति । रसक्रियायां तीक्ष्णद्रव्यकृतायां पिण्डफलमात्रं प्रमाणमाहुः । मृदुद्रव्यकृतायां द्विपिण्डफलमात्रं प्रमाणमिति वैद्यम् । त्रिपुष्पफलमात्रकमिति वा पाठः ।

विडुण्डो विलम्बः तस्य फलम् । चूर्णे तीक्ष्णे द्विगुणां शलाकां मृदौ त्रिगुणां शलाकामभिदधुः । हाटकोऽप्याह—'पिण्डे तीक्ष्णे कलायमात्रं प्रमाणं रसक्रियायां विलम्बफलमात्रकं तीक्ष्णे द्विगुणा शलाका चूर्णे, सर्वत्रोक्ता द्विगुणा मात्रा मृदौ' इति । तन्त्रान्तरेऽपि प्रोक्तं—'लेखनमञ्जनं ताम्ररजतकांस्यान्यतमधातुषु धार्यम् । रोपणं सुवर्णपात्रशङ्खान्यतमेषु धार्यम् । प्रसादनं स्फटिकाक्षचन्दनान्यतमेषु धार्यम् । एवं ह्यञ्जनमव्यापन्नगुणं भवति । वर्तिघर्षणार्थं शिला अतिश्लक्ष्णा निम्नमध्यानुद्दारिणी पद्माङ्कुलायता त्र्यङ्गुलविशाला' इति । अन्यत्राप्युक्तम्—

"पात्रे तु कुर्यात् सौवर्णे मधुरं राजतेऽम्लकम् ।
लवणं मेषशृङ्गे स्यात् कांस्ये तिक्तकृतं भवेत् ॥
वैडूर्यमणिसम्भूते कटुकं ताम्रलोहयोः ।
पात्रेऽञ्जनं कषायोत्थं स्थापयेद् बहुविद् भिषक् ।
शङ्खे नले वृक्षमये स्फाटिके शीतमञ्जनम् ॥"
इति ॥

अत्र कालेऽञ्जनं न योज्यं तमाह—

निशि स्वप्ने न मध्याह्ने म्लाने नोष्णगभस्तिभिः ॥ १५ ॥
अक्षिरोगाय दोषाः स्युर्वर्धितोत्पीडितद्रुताः ।

निशीत्यादि । निशि रात्रावञ्जनं न प्रयोज्यम् । तथा स्वप्ने स्वप्नकाले अञ्जनं न प्रयोज्यम् । मध्याह्ने अञ्जनं न प्रयोज्यम् । म्लाने लोचनेऽञ्जनं न प्रयोज्यम् । केन म्लाने ? उष्णांशुदीधितिभिः । यस्मादेषु कालेष्वञ्जनेन प्रयुक्तेन दोषा वृद्धिं नीताः, तथान्यस्थानगतत्वादुत्पीडितास्तथा द्रुताः कालस्यौष्ण्याद् विलयं गता अक्षिरोगाय स्युः । तस्मादेषु कालेषु अञ्जनं न प्रयोज्यम्' इति अरुणदत्तोक्तिः । 'हाटकोऽप्याह—'निशि रात्रौ अञ्जनं न प्रयोज्यम् । तथा स्वप्नकाले न योज्यम् । तथोष्णगभस्तिभिर्म्लाने लोचने, यस्मादेषु कालेष्वञ्जने प्रयुक्ते यथाक्रमं वर्धिता उत्पीडिता द्रुता दोषा अक्षिरोगाय स्युः' इति । हृद्याकारस्त्वेवमाह—

'निशि स्वप्ने न च म्लाने योज्यमुष्णगभस्तिभिः ।'

इति । 'निशि रात्रौ स्वप्ने कृते उष्णगभस्तिभिरादित्यकिरणैर्म्लाने तान्ते चक्षुषि तीक्ष्णमञ्जनं न योज्यम् । एषु कालेषु प्रयुक्तेनाञ्जनेन वर्धिता वृद्धिं नीताः घट्टपीडिता ऊर्ध्वं गता द्रुता द्रवीभूताः वातादयश्चक्षूरोगाय भवन्ति ।' अयमर्थः स्वप्नेन कृतेन वर्धितानां दोषाणां शान्त्यै प्रातःकालेऽञ्जयेद् मध्याह्ने तीक्ष्णतरैरादित्यकिरणैरुत्पीडितानां दोषाणां न.शाय सायमपराह्णे चाञ्जयेदिति । सारकृच्चेवमाह —

'निशि स्वप्नेन मध्याह्ने पानान्नोष्णगभस्तिभिः ।'

इति । अस्मद्गुरवोऽब्रुवन्, सर्वेषामपि प्रायशोऽयमेव पाठः । अस्यार्थः सुबोध एव । तथाप्यरुणदत्तदुर्व्याख्यातत्वाद् विलिख्यते । रात्रौ स्वप्नेन वर्धितोत्पीडितद्रुता दोषा अक्षिरोगाय स्युः । मध्याह्ने पानान्नोष्णगभस्तिभिर्वर्धितोत्पीडितद्रुताश्चेति ।

प्रातः सायं च तच्छान्त्यै व्यभ्रेऽर्केऽञ्जयेत्सदा ॥ १६ ॥

प्रातरित्यादि । "यतः पूर्वोक्तेषु कालेषु पूर्वोक्ता दोषास्तस्मात् पूर्वाह्णेऽपराह्णे च तच्छान्त्यै तस्याक्षिरोगोपशमनाय व्यभ्रे विगताभ्रे विगतमेघे रवौ सदैव नेत्रेऽञ्जयेत्" इत्यरुणदत्तोक्तिः । हाटकोऽप्याह — 'अतोऽस्मात् कारणात् तच्छान्त्यै व्यभ्रे रवौ पूर्वाह्णापराह्णयोः सदैवाञ्जयेत्' इति । अञ्जयेत् सदेति उचिताञ्जनविषयमेतद् वचनमिति वेद्यम् । तथाच वैद्यां संहितायां स्कन्दरक्षितायां पठ्यते —

"अनञ्जनेनाभ्युषितान् मनुष्यान्
प्रबाधते दत्तमिवाञ्जनं तान् ।
यथाञ्जनेनाभ्युचितानने का-
नञ्जनाद् व्याधिरुपैति कृच्छ्रः ॥

तस्मादिदं नित्याञ्जनमेव पथ्य-
मनञ्जनं चानुचितस्य पथ्यम् ।
अनञ्जनात्त्वञ्जनमेव मृद्य-
मस्मादिदं नित्याञ्जनमेव कुर्यात् ॥

अनञ्जनो यस्तु पुनर्मनुष्यः
कथं सुखी स्यात् पुनरञ्जनेन ।"

इति । एतच्च स्वस्थवृत्त एवोच्यते । आतुरवृत्ते तु व्याध्युपशमावधित्वाद-ञ्जनस्य ॥ १६ ॥

मतान्तरमाह —

वदन्त्यन्ये तु न दिवा प्रयोज्यं तीक्ष्णमञ्जनम् ।
विरेकदुर्बलं चक्षुरादित्यं प्राप्य सीदति ॥ १७ ।

वदन्तीत्यादि । अन्ये त्वाचार्या एवं मन्यन्ते । तीक्ष्णमञ्जनं दिवा न प्रयोज्यमिति । कस्मादित्याह— यस्माद् विरेकदुर्बलं तीक्ष्णाञ्जनेन विरेचितत्वाद् दुर्बलं चक्षुरादित्यं प्राप्य सीदति तस्माद् दिवसे तीक्ष्णमञ्जनं न प्रयोज्यम् । विरेकदुर्बलमिति तीक्ष्णाञ्जनेन चक्षुषि दोषास्रावो विरेचनमुच्यते तदादित्यकिरणसम्बन्धाद् दृष्टिः सीदति ॥ १७ ॥

तत्पश्चादञ्जनकालं रात्रिरित्याह —

स्वप्नेन रात्रौ कालस्य सौम्यत्वेन च तर्पिता ।
शीतसात्म्या दृगाग्नेयी स्थिरतां लभते पुनः ॥ १८ ॥

यस्मात् स्वप्नेन तर्पिता तथा कालस्य रात्र्याख्यस्य सौम्यत्वेन च तर्पिता दृष्टिस्तीक्ष्णाञ्जनक्षोभितापि पुनः स्थैर्यं प्राप्नोति । क्षीणदृष्टिः, आग्नेयी अग्न्युत्कटभूतसम्भवा तथा स्वभावतः शीतसात्म्या । तस्माद् रात्रावञ्जनं प्रयोज्यम् । आग्नेयीति 'अग्निकलिभ्या ढगू वक्तव्य.' इति ढक् । शीतं सात्म्यं यस्याः पैत्तिकज्वरस्येव । हृदयाकारोऽप्याह —"स्वप्नेन तर्पिता तृप्ता रात्रिकालस्य सौम्यत्वेन शीतत्वेन तृप्ता शीतसात्म्या शीतप्रिया आग्नेयी अग्न्युद्रिक्तमहाभूतोत्पन्ना अतिस्थिरतां लभते । पुनरिति हेत्वर्थः । यैनैवंविधा दृष्टिः तस्माद् रात्रौ तीक्ष्णाञ्जनं प्रयोज्यम्" इति ॥ १८ ॥

तदेतदन्यमतव्यापकमिति दूषयन्नाह—

अत्युद्रिक्ते बलासे तु लेखनीयेऽथवा गदे ।
काममह्न्यपि नात्युष्णे तीक्ष्णमक्ष्णि प्रयोजयेत् ॥ १९ ॥

अत्युद्रिक्त इत्यादि । अत्युत्कटे बलासे श्लेष्मणि अथवा लेखनार्हे गदे शुक्लार्मादौ नात्युष्णे प्रीष्मवर्ज्ये काले तीक्ष्णमञ्जनमह्न्यपि योजयेत् कामनुमतमेतत् । उष्णे तु प्रीष्मे अह्न अत्युष्णत्वादञ्जनस्य तैक्ष्ण्यातियोगेन दृष्टिविघातः स्यात् ॥ १९ ॥

"अत्र मतभेदे सारभूतं स्वपक्षं दर्शयति । अत्युद्रिक्ते बलासे तु अति-मृद्धे श्लेष्मणि अथवा श्लेष्मणि विलेख्य नाश्ये शुक्लार्मादौ काममनुमतं अद्धि नात्युष्णतीक्ष्णमञ्जनं प्रयोजयेत् । एतदत्र ग्राह्यम् । अत्युष्णतीक्ष्णमद्धि अञ्जनं न योज्यमिति । तदेव वक्ष्यति अश्मन इत्यादि" इति । अरुणदत्त-स्त्वाह — "द्रिनेऽप्यत्युष्णे तीक्ष्णमञ्जनं न प्रयोजयेत्; काममनुमनमेव । अद्धि नात्युष्णे अञ्जनं प्रयोजयेत्" इत्यर्थः ॥ १९ ॥

अत एवाह —

अश्मनो जन्म लोहस्य तत एव च तीक्ष्णता ।
उपघातोऽपि तेनैव तथा नेत्रस्य तेजसः ॥ २० ॥

अश्मन इत्यादि । यथा पाषाणाच्छस्त्रस्योत्पत्तिः तस्माच्छस्त्रस्यैक्ष्ण्यं श्लक्ष्णता । उपघातोऽपि कुण्ठत्वादिकः तेनैव पाषाणेन न केवलं तीक्ष्णता । तथा तेनैवाश्मशस्त्रन्यायेन नेत्रस्य तेजसः । तेजसोऽग्न्यश्मस्थानीयात् सकाशात् नेत्रस्य जन्म रविसंज्ञात् तेजसः सकाशात् तीक्ष्णता दर्शनपटुत्वम् । आलोक-सहायं हि चक्षुर्विषयं गृह्णाति । अतिभास्वरेणात्युष्णेन तेन नस्योपघातः । तस्माद् यदन्ये वदन्ति सामान्येन दिवाञ्जनं न प्रयोज्यमिति तदसदेवेति । हृद्याकारोऽप्याह —

'पाषाणादग्निमन्तस्तादयसो जन्म दृश्यते ।
तत एव च लोहस्य शस्त्रादेस्तीक्ष्णतोदयः ॥

विनाशः शस्त्रधारायाः प्रायः पाषाणघातसः ।
तथा नेत्रस्य जन्मापि तैक्ष्ण्यं दर्शनशक्तिनः ॥

नाशो दृष्टेरप्रमेयविघ्यादेः । तस्मान्न तीक्ष्णोष्णमद्धि मोचयेत् ।"
इति ॥ २० ॥

न रात्रावपि शस्तेऽक्षि नेत्रे तीक्ष्णाञ्जनं हितम् ।
दोषमद्यानयन्स्तम्भकण्डूजाड्यादिकारि च ॥ २१ ॥

अपि च रात्रावपि नेत्रे कफाधिक्येनातिस्निग्धे कण्डूपिच्छिलत्वाद्यनुमिते तीक्ष्णमञ्जनं न हितं न प्रयोज्यम् । 'अस्निग्धे क्षणे' इत्यन्यत्र पाठः । तत्र

प्रतिबोधनकषायवर्मताशिरोरुग्दृष्टिदौर्बल्यानि । तत्र शीतमाश्च्योतनम् । प्रत्यञ्जनं वा सम्यग् विरेकाद् यथास्वमामयोपशमः । सुखोन्मीलननिर्मिल्न-वाताद्यसहत्वानि चेति । हृद्याकारस्त्वाह— "अञ्जनं तीक्ष्णं योजयेद् । न धूमेन तीक्ष्णशब्दान्वयः । मृदुधूमस्यात्र विधानमिति" इति । तीक्ष्णाञ्जनाभि-सन्तप्ते लोचने तूर्णं प्रत्यञ्जनं पूर्वोक्तं हितम् । प्रत्यञ्जनमिति शीतस्य चूर्णाञ्जन-

स्याख्या ॥ २९ ॥

इति श्रीदासपण्डितकृतायां हृदयबोधिकायां त्रयोविंशोऽध्यायः ॥

अथ चतुर्विंशोऽध्यायः ।

—०—

अथातस्तर्पणपुटपाकविधिमध्यायं व्याख्यास्यामः ।

आश्च्योतनाञ्जनाभ्यां हि नयनस्य प्रायो दौर्बल्यं स्यादिति तर्पणादेरुपयोगो युक्त इत्याह—

तर्पणं च पुटपाकश्च तयोर्विधिः । हृद्याकारोऽप्याह —

"तीक्ष्णाञ्जनप्रयोगेण दौर्बल्ये सति चक्षुषो ।
बलाधानार्थमेतर्हि तर्पणादेरुपक्रमः ॥"

इति ॥

अथवा प्रत्यञ्जनं हितमित्युक्तत्वात् प्रत्यञ्जनसंसितं तर्पणमाह—

नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते ।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥ १ ॥
कृच्छ्रोन्मीलशिरोरुग्शिरोत्पाततमोऽर्जुनैः ।
स्यन्दमन्थान्यतो वातवातपर्यायशुक्लकैः ॥ २ ॥
आतुरे शान्तरागाश्रुशूलसंरम्भदूषिके ।
निवाते तर्पणं योज्यं शुद्धयोर्मूर्धकाययोः ॥ ३ ॥
काले साधारणे प्रातः सायं चोत्तानशायिनः ।
यवमाषमयीं पालीं नेत्रकोशाद्बहिः समाम् ॥ ४ ॥

अक्षुलोच्यां दृढां कृत्वा यथास्वं सिद्धमावपेत् ।
चक्षुर्निमीलिते नेत्रे तस्मात्तुप्रविकायितम् ॥ ५ ॥
नक्तान्ध्यवातातिमिरकृच्छ्रोधादिके वसाम् ।
आपक्ष्माग्रादधोन्मेषं शनैस्तस्य क्षुरयतः ॥ ६ ॥
मात्रा विगणयेत्तत्र चर्मसन्धि सितासिते ।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पञ्च च ॥ ७ ॥
शतानि सप्त चाष्टौ च दश मन्थे दशानिले ।
पित्ते पट् स्वस्थवृत्तौ च बलासे पञ्च धारयेत् ॥ ८ ॥

नयन इत्यादि । चक्षुषि ताम्यति ग्लायति सति तथा स्नेहादिगुणे तर्पणं कार्यम् । ताम्यत्त्वं ग्लानिः । क्षीणे पक्ष्मणि यस्य तदेवम् । आविलमस्पष्टमीक्षणं दर्शनं यस्य तदेवम् । क्षीणपक्ष्म च तदाविलेक्षणं च तस्मिन् । कृच्छ्रोन्मीलावयोऽक्षिरोगेषु वक्ष्यन्ते । कृच्छ्रोन्मीलादीनां वृन्दः । तैरातुरे । तमः तिमिरम् । तथा शान्ताः शमं गताः रागादयो यस्मिन्नयने तस्मिन् । तथा नस्या(न)र्हे यतो वक्ष्यति—

'तर्पणं पुटपाकं च नस्यानर्हे न योजयेत् ।'

इति । हाटकोऽप्याह— 'नयने ताम्यत्वादिगुणयुक्ते कृच्छ्रोन्मीलनाद्यातुरे चापगतरागादि च तत्र तर्पणं योज्यम्' इति । इद्याकारोऽप्याह — 'नयने ग्लान्यादि दशरोगार्ते कृच्छ्रोन्मीलादिभिर्दोषभिरातुरे च तर्पणं योज्यम्' इति । क्षीणक्षि स्थाने निवाते विगतानिले । उपलक्षणं चैतत् । विगतानलरजोधूमादिके इत्यपि द्रष्टव्यम् । मृदुकाययोः शुद्धयोः वमनविरेकाभ्यां नस्येन च । यथायोगं वमनविरेचनस्नेहशुद्धिरित्यर्थः । "शुद्धयोर्वमनादिभिर्नस्यादिभिश्चे"ति इद्याकारः । काले साधारणे वसन्तादिके सायं प्रातर्वा दोषदृष्ट्याद्यपेक्षया उत्तानशायिनः सुखे शयने शयितस्योत्तानस्येत्यर्थः । यवैर्मिश्रा मापाश्च महता यस्याः सा यवमाषमयी । हाटकस्तु—'यवमिश्रमाषमयीं यवमयीं माषमयीं वा' इत्याह । तां तादृशीं पालीं शिरःस्नेहाद् बहिर्दीयते उभयपार्श्वयोः समां अनिम्नोन्नतां बाहुलोच्यां बहुलमुच्चायवतीं तथा दृढां यथा स्नेहो न स्रवेदित्यर्थः । तां पालीं कृत्वा यथास्वं यथायोगं दोषदृष्ट्यादनुरोधात् पक्वं घृतं निमीलिते अनुन्मीलिते नेत्रे क्षिपेत् । 'यथार्हंपक्वघृतं' इति हाटकः ।

प्रतिबोधनकषायवर्त्मतारशिरोरुग्दृष्टिदौर्बल्यानि । तत्र शीतमाश्च्योतनम् । प्रत्यञ्जनं वा सम्यग् विरेकाद् यथास्वमामयोपशमः । सुखोन्मीलननिमीलन-वातातपसहत्वानि चेति । हृद्याकारस्त्वाह— "अञ्जन तीक्ष्णं योजयेद् । न धूमेन तीक्ष्णशब्दान्वयः । मृदुधूमस्यात्र विधानमिति" इति । तीक्ष्णाञ्जनाभि-सन्तप्ते लोचने तूर्णं प्रत्यञ्जन पूर्वोक्त हितम् । प्रत्यञ्जनमिति शीतस्य चूर्णाञ्जन-स्याख्या ॥ २९ ॥

इति श्रीदासपण्डितकृतायां हृदयबोधिकायां
त्रयोविंशोऽध्याय ॥

अथ चतुर्विंशोऽध्यायः ।

—०—

अथातस्तर्पणपुटपाकविधिमध्यायं व्याख्यास्यामः ।

आश्च्योतनाभ्यां हि नयनस्य प्रायो दौर्बल्य स्यादिति तर्पणादेरुपयोगो युक्त इत्याह—

तर्पण च पुटपाकश्च तयोर्विधि. । हृद्याकारोऽप्याह —

"तीक्ष्णाञ्जनप्रयोगेण दौर्बल्ये सति चक्षुषो ।
बलाधानार्थमतहिं तर्पणादेरुपक्रम ॥"

इति ॥

अथवा प्रत्यञ्जन हितमिति युक्तत्वाद् प्रत्यञ्जनसहित तर्पणमाह—

नयने ताम्यति स्तब्धे शुष्के रूक्षेऽभिघातिते ।
वातपित्तातुरे जिह्मे शीर्णपक्ष्माविलेक्षणे ॥ १ ॥
कृच्छ्रोन्मीलनिरोहर्षशिरोत्पाततमोऽर्जुनैः ।
स्यन्दमन्थान्यतो जातवातपर्यायशुक्लकैः ॥ २ ॥
आतुरे शान्तरागाश्रुशूलस्तंभरुजापिके ।
निवाते तर्पणं योज्यं शुद्धयोर्मूर्धकापयोः ॥ ३ ॥
काले साधारणे प्रातः सायं चोत्तानशायिनः ।
अयमाषमयी पालीं नेत्रकोशाद्बहिः समाम् ॥ ४ ॥

अक्षुलोच्यां दृढां कृत्वा यथास्वं सिद्धमापयेत् ।
चक्षुर्निमीलिते नेत्रे तस्माच्चुल्लविकायितम् ॥ ५ ॥
नक्तान्ध्यवाततिमिरकृच्छ्रोन्मीलादिके वसाम् ।
आपक्ष्माग्रादथोन्मेषं शनैस्तस्य कुर्वतः ॥ ६ ॥
मात्रा विगणयेत्तत्र वर्त्मसन्धि सितासिते ।
दृष्टौ च क्रमशो व्याधौ शतं त्रीणि च पञ्च च ॥ ७ ॥
शतानि सप्त चाष्टौ च दश मन्थे दशानिले ।
पित्ते पट् स्वस्थवृत्तौ च बलासे पञ्च धारयेत् ॥ ८ ॥

नयन इत्यादि । चक्षुषि ताम्यति ग्लायति सति तथा स्नग्धादिगुणैः तर्पणं कार्यम् । ताम्यत्त्वं ग्लानिः । त्रीणि पक्ष्माणि यस्य तदेवम् । आविलमस्पष्टमीक्षणं दर्शनं यस्य तदेवम् । त्रीणिपक्ष्म च तदाविलेक्षणं च तस्मिन् । कृच्छ्रोन्मीलादयोऽक्षिरोगेषु वक्ष्यन्ते । कृच्छ्रोन्मीलादीनां द्वन्द्वः । तैमिरे । तमः तिमिरम् । तथा शान्ताः शमं गताः रागादयो यस्मिन्नयने तस्मिन् । तथा नस्या(न)र्हे यतो वक्ष्यति—

'तर्पणं पुटपाकं च नस्यानर्हे न योजयेत् ।'

इति । हाटकोऽप्याह— 'नयनं ताम्यत्वादिगुणयुक्तं कृच्छ्रोन्मीलनाद्यातुरं चापगतरागादि च तत्र तर्पणं योज्यम्' इति । हृद्याकारोऽप्याह — 'नयने ग्लान्यादि वक्ष्यरोगार्ते कृच्छ्रोन्मीलादिभिर्दोषभिरातुरे च तर्पणं योज्यम्' इति । क्रीडिनि स्थाने निवाते विगतानिले । उपलक्षणं चेदम् । विगतातपरजोधूमादिके इत्यपि द्रष्टव्यम् । मूर्धकाययोः शुद्धयोः वमनविरेकाभ्यां नस्येन च । यथायोगं वमनविरेकनस्यकृतशुद्धिरित्यर्थः । "शुद्धयोर्वमनादिभिर्नस्यादिभिश्चे"ति हृद्याकारः । काले साधारणे वसन्तादिके सायं प्रातर्वा दोषदृष्ट्याद्यपेक्षया उत्तानशायिनः सुखे शयने शयितस्योत्तानस्येत्यर्थः । यवैर्मिश्रा मापास्तैः प्रकृता यस्याः सा यवमाषमयी । हाटकस्तु—'यवमिश्रमाषमयीं यवमयीं माषमयीं वा' इत्याह । तां तादृशीं पालीं भित्तिं नेत्रकोशाद् बहिर्दीयते उभयपार्श्वयोः समां अनिम्नोन्नतां अक्षुलोच्यां अक्षुल्लमुच्छ्रायवतीं तथा दृढां यथा स्नेहो न स्रवेदित्यर्थः । तां पालीं कृत्वा यथास्वं यथायोगं दोषदृष्ट्याद्यनुरोधात् पक्वं घृतं निमीलिते अनुन्मीलिते लोचने क्षिपेत् । 'यथार्हंपिधनिपक्वं घृतम्' इति हाटकः ।

त्रिविधपुटपाकानामिदानीं कल्पनामाह—भूशयेत्यादि । हृत्प्रकारस्तु इदानीं साधनप्रयोगक्रमावुच्येते इत्याह—

भूशयप्रसहानूपमेदोमज्जावसामिषैः ॥ १४ ॥
स्नेहनं पयसा पिष्टैर्जीवनीयैश्च कल्पयेत् ।
मृगपक्षियकृन्मांसमुक्तायस्ताम्रसैन्धवैः ॥ १५ ॥
श्लोतोजशङ्खफेनालैर्लेखनं भस्तुकल्किकैः ।
मृगपक्षियकृन्मांसवसान्तर्हृदयामिषैः ॥ १६ ॥
मधुरैः सघृतैः स्तन्यक्षीरपिष्टैः प्रसादनम् ।

भूशया बिलेशया अनेकगोधाद्याः । प्रसहा गोखरादयः । आनूपा महामृगाः, अप्चराः, मत्स्याः तेषां मेदोमज्जावसामिषैः तथा जीवनीयैः जीवन्तीकाकोल्यादिभिश्च क्षीरपिष्टैः स्नेहनं पुटपाकं कल्पयेत् योजयेत् । मृगा हरिणाक्ष्यः, पक्षिणो लावादयः, तेषां यकृन्मांसानि तैस्तथा शुक्तादिभिर्भस्तुकल्किकैः पिष्टैः लेखनं कल्पयेत् । प्रसहानां मृगपक्षिणां स्नेहेन पुटपाक उपयुक्तत्वाद् जाङ्गला एव मृगपक्षिणो ग्राह्याः । प्रसादनं च जाङ्गलमृगपक्षिणां यकृदादिभिस्तथा मधुरैर्मधुरवर्गोक्तद्रव्यैर्घृतान्वितैः स्त्रीक्षीरान्वितैः स्त्रीक्षीरपिष्टैः प्रसादनं कल्पयेत् । "स्त्रीस्तन्यादिपिष्टैः" इति हारीतः । "स्त्रीस्तन्यक्षीराज्यपिष्टैः" इति सङ्ग्रहे ॥ १४—१६ ॥

अधुना पुटपाकस्य कल्पनामाह —

बिल्वमात्रं पृथक्पिण्डं मांसभेषजकल्कयोः ॥ १७ ॥
स्नेहादिषु क्रमात् ।
वेष्टयित्वा मृदा लिप्तं धवधन्वनगोमयैः ॥ १८ ॥
पचेत् प्रदीप्तैरग्न्याभं पक्वं निष्पीड्य लक्षयेत् ।
नेत्रे तर्पणवद्युञ्ज्यात्, शतं द्वे त्रीणि धारयेत् ॥ १९ ॥

मांसं च भेषजकल्कश्च तयोः पृथक् बिल्वमात्रं पलमात्रं पिण्डमेरण्डादीनां पत्रैः स्निग्धादिषु क्रमात् वेष्टयित्वा कृष्णमृत्तिकया लिप्तं शुष्कवैधस्यकरणात् व्यक्तोत्सेधं मृदा लेपः । धवादीन्धनैः मयीतैः पचेत् । स्निग्धादिषु क्रमादित्यत्रापि योज्यम् । तत्र स्नेहने पुटपाके एरण्डप-

त्रैर्वेष्टनं, धवकाष्ठैः प्रदीपनम् । लेखने वटपत्रैर्वेष्टनं, धन्यनेन्धनैः प्रदीपनम् । प्रसादने जलजपत्रैर्वेष्टनं, गोमयेन्धनैः प्रदीपनमिति क्रमार्थः । अग्न्याभमिति अग्निवर्णं सत् पक्वं ज्ञात्वापनीय पटं वाससा निष्पीड्य तद्रसं नयने तर्पणमिव दद्यात् । उरुबूकः एरण्डः । धन्वनं(ऊषरं) ॥ १९ ॥

लेखनस्नेहनान्तेषु पूर्वौ कोष्णौ हिमोऽपरः ।
धूमपोऽन्ते तयोरेव योगास्तत्र च तृप्तिवत् ॥ २० ॥
तर्पणं पुटपाकं च नस्यानर्हे न योजयेत् ।
यावद्दिनानि युञ्जीत द्विस्ततो हितभाग्भवेत् ।
मालतीमल्लिकापुन्नागबद्धाक्षो निवसेन्निशि ॥ २१ ॥

शतमित्यादि । लेखनादिषु शतादीनि धारयेत् । तत्र लेखने शतं मात्राणां धारयेत् । स्नेहने द्वे शते । अन्ते प्रसादने त्रीणि शतानि धारयेत् । अन्त्ये इति वा पाठः । पूर्वौ स्नेहनलेखनौ कोष्णौ ईषदुष्णौ योज्यौ । हिमोऽपरः प्रसादनाख्यः । तयोरेकाद्ययोः पुटपाकयोः स्नेहनलेखनयोरन्ते धूमपः स्यात् स्नेहेरितकफोपशान्त्यै । न तु प्रसादनान्ते इत्येवशब्दार्थः । अत एव प्रसादने धूमपानं न योज्यम् । तत्र च तेषु पुटपाकेषु तर्पण इव योगाः स्युः । तृप्तिवदिति 'सप्तम्यन्ताद् वतिः' । योगा इति बहुवचननिर्देशात् सम्यग्योगायोगातियोगा गृह्यन्ते । योगातियोगायोगास्तर्पणवदवगन्तव्या इत्यर्थः । पुटपाकस्त्वेकाहं त्र्यहं वा योज्यः । तर्पणपुटपाकौ नस्यायोग्ये न योजयेत् । नस्यानर्हाः, 'योजयेच्च तु नावनम्' इत्युक्ताः । हृद्याकारोऽपि—'अञ्जनायोग्याः नस्यायोग्या उक्ताः प्रागेव' इत्याह । यावद्दिनानि यावन्मात्राणि दिनानि[1] तौ तर्पणपुटपाकौ युञ्जीत कुर्वीत तावन्त्यहानि ततो द्विः द्विगुणानि दिनानि हितभाक् हिताहारविहारसेवी स्यात् । यावद्दिनं तर्पणपुटपाकयोरासेवा तद्द्विगुणं वर्ज्यं वर्जनम् । तथा पक्वातीसारस्य पुटपाकस्यायमेव पाकविधिः । कृततर्पणपुटपाको मालत्यादिभिः पुष्पैर्बद्धाक्षो विभावरीं वसेत् । मालती सुमनाः । मल्लिका गन्धवार्षिका । हृद्याकारोऽपि — 'दृष्टिप्रसादनाय मालत्यादिमालापिनद्धनेत्रः स्वप्यात्' इत्याह । आदृष्टोतनादिषु प्रयोगवैकल्याद्ये व्याधयस्तेषु यथास्वं चिकित्सां कुर्यात् । वचनं हि —

---

१. 'यावन्त्यहानि' मुद्रिताष्टाङ्गहृदयपाठः.

'सेकेऽञ्जने तर्पणे च पुटपाके च ये गदा' ।
जायेरन् विधिविभ्रंशाद् यथास्वं तान् प्रसाधयेत् ॥" इति ।

सर्वात्मना नेत्रबलाय यत्नं कुर्वीत नस्याञ्जनतर्पणाद्यैः ।
दृष्टिश्च नष्टा विविधं जगच्च तमोमयं जायत एकरूपम् ॥ २२ ॥

सर्वेत्यादि । आत्मशब्द. प्रकारवचन । **सर्वात्मना** सर्वेण प्रकारेण **नेत्रबलाय** चक्षुःसामर्थ्याधानाय चक्षूरक्षणायेत्यर्थ. नस्यादिभिर्यत्न कुर्यात् । आदिशब्देन शुध्यादयो गृह्यन्ते । 'सर्वात्मना सर्वप्रयत्नेन' इति **पञ्जिकायाम्** । नेत्रबलंप्रति यत्नाकरणे दोषमाह — **दृष्टिश्चेति** । अत्र चशब्दो हेतौ । 'यतो दृष्टिर्यदि **नष्टा** स्यान् ततो जगद् विविधमपि **तमोमयमन्धकारमयमेकरूपम-** विलक्षण सम्पद्यते" इति **सर्वाङ्गसुन्दरा** । हृद्याकारस्त्वेवमाह — "नेत्रे विनष्टे विविधमिति नानाप्रकार जगत् प्रपञ्चजातमेकरूपमेकमिव भवति । तच्चैकरूपं किमात्मकं तमोमयं तमोविकारम् । 'प्रकृतिविकारभावे मयट्' । यथा निमीलिताक्षस्य तम प्रतिभास. तथा चक्षुषि नष्टे सर्व तमोरूपमिव भवति" इति । "न द्रव्यव्यतिरिक्तं भावरूपं तम" इति **वैदान्तिकाः** । "भावाभावस्तम" इति **तार्किकाः** । **पाठ्यकारस्त्वेवमाह**— "दृष्टिश्च नष्टेति । नष्टा दृष्टिर्विविध जगद् दृश्य चान्धकाररूपमेव जायत इत्यर्थः । एषा दृष्टिः एतद् दृश्यमिति विशेषप्रतीतिर्न स्यादित्यर्थः" इति । अन्ये चशब्दस्य चेदित्यन्वयं ब्रुवते ॥ २२ ॥

इति श्रीदामपण्डितसूनोया हृदयरोगाधिकाराया
चतुर्विंशोऽध्याय ॥

अथ पञ्चविंशोऽध्यायः ।

वस्तिनस्याचनार्शांसि यन्त्राण्यग्र्याण्येवेति यन्त्रविधिमाह । अथवा—

"यन्त्रणादिसपिण्डमूर्ध्वाङ्गं प्रागुदीरितम् ।
यत् तद्यन्त्राणि निर्णेतुं यन्त्राणां विधिरुच्यते ॥"

'अतिक्रान्तेषु वस्त्यादिषु यन्त्राणि प्रकृतानि तस्मात् सर्वयन्त्राणि क्रियोपयोगीनि एकत्रैव वक्ष्यन्ते इति पाठ्यकार । इन्दुरप्याह— 'अत्र हि निदानसंभेदेन द्विविधस्य रोगस्य चिकित्सा प्रकृता । उभययत्रापि च यन्त्रशस्त्रोपयोगात् तन्निर्णयारँभ । तत्रापि यन्त्रेण दृष्ट्वा गृहीत्वा वा पश्चाच्छस्त्रेण युज्यते इति प्रथम यन्त्राणि निर्णीयन्ते' इति ।

अथातो यन्त्रविधिमध्यायं व्याख्यास्यामः ।

यन्त्रस्य विधिर्यन्त्रविधि शस्त्रोपायत्वाच्च यन्त्राणामिदमुच्यते । अर्शोभगन्दरादिषु शस्त्रादिनियोजने नीरुजाङ्गरक्षणाय नियम्यते शस्त्रक्षारादिकमिति यन्त्रम् ।

अथवा शल हिंसाया धातु तस्मिन् शल्यम् । मन शरीरावयवकरमित्यर्थ' । 'यती प्रयत्ने' तस्मिन् यन्त्रमिति प्रयत्नसाधनः प्रवृत्त्युपायो यन्त्रमित्यर्थ ।

एतदेव स्पष्टमाह—

नानाविधानां शल्यानां नानादेशप्रबाधिनाम् ।
आहर्तुमभ्युपायो यस्तद्यन्त्रं यच्च दर्शने ॥ १ ॥
अर्शोभगंदरादीनां शस्त्रक्षाराग्नियोजने ।
शेषाङ्गपरिरक्षायां तथा वस्त्यादिकर्मणि ॥ २ ॥
धटिकालाबुशृङ्गं च जाम्बवोष्ठादिकानि च ।

तदाह नानाविधानामित्यादि । नानाविधानामनेकप्रकाराणां शस्त्रवेणुपाषाणादिरूपाणा तथा कर्णिनालीनाराचादीना च नानादेशप्रबाधिनां कर्णमूलन्तवेष्टकजत्रुशङ्खादिविविधशरीरप्रदेशप्रबोधिना शल्यानामाहरणे आकृष्टौ योऽभ्युपाय उपाय एव तद्यन्त्रमुच्यत इति शेषः । यच्च दर्शने उपन्यः अर्शोभगन्दरनाडीव्रणादीना तच्च यन्त्रम् । तथा एतेषामेवार्शोभगन्दरादीनां शस्त्रादियोजने

सति शेषस्य नीरुजाङ्गस्य परिरक्षाया रक्षानिमित्त स्वस्थस्याङ्गस्य शस्त्राद्याबाधा-निवृत्यर्थं य उपायस्तच्च यन्त्रमिति सबन्ध । तथा वस्तिनस्यादिकर्मणि य उपाय-स्तच्च यन्त्रम् । तथा घटिकादि च यन्त्रत्रय पवनाकर्षणाय च रक्तस्याकर्ष-णाय च । तथा जाम्बवोष्ठमन्दशादीनि यन्त्राणि । जाम्बवोष्ठ = (കാരാമണി) ॥ २ ॥

यन्त्राणा किं रूप किं कार्यमित्याह—

अनेकरूपकार्याणि यन्त्राणि विविधान्यतः[1] ॥ ३ ॥
विकल्प्य कल्पयेद् बुद्ध्या, यथास्थूलं तु वक्ष्यते ।

अनेकेत्यादि । रूपाणि च कार्याणि च रूपकार्याणि अनेकानि रूपकार्याणि येषा तानि यन्त्राणि । विविधानि नानाप्रकाराणि । तत्रानेक-रूपत्वं कङ्कमुखस्वस्तिकाद्याकारत्वम् । अनेककार्यत्वमस्थिलमशल्याहरणादि-कम् । यतश्चानेकरूपकार्यत्वात् स्वस्थातुरोपकरणाना यन्त्राणा नानाविधत्व अतस्तानि बुध्या विकल्प्य कार्यानुरोधात् कल्पयेत् । कर्मवशात् तेषामियत्तावधारणा-शक्यत्वात् । तथा हि यन्त्राणा नानाकारत्वान्नानाकर्मत्वान्नानाप्रमाणत्वात् सङ्ख्यालक्षणादीनामियत्तावधारण कर्तुं न पार्यते । नानाविधा हि बाह्याध्या-त्मिकाना भावाना सन्निवेशविशेषा । न ह्येकोऽन्येन कथञ्चिदपि सादृश्य यातीत्यतो बहुत्वम् । ननु यन्त्राणा दिङ्मात्रेऽप्यनभिज्ञ कथ कल्पना कर्तुं पार-येदित्याह । यथास्थूल तु वक्ष्यते य नि यानि स्थूलानि यथास्थूलम् । "यथा सादृश्ये" इत्यव्ययीभाव यथास्थूलोक्त्या शेषाण्यपि स्वबुध्या विकल्प्य कर्तुं समर्थो भवतीति भाव । 'आकारानन्त्यात् प्रयोजनानेकत्वाच्च सङ्ख्याती-तानि यन्त्राणि' इत्येके । 'एकोत्तर यन्त्रशतम्' इत्यन्ये । अत्र पुन षड्विधानि यन्त्राणि निर्दिश्यन्ते समासत । कथम्, स्वस्तिकसन्दशतालनालीशला-कान्यनि अनुयन्त्राणि चेति । सर्वाणि यन्त्राणि इद षट्क नातिवर्तन्ते ।

अथ यन्त्राण्याह—

तुल्यानि कङ्कसिंहर्क्षकाकादिमृगपक्षिणाम् ॥ ४ ॥
मुखैर्मुखानि यन्त्राणा कुर्याच्चत्संज्ञकानि च ।

---

१ कार्यवशात् इति पाठान्तरम्

अष्टादशाङ्गुलायामान्यायसानि च भूरिशः ॥ ५ ॥
मसूराकारपर्यन्तैः कण्ठे बद्धानि कीलकैः ।
विद्यात् स्वस्तिकयन्त्राणि मूलेऽङ्कुशनतानि च ॥ ६ ॥
तैर्बद्धैरस्थिसंलग्नशल्याहरणमिष्यते ।

तुल्यानीत्यादि । येन पार्श्वेन शल्यमुद्दिश्यते तद् यन्त्राणां मुखं वेद्यम् । कङ्कादीनां पक्षिमृगाणां मुखैस्तुल्यानि यन्त्राणां मुखानि कुर्यात् । आदिशब्देन गृध्रहरिणहंसादिपरिग्रहः । तानि तत्संज्ञकान्येव । चशब्द एवार्थे । तानि यन्त्राणि तथानामान्येव कङ्कमुखं सिंहमुखमित्यादि । आकारानुगतामिधानानीत्यर्थः । अष्टादशाङ्गुलायामानि अष्टादशाङ्गुलदैर्घ्याणि स्वस्तिकाख्यानि यन्त्राणि विद्यात् । स्वस्तिकमिव स्वस्तिकम् । दक्षिणस्य बाहोर्वामे गमनं वामस्य दक्षिण इति स्वस्तिकता । भूरिशो बाहुल्येनायसानि च । दन्तकंसादिमयानामपि क्वचिद्दर्शनात् भूरिश इत्युक्तम् । तथा कण्ठे यन्त्रमन्थौ कीलकैर्बद्धानि, कीदृशैः कीलकैः मसूराकाराः पर्यन्ताः प्रान्ताः येषां तैः । यत्र प्रदेशे यन्त्राणां हस्तग्रहणं तन्मूलम् । तत्राङ्कुशवन्नतानि वक्राणि परिणतानि । हृद्याकारोऽपि— 'मूले हस्तग्राह्ये देशे' इत्याह । 'मूलं हस्तग्रहणस्थानम्' इति हाटकः । पाठ्यकारस्त्वाह— 'मूलमिति वृन्तभागम् । अङ्कुशनतत्वमाकर्षणे सुखग्रहणार्थम् । स्वस्तिकमित्यनेन तन्त्रामान्येव' इति । तैः स्वस्तिकयन्त्रैः कङ्कमुखादिभिरस्थिसंलग्नस्य शल्यस्य काण्डफलादेराहरणमाकर्षणमिष्यते ॥ ४–६ ॥

कीलबद्धविमुक्ताग्रौ सन्दंशौ षोडशाङ्गुलौ ॥ ७ ॥
त्वक्स्निच्छिरास्नायुपिशितलग्नशल्यापकर्षणौ ।
षडङ्गुलोऽन्यो हरणे सूक्ष्मशल्योपपक्ष्मणाम् ॥ ८ ॥
मुचुण्डी[1] सूक्ष्मदन्तार्जुर्मूले रुचकभूषणा ।
गम्भीरव्रणमांसानामर्मणश्चोपरिस्थ च ॥ ९ ॥

कीलेत्यादि । कीलेन मसूराकारपर्यन्तेन बद्धं तथा विमुक्तमग्रं मुखं ययोस्तौ कीलबद्धविमुक्ताग्रौ सन्दंशौ द्वौ भवतः । कीदृशौ, षोडशाङ्गुलप्रमाणौ । कोपयोगः स्यादेतयोरित्याह — त्वगादिलग्नस्य शल्यस्याकर्षणे आहरणे प्रयुज्यते । एकः कीलबद्धः अन्यः कीलरहितः । अस्पृष्टबाहुरङ्गुलीभ्यामिव

१. 'मुचुटी' इति सङ्ग्रहपाठः ।

पुरुषः प्रयत्नेन शल्यं गृह्णीत इत्यर्थः । पाडितयादि । षडङ्गुलोऽन्यः षोडशाङ्गुलसन्दंशद्वयादन्यः सन्दंशः । सूक्ष्मशल्यानां नासारोमार्दीनां तथोपपक्ष्मणां वर्त्मादिभग्नानां हरणे आकर्षणे प्रयुज्यते । षडङ्गुलान्या इति पाठान्तरम् । अन्या सन्दंशजातिरेवेति। उपपक्ष्माणि वर्त्मरोगे वक्ष्यन्ते। संग्रहेऽप्युक्तम्—'तथान्यः सन्दंशः षडङ्गुलोऽर्धाङ्गुलविस्तृतो वक्रद्विबाहुरङ्गुलिप्रान्तसमागमाकृतिः सूक्ष्मशल्याक्षिपक्ष्मव्रणाधिमांसाहरणे' इति । मुचुण्डी नाम सूक्ष्मदन्ता सूक्ष्मा दन्ताः यस्याः सैव ऋजुरवक्रा । न तु सन्दंशवद् वक्रा सन्दंशवद् द्विबाहुरित्यर्थः । मूले बाह्वोः सङ्गमे हस्तग्रहणस्थाने रुचकमङ्गुलीयकं भूषणं यस्याः सैवम् । रुचकपीडनेन हि सा कर्म करोति । गम्भीरश्वासा व्रणश्च गम्भीव्रणः । तस्मिन् मांसमधिमांसम् एतद्विषये आहरणे अर्मणश्च छिन्नशेषस्याहरणे प्रयुज्यते । षडङ्गुलमन्दंशसदृशी तद्वन्मुचुण्डीति वचनात् तस्या मुचुण्ड्याः दन्ता अन्तर्बाह्वग्रे भवन्ति । इन्दुरप्याह — "रुचकं वलयं तस्याश्च वलयं यथा यथा मूलादग्रं गच्छति तथा तथा तद्बाहू संयोजयति तस्याः" इति । संग्रहे चोक्तम्—"तद्वच्च मुचुटी । सूक्ष्मदन्तर्जुर्द्विभुजा मूले रुचकानद्धा वलयपीडनाच्छिन्नार्मशेषगम्भीरव्रणाधिमांसाहरणे" इति ॥ ९ ॥

द्वे द्वादशाङ्गुले मत्स्यतालवद् ह्येकतालके ।
तालयन्त्रे स्मृते कर्णनालीशल्यापहारिणी ॥ १० ॥

द्वे इत्यादि । द्वे तालयन्त्रे भवतः । किं प्रमाणे, द्वादशाङ्गुलायामे । संस्थानमाह । मत्स्यतालवत् मत्स्यगलतालवद् ह्येकतालके द्वितालकमेकम् । द्वयोः पार्श्वयोर्मत्स्यमुखाकारमपरमेकतालकमेकपार्श्वे मत्स्यमुखाकारमेव । हारीतोऽप्याह-"मत्स्यतालवन्मीनमुखवद् द्वौ तालके एकमुभयतालकं अन्यदेकतालकम्." इति । ते द्वे तालयन्त्रे स्मृते । कर्णनाली कर्णस्रोतः. तत्र शल्यमपहरत कर्णनालीशल्यापहारिणी ॥ १० ॥

नालीयन्त्राण्युच्यन्ते —

नालीयन्त्राणि सुषिरगण्येकानेकमुखानि च ।
स्रोतोगतानां शल्यानामामयानां च दर्शने ॥ ११ ॥
क्रियाणां सुकरत्वाय कुर्यादाचूषणाय च ।
तद्विस्तारपरीणाहदैर्घ्यं स्रोतोऽनुरोधतः ॥ १२ ॥

नाडीयन्त्राणीत्यादि । नाडीयन्त्राणि वस्तिनेत्रवत् सुषिराणि स्युः । तानि च एकानेकमुखानि एकद्वाराणि अनेकद्वाराणि च । हृद्यकारोऽप्याह— "नाडीयन्त्राणि सुषिराणि अन्तः सावकाशानि वेणुनाल्यादिवत् एकमुखानि कानिचित् अर्शोयन्त्रादीनि अनेकमुखानि कानिचित् । यथा उदरवेधे उभयमुखद्वारा नाली विधीयते" इति । सोत्र इत्यादि । कण्ठादिस्रोतोगतानां शल्यानां दर्शननिमित्तं विदर्शित । तथा कण्ठादिस्रोतोगतानां रोगाणां दर्शने तथा क्रियाणां शस्त्रक्षाराग्निप्रक्षालनोपशमणिधानादीनां सुकरत्वाय च सौकर्यार्थम् । 'कण्ठादिस्रोतस्तु कर्मकरणार्थम्' इति केचित । तथा विषदिग्धादीनां आचूषणार्थं च विदध्यात् । 'धातरक्ताद्याचूषणाय' इति हृद्यकारः । तद्विस्तारेत्यादि । तेषां नाडीयन्त्राणां विस्तारादि स्रोतोऽनुरोधाद् भवति । विस्तारः पृथुत्वम् । परिणाहो वर्तुलत्वं दैर्घ्यमायामः । एतानि स्रोतोवशाद् भवन्ति । यथा अनुवासनोत्तरवस्तिनस्यधूमनालीकादिषु निर्दिष्टम् ॥ ११-१२ ॥

दशाङ्गुलार्धनाहांतःकण्ठशल्यावलोकिनी ।
नाली, पञ्चमुखच्छिद्रा चतुष्कर्णस्य संग्रहे ॥ १३ ॥
शरद्रस्य द्विकर्णस्य त्रिच्छिद्रा तत्प्रमाणतः ।
शरद्रकर्णसंस्थानानार्हदैर्घ्यानुरोधतः ॥ १४ ॥
नाडीरेवंविधाश्चान्या द्रष्टुं शल्यानि कारयेत् ।

दशेत्यादि । अन्तः कण्ठे शल्यमन्तःकण्ठशल्यम् । अन्तःकण्ठशल्यावलोकिनी कण्ठाभ्यन्तरशल्यावलोकनार्थं नालीदशाङ्गुला आयामतः अर्धनाहा अतो दशाङ्गुलार्धनाहा पञ्चाङ्गुलपरिणाहा अन्तः सुषिरा च । परतन्त्रवचनात् । "कण्ठशल्यदर्शनार्थं नाली दशाङ्गुलायता पञ्चाङ्गुलपरिणाहा" इति संग्रहे । पञ्चेत्यादि । नालीति वर्तते । पञ्च सुषिराणि छिद्राणि यस्याः सा । एकं मुखं शरद्वारङ्गस्य ग्रहणाय शेषाणि कर्णचतुष्टयस्य ग्रहणाय । सा नाली चतुष्कर्णस्य वारङ्गस्य संग्रहे संग्रहणनिमित्तं युज्यते । चत्वारः कर्णा यस्य वारङ्गस्येति समासः । तत्र शरादेरन्तः प्रवेश्यः फालो वारङ्ग उच्यते । वारङ्गान्तरं — वारङ्गस्य द्विकर्णस्य संग्रहे त्रिच्छिद्रा नाली स्यात् । त्रीणि छिद्राणि यस्या सा त्रिच्छिद्रा । त्रिच्छिद्रशब्दस्योपलक्षणार्थत्वात् त्रिमुखेत्येतदपि द्रष्टव्यम् । तस्य वारङ्गस्य प्रमाणं तत्प्रमाणं तस्मात् तत्प्रमाणतः । वारङ्गप्रमाणानुसारेण नालीप्रमाण विज्ञेयम् । अथवा तत्प्रमाणतः वारङ्गकर्णानां

प्रमाणानुकूलेन। संग्रहे चोक्तम्— "द्विकर्णस्य तु वारङ्गस्य समन्तायं त्रिच्छिद्रमुखा नाली तत्प्रमाणत कुर्यात्। तथा च चतुष्कर्णस्य पञ्चमुखच्छिद्राम्' इति। "पञ्चमुख्यायास्त्रिमुखायाश्च नाल्या मुखाना मूलमेक विशानि। तत्र मध्यम मुख वारङ्गग्रहणे शेषाणि तत्कर्णानाम्" इतीन्दुः। 'वारङ्ग ग्रहणस्थाने' इति हाटकः। वारङ्गत्यादि। कर्णादीना द्वन्द्वः। वारङ्गस्य कर्णानीनि तेषामनुरोध स्तस्माद् वारङ्गकर्णादिप्रमाणानुसारेणैवप्रकारा अन्याश्च नालीः अन्या अपि नालीः शल्यानि शरीरान्तर्गतानि द्रष्टुं कारयेत् ॥ ॥ १३—१४॥

पद्मकर्णिकया सृष्टि सदृशी द्वादशाङ्गुला ॥ १५ ॥
चतुर्थसुषिरा नाडी शल्यनिर्घातिनी मता।

पद्मेत्यादि। सृष्टि मूर्धभागे पद्मकर्णिकया जलजकर्णिकया सदृशी। कियत्प्रमाणा, द्वादशाङ्गुला दैर्घ्येण तथा चतुर्थसुषिरा चतुर्थो भाग सुषिरो यस्या सा त्र्यङ्गुलसुषिरेत्यर्थ। एव शल्यनिर्घातिनी ज्ञेया। प्रवेशमार्गा हरणाशक्यानां शल्यानां निर्घातनम्। निर्घातिन्या सुषिरे भागे निर्घात्य शल्य प्रविष्ठ मुखेन निर्गच्छति। सग्रहे चोक्तम् — "शल्यनिर्घातिनीं तु पद्मकर्णिकाकारशीर्षां द्वादशाङ्गुला त्र्यङ्गुलसुषिरा कुर्यात्" इति ॥

अर्शोयन्त्रमाह—

अर्शसा गोस्तनाकारं यन्त्रक चतुरङ्गुलम् ॥ १६ ॥
नाहे पञ्चाङ्गुलं पुंसां प्रमदाना षडङ्गुलम्।
द्विच्छिद्र दर्शने व्याधेरेकच्छिद्रं तु कर्मणि ॥ १७ ॥
मध्येऽस्य त्र्यङ्गुलं छिद्रमङ्गुष्ठोदरविस्तृतम्।
अर्धाङ्गुलोच्छ्रितोद्वृत्तकर्णिकं तु तदूर्ध्वत ॥ १८ ॥
शम्याख्यं तादृगच्छिद्रं यन्त्रमर्शःप्रपीडनम्।
सर्वथापनयेदोष्ठं छिद्रादूर्ध्वं भगन्दरे ॥ १९ ॥

अर्शसामित्यादि। अर्शसा सम्बन्धि यन्त्रक गोस्तनाकार कार्यम्। यन्त्रकमिति अल्पे कप्रत्यय। दैर्घ्येण चतुरङ्गुलमातुरङ्गुलमानत। नाहे परिणाहे पञ्चाङ्गुल पञ्चाङ्गुलदीर्घेण सूत्रेण वेष्टनीयम्। स्थौल्यमित्यर्थ। पुसामेव

पञ्चाङ्गुलं परिणाहे स्यात् स्त्रीणां तु परिणाहे षडङ्गुलम् । स्वभावत एव तासां गुदस्य पायोर्महत्त्वात् । तच्च त्रिविधमित्याह । व्याधेर्दर्शने द्विच्छिद्रमुभयपार्श्वच्छिद्रं कर्मणि शस्त्रक्षाराग्न्यवचारणे एकच्छिद्रमेकपार्श्वच्छिद्रं यन्त्रकम् । अस्य यन्त्रस्य मध्ये ऊर्ध्वमधश्चार्धाङ्गुलं मुक्त्वा त्र्यङ्गुलं छिद्रमङ्गुष्ठोदरविस्तृतं कुर्वीत । तदूर्ध्वतः छिद्रादूर्ध्वं नेत्रस्य मूलार्धाङ्गुले सच्छिद्रोद्वृत्तकर्णिकम् अथवा अर्धाङ्गुलोच्छ्रिता उद्वृत्ता कर्णिका यस्य तदेवं त्र्यङ्गुलच्छिद्रमङ्गुष्ठोदरतुल्यविस्तारम् । शमीसंज्ञं तृतीयं यन्त्रकं तादृक् गोस्तनाकारमित्यादिलक्षणलक्षितयन्त्रसदृशं स्यात् । अत्र विशेषमाह—आच्छिद्रं पार्श्वच्छिद्ररहितं विधेयम् । इदं च यन्त्रमर्शःप्रपीडने योज्यं स्यात् । संग्रहे चोक्तं— "अर्शोयन्त्रं त्रिविधम् । ताम्रायोहेमं दान्तं शार्ङ्गं वार्क्षं च गोस्तनाकारं चतुरङ्गुलायतं हस्ततलायतमेकं पञ्चाङ्गुलानि परिणाहेन पुंसां षडङ्गुलानि स्त्रीणाम् । द्विच्छिद्रं दर्शनार्थं एकच्छिद्रं कर्मणि । तथा हि । सुखेन दर्शनं शस्त्रक्षाराग्न्यतिक्रमश्च । छिद्रं तु त्र्यङ्गुलायतमङ्गुष्ठोदरविस्तारं यदङ्गुलमवशिष्टं तस्याधोऽर्धाङ्गुलमुपरि तथा अर्धाङ्गुलोच्छ्रितोद्वृत्तकर्णिकम् । तृतीयं तु तादृशमेव शम्याख्यं पार्श्वच्छिद्ररहितं पीडनार्थम्" इति। 'सर्वं परिणाहे पञ्चाङ्गुलं पुंसाम्' इतीन्दुः । अस्मद्गुरवस्तु "शम्याख्यं यन्त्रं चतुरङ्गुलं परिणाहे" इति वदन्ति । "शमिस्तु चतुरङ्गुलः" इति तन्त्रान्तरवचनात् तथा तस्यार्शोयन्त्रे प्रवेशयोग्यत्वाच्च । सर्वथा भगन्दरे भगन्दरयन्त्रे ओष्ठमपनयेत् । कुतः प्रभृति छिद्रादूर्ध्वमुपरिष्टादर्धाङ्गुलमपकर्षेदित्यर्थः । 'कर्णिका तु कार्यैव सर्वथा व्याधिदर्शने कर्मणि च' इति केचित् ।

"सर्वं चापनयेदोष्ठं छिद्रादूर्ध्वं भगन्दरः"

इति केषाञ्चित् पाठः ॥ १६–१९ ॥

घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यङ्गुलद्वया ।
प्रदेशिनीपरीणाहा स्याद्भगन्दरयन्त्रवत् ॥ २० ॥

घ्राणार्बुदे घ्राणार्शसि च एकच्छिद्रा नाडी दैर्घ्येणाङ्गुलद्वयमाणा प्रदेशिनीतुल्यपरिणाहा । सा च भगन्दरयन्त्रतुल्या स्यात् । अपनीतौष्ठेत्यर्थः ॥ २० ॥

अङ्गुलिघ्राणकं दान्तं वार्क्षं वा चतुरङ्गुलम् ।
द्विच्छिद्रं गोस्तनाकारं वक्त्रविद्वर्तो सुखम् ॥ २१ ॥

अङ्गुलित्राणकाख्यं यन्त्रं दान्तं दन्तमयं काष्ठमयं वा चतुरङ्गुलप्रमाणमर्शोयन्त्रसदृशं द्विच्छिद्रमूर्ध्वाधश्छिद्रं गोस्तनाकृतिः स्यात्। अङ्गुलित्राणक मङ्गुल्या मणिबन्धं नाहृणोतीत्युभयतश्छिद्रं तच्च वक्त्रस्य विवृताव-ङ्गुलिप्रसारेण सुखं यथा वक्त्रविलायने। अङ्गुलीनां दन्तेभ्यो रक्षणादन्वर्थ-मङ्गुलित्राणकमिति। तद् दृढेन सूत्रेण मणिबन्धप्रतिबद्धमास्यविलायने योज्यम् ॥ २१ ॥

योनिव्रणेक्षणं मध्ये सुषिरं षोडशाङ्गुलम्।
मुद्राबद्धं चतुर्भिक्षमम्भोजमुकुलाननम् ॥ २२ ॥

चतुःशलाकमाक्रान्तं मूले ताद्विकसेन्मुखे।
यन्त्रे नालीव्रणाभ्यङ्गक्षालनाय षडङ्गुले ॥ २३ ॥

वस्तियन्त्राकृती मूलमुखेऽङ्गुष्ठकलायते।
अग्रतोऽकर्णिके मूले निबद्धमृदुचर्मणी ॥ २४ ॥

योनिव्रणमीक्ष्यते येन तद् योनिव्रणेक्षणं यन्त्रम्। मध्ये मध्यभागे सुषिरमुभयतोमुखमित्यर्थः। तथा षोडशाङ्गुलं दैर्घ्येण, परिणाहतो योनिप्रमाणे नानुमेयम्। तथा मुद्राबद्धं सुषिरयुक्तया सञ्चारिण्या मुद्रया ऊर्मिकया बद्धम्। तथा चत्वारो भिक्षाः पत्राणि यस्य तत् चतुर्भिक्षम्। तथा कोणेषु चतसृभ्य शलाकाः यस्य तच्चतुःशलाकम्। मूले आक्रान्तं शलाकानां मूलं अनया शलाकाबद्धमुद्रया क्रान्तं तद् यन्त्रमुखे जलजमुकुलसदृशे विकसेत् प्रसरेत्। शला-काक्रमणाद् मुखविकासि स्यात्। यन्त्रे द्वे षडङ्गुले भवतः। किमर्थं, अभ्य-ङ्गश्च क्षालनं च तदभ्यङ्गक्षालनं नालीव्रणस्याभ्यङ्गक्षालनं तदर्थमुपयुज्यते। आकार आकृत् 'सम्पदादित्वात्' क्विप्। वस्तियन्त्रस्येवाकृद् आकारो ययोस्ते वस्ति-यन्त्राकृती 'गोपुच्छाकारम्' इत्यादि लक्षणयुक्ते। तथा मूलमुखे मूले मुखे च यथा सङ्ख्यमङ्गुष्ठकलायते मूलेऽङ्गुष्ठतुल्यच्छिद्रे मुखे कलायतुल्यच्छिद्रे। अग्रतोऽकर्णिके अग्रतः कर्णिकारहिते इति वस्तियन्त्राद् विशेषः। मूले तु कर्णिके द्वे अपि वस्तिपुटयोजनार्थे कार्ये। एवेत्यग्रहणम्। मूले मूलदेशे निबद्धं योजितं मृदुचर्म वस्तिपुटाकारं ययोस्ते निबद्धमृदुचर्मणी। "नालीव्रणस्य प्रक्षालनाभ्यञ्जनयन्त्रे षडङ्गुले वस्तियन्त्राकारे मुखतोऽकर्णिके मूलमुखयोरङ्गुष्ठकलायप्रवेशसोषसी" इति संग्रहे ॥ २२-२४ ॥

मसूरदलवक्त्रे द्वे स्यातामष्टनवाङ्गुले ।
शङ्खवः षड्भौ तेषां षोडशद्वादशाङ्गुलौ ॥ २० ॥

व्यूहनेऽहिफणावक्त्रौ द्वौ दशद्वादशाङ्गुलौ ।
चालने शरपुङ्खास्यावाहार्ये घडिशाकृती ॥ २१ ॥

तद्वद् घटीति । तद्वत् तेन यथोक्तेनालाबुना तुल्यैर्दैर्घ्यपरिणाहादिसुश्लक्ष्ण-कार्या च घटी स्यात् । तथान्तर्दोषा श्लेष्मरक्तहृच्च । सा च गुल्मस्य बिलयने उन्नमने च हिता । न केवलं कफरक्तहृदिति चार्थः । शलाकासंज्ञानि यन्त्राणि विविधकर्माणि विविधाकाराणि यथायोगप्रमाणानि स्युः । यथायोगप्रमाणानीति, यत्र देहप्रदेशे प्रयुज्यन्ते तदनुरूपमानानि । पाठ्यकारोऽप्याह— "यथायोगप्रमाणानीति, यस्य यस्य पुरुषस्य यत्र यत्र यथा कृते सति परिणाहदैर्घ्ये समाने भवतः तथा कार्यमित्यर्थः" इति । "यथायोगदैर्घ्यपरिणाहानि" इति संग्रहे । तेषां शलाकायन्त्राणां मध्ये मसूरपदमुखे मूलागमसूणमुखे एषणकर्मणी उभे शलाकायन्त्रे भवतः । एषणं मार्गपर्येषणं कर्म ययोस्ते तथोक्ते । एषणम् आरा (ಮಗುಚುವ ಉಪಕರಣ) इति भाषा । तथा स्रोतोभ्यः शल्यहारिणी द्वे शलाकायन्त्रे भवतः । किं भूते, मसूरदलमिव वक्त्रं ययोस्ते अष्टाङ्गुले नवाङ्गुले वा स्याताम् । पर् शङ्खवः स्युः । शङ्खुः (ಕಿವಿಯೋಲೆ) तेषां मध्ये द्वौ षोडशाङ्गुलद्वादशाङ्गुलौ भवत । व्यूहने व्यूहनकर्मणि अहिफणावक्त्रौ सर्पभोगमुखौ च । व्यूहनं संश्लेषणम् । "व्यूहनं विपरीतस्थानां मांसादीनां सम्यग्रचनम्" इतीन्दुः । स्थानादपेतानां मांसादीनां स्थानस्थापनं व्यूहनमित्यस्मद्गुरवः । व्यूहने (ಹಲ್ಲು ಕೀಳುವ ಉಪಕರಣ) चालनेऽधिकदन्तादीनां चालने द्वौ शङ्कू द्वादशदशाङ्गुलौ शरपुङ्खमुखौ भवतः । आहार्ये आहरणे घडिशाकारौ द्वौ शङ्कू यथायोगप्रमाणौ भवतः ॥ २८–२१ ॥

व्यूहनायाहिफणमुखौ चालनाय शरपुङ्खमुखौ आहरणाय बडिशमुखौ इति वक्ष्यमाणशङ्कुवचनाय गर्भशङ्कुमाह—

नतोऽग्रे शङ्कुना तुल्यो गर्भशङ्कुरिति स्मृतः ।
अष्टाङ्गुलस्तेन मूढगर्भं हरेत् स्त्रियाः ॥ २२ ॥

नत इत्यादि । गर्भशङ्कुरेकः नतोऽग्रेऽमतोभागे तथा शङ्कुना तुल्यः पूर्वोक्तेन शङ्कुना तुल्याकृतिः । अष्टादशाङ्गुलदीर्घः स गर्भशङ्कुरिति स्मृतः । मुनिभिरिति शेषः । तेन गर्भशङ्कुना स्त्रिया मृढगर्भमनिस्सरन्तं सन्तं हरेत् 'अष्टाङ्गुलायतः' इति वा पाठः ॥ ३२ ॥

अश्मर्याहरणे सर्पफणावद्वक्त्रमग्रतः ।
शरपुङ्खमुखं दन्तपातनं चतुरङ्गुलम् ॥ ३३ ॥

अश्मर्याहरणमश्मर्याकर्षणम् । सर्पफणावदग्रे यन्त्रं स्यात् । सर्पफणाख्यमेवैतद् यन्त्रं स्यात् । शरपुङ्खमुखाख्यं यन्त्रं चतुरङ्गुलं स्यात् । पूर्वं चलितानां कृम्यादिभिर्भक्षितानां वा दन्तानां पातनं स्यात् । अनेन हि दन्ताः पात्यन्ते । एतदेव हि दन्तनिर्घातनाख्यम् ॥ ३३ ॥

कार्पासविहितोष्णीषाश्शलाकाः षट् प्रमार्जने ।

प्रमार्जने विविधव्रणक्लेदक्षारमार्जने षट् शलाकाः स्युः । 'प्रमार्जने क्षारक्लेदादेः' इत्यरुणदत्तः । किम्मूताः, कार्पासविहितोष्णीषाः कार्पासेन विहितं कल्पितमुष्णीषं शिरोवेष्टनमिव यासां तथोक्ताः । कार्पासेन संस्कृतेन घनेन शिरसि बद्धा इत्यर्थः । 'पिहितोष्णीषाः' इति केषाञ्चिन्न पाठः । तत्र कोऽर्थ इति न जानीमः ॥

तासां प्रमाण विषयं चाह—

पायावासन्नदूरार्थे द्वे दशद्वादशाङ्गुले ॥ ३४ ॥

पायावित्यादि । पायावासन्नदूरार्थे द्वे दशद्वादशाङ्गुले भवतः । आसन्नार्थे दशाङ्गुला दूरार्थे द्वादशाङ्गुला इत्यर्थः । हाटकोऽपि — 'आसन्ने दशाङ्गुला दूरार्थे द्वादशाङ्गुला' इत्याह ॥ ३४ ॥

द्वे षट्सप्ताङ्गुले घ्राणे द्वे कर्णेऽष्टनवाङ्गुले ।
कर्णशोधनमश्वत्थपत्रप्रान्तं सुवाननम् ॥ ३५ ॥

घ्राणे षट्सप्ताङ्गुले भवतः । आसन्नदूरार्थे इत्यत्राप्यनुवर्तते । आसन्ने घ्राणव्रणे षडंगुला दूरे घ्राणव्रणे सप्ताङ्गुला । कर्णे आसन्नदूरार्थेऽष्टनवाङ्गुले द्वे कर्णशोधनाख्यं यन्त्रमश्वत्थपत्रस्येव प्रान्तोऽग्रं यस्य तत् तथोक्तम् । अश्वत्थपत्रप्रान्तमिति अश्वत्थपत्रप्रान्तमेव गृह्यते नकुलाक्षिन्यायात् । तथा सुवस्येवाननं यस्य तत्तथा । 'कर्णशोधनं सुरुचमश्वत्थपत्रमास्य' इति सङ्ग्रहे ॥ ३५ ॥

शलाकाजाम्बवोष्ठानां क्षारेऽग्नौ च पृथक् त्रयम् ।
युञ्ज्यात् स्थूलाणुदीर्घाणां, शलाकामन्त्रवर्त्मनि ॥ २६ ॥

मध्योर्ध्ववृत्तदण्डां च मूले चार्धेन्दुसन्निभाम् ।

शलाकाजाम्बवोष्ठानामिति । शलाकाश्च जाम्बवोष्ठानि च तेषां पृथक् त्रयं क्षारे क्षारपातने अग्नौ अग्निदाहकरणे च युञ्ज्यात् । शलाका (പ്രണാവ) । क्षारम् (കാരക്കാൽ) । अग्निः (ചൂടുകാൽ) । जाम्बवोष्ठम् (കടക്കലായാണി) । किंभूतानां शलाकाजाम्बवोष्ठानां, स्थूलाश्चाणवश्च दीर्घाश्च तेषाम् । अणुशब्दस्तन्त्रेण सूक्ष्महृस्वावाह्यौ । तेन स्थूलसूक्ष्महृस्वदीर्घाणामित्यर्थः । तत्र शलाकाग्निस्तः जाम्बवोष्ठानि च त्रीणि क्षारे तथाग्नौ च एवं द्वादशैतानि शलाकाख्यानि यन्त्राणि । क्षारपातनेऽग्निपातने च शलाकाबहुत्वमिच्छन्त्यपरे । ते तु पृथक् त्रय युञ्ज्यात् । स्थूलाणुदीर्घाणामित्यत्र 'स्थूलानामणूनां दीर्घाणां च पृथक् त्रय युञ्ज्यात्; शलाकानां जाम्बवोष्ठानां च' इति ब्रुवते सङ्ग्रहे चोक्तम्—"क्षाराग्निकर्मार्थे जाम्बवोष्ठानि द्वादशदशाष्टाङ्गुलानि क्रमाद् व्यङ्गुलाङ्गुलार्धाङ्गुलफलानि शलाकाश्च स्थूलसूक्ष्मदीर्घह्रस्वमध्यमाः"[1] इति । शलाकामित्यादि — अन्त्रवर्त्मनि आन्त्रवृद्धौ शलाकां युञ्ज्यात् । कीदृशीं, मध्यादूर्ध्वं वृत्तो दण्डो यस्यां ताम् । वृत्तग्रहण शलाकासामान्यात् पृथुत्वनिराकरणार्थम् । तथा मूले मूलभागेऽर्धेन्दुसन्निभामर्धचन्द्राकाराम् अर्धेन्दुवक्त्रामित्यर्थ । "इन्दुवक्त्राया वक्त्रादन्यस्मिन् पार्श्वे दण्डो विधेयः" इतीन्दुः ॥

कोलास्थिदलतुल्यास्या नासार्शोऽर्बुददाहकृत् ॥ २७ ॥

कोलेत्यादि । कोलास्थि बदरास्थि तस्य दलमर्धखण्डमित्यर्थः । तदुल्यं तन्मात्रं मुखं यस्याः सा कोलास्थिदलतुल्यास्या= (ഞാലിക്കുരുക്കാൽ.) नासार्शस्सु नासार्बुदेषु च दाहं करोति ॥ २७ ॥

दंशाङ्गुला निम्नमुखास्तिस्रः क्षाराग्निधारणे ।
कनीनिमध्यमानामीनखमानसमैर्मुखैः ॥ २८ ॥

---

१ 'अग्नौ' इतिताटीकाहृदये सङ्ग्रहे च ।

दशेत्यादि। क्षारौषधक्रमे प्रणिधाने तिस्रः शलाकाः स्युः। कीदृश्यः, दशाङ्गुलाः। तथा कनीनिका च मध्यमा चानामिका च तासा नखास्तेषां मानं प्रमाणं तेन समैस्तुल्यैर्मुखैरुपलक्षिताः। सङ्ग्रहे चोक्तम्—"क्षारविषौषधप्रणिधानाय दर्व्यस्तिस्रोऽष्टाङ्गुला दर्व्याकाराः। कनीनिकानामिकामध्यमाङ्गुलिनखपरिमाणानिम्नमुखान्यधाङ्गुलिसंस्थानाः" इति ॥ ३८ ॥

स्वंस्वमुक्तानि यन्त्राणि मेढ्रशुन्ध्यञ्जनादिषु ।
अनुयन्त्राण्ययस्कान्तरज्जुवस्त्रादमुद्गराः ॥ ३९ ॥
वधांत्रजिह्वबालाश्च शलाकान्तमुखद्विजाः ।
फालः पाकः करः पादो भयं हर्षश्च तत्क्रियाः ॥ ४० ॥
उपायवित्प्रविभजेदालोच्य निपुणं धिया ।

मेढ्रशुध्यादिषु उत्तरवस्त्यादिषु विषये स्वंस्वं यथास्वं यन्त्राणि उक्तानि गदितानि। आदिशब्देन नाडनादिपरिग्रहः। अयस्कान्तादीन्यनुयन्त्राणि कल्पयेत्। स्वल्पयन्त्रकार्यकरणादनुयन्त्राणि। अयस्कान्तम्=(ಕಬ್ಬಿಣ) क्षुद्रं)। रज्जु=(ಹಗ್ಗ) । वस्त्रम्=(ಬಟ್ಟೆ) । अश्म=(ಮಣ್ಣು) । मुद्गरम्=(ಮದ್ದಳೆ) । वधम्=(ಬಾಳೆ) । आन्त्रम्=(ಕರುಳು) । जिह्वा=(ನಾಲಿಗೆ) बाल(मूः)=(ಮಯಿಲಿ)। शला=(ಶಲಾಕೆ)। नखम्=(ಉಗುರು)। मुखम्=(ಮುಖ)। द्विजः=(ಹಲ್ಲು) । पाकः=(ಒಳಕಲ್ಲು) । करः=(ಅಂಗೈ) । पादः=(ಕಾಲು) भयम्=(ಭಯ) । तत्क्रियास्तेषा यन्त्राणा क्रियाः निर्यातनादिकाः । बुध्या निपुणमालोच्य प्रविभजेत् निर्यातनादिकर्माणि प्रविभज्य युञ्ज्यादित्यर्थः। 'तत्क्रिया उक्ता यन्त्रक्रियाः' इति पाठ्यकारः।

"एतानि देहे सर्वस्मिन् देहस्यावयवेऽपि वा ।
सन्धौ कोष्ठे धमन्या च यथायोगं प्रयोजयेत् ॥"

इति सङ्ग्रहे। 'अयस्कान्तादीन्यनुयन्त्राणि यथायोगं देहे प्रयोजयेत्।' इतीन्दुः ॥ ३९-४० ॥

तान्येव यन्त्राणां कर्मांगाह—

निर्यातनोन्मथनपूरणमार्गशुद्धि-
संग्यूहनाहरणबन्धनपीडनानि ।
आचूषणोन्मननामनचालनाङ्ग-
व्यावर्तनर्जुकरणानि च यन्त्रकर्म ॥ ४१ ॥

निर्घातनेत्यादि । यथासंभवं निर्घातनादि यन्त्राणां यन्त्रस्य वा कर्म । निर्घातनम् निपातनम्=(ഒടിക്കൽ)। उन्मथनमुन्मूलनम् =(ഇളക്കൽ) । पूरणम् = (നിറയ്ക്കൽ) । मार्गशुद्धिः = (വഴി ശുദ്ധമാക്കൽ) संन्यूहनम् = (ചേർക്കൽ) । न्यूहनं विपरीतस्थानां पेश्यादीना सम्यक् चलनमिति केचित् । विपरीतस्थाना मासादीना स्थानस्थापनं व्यूहनमिति च । आहरणम् =(പുറിയ്ക്കൽ) । बन्धनम् =(കെട്ടൽ) । पीडनम्=(അമുക്കൽ) । आचूषणम्=(ഉറിഞ്ഞൂക) । उन्नमनम्=(ഉയർത്തൽ)। नामनम्=(താഴ്ത്തൽ) । चालनम् =(ഇളക്കൽ) । भङ्गः = (ഒടിക്കൽ) । व्यावर्तनम् = (തിരിക്കൽ) । ऋजूकरणम् =(ചൊവ്വാക്കൽ) । चः समुच्चये । प्रक्षालनादीनि समुच्चीयन्ते ॥ ४१ ॥

विवर्तते साध्ववगाहते च
ग्राह्यं गृहीत्वोद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्वेष्वविकारि यच्च ॥ ४२ ॥

विवर्तनादिभिश्चतुर्भि कारणैर्यन्त्रेषु मध्ये कङ्कमुखं श्रेष्ठम् । निर्घातनादिव्यतिरिक्तयन्त्रकार्यकरणाद् विवर्तते व्रणप्रविष्टमपि परिवर्तयितुं शक्यमवगाहते साधु प्रविशति ग्राह्यं शल्यं गृहीत्वा उद्धरते उद्धरति यद् यस्मात् सर्वेष्वपि स्थानेषु मांससन्धिस्नोत स्नाय्वस्थिकोष्ठेष्वविकारि । नास्त्यस्य विकार इत्यविकारि । सर्वेषु स्थानेषूद्धरणसामर्थ्यमस्य समानमित्यभिप्रायः । अतः सर्वयन्त्रेषु कङ्कमुखं प्रधानम् । 'व्यूहनं विवर्तनम्' इति हारीतः । "स्थानेषु सर्वेषु हृदयादिषु" इति हृद्याकारप्रभृतयः । यन्त्रेषु हस्तमेव श्रेष्ठं तदधीनत्वाद् यन्त्राणाम् । यन्त्रदोषाः सौश्रुते उक्ताः । "अतिदीर्घमत्यरुग्रमाहि विषममाहि वक्रं मृदुमुखं मृदुकीलं मृदुपाशमिति यन्त्रदोषाः । उक्तदोषहीनमदारुणाहुकं मन्त्रं शस्तम्" इति ॥ ४२ ॥

इति श्रीदासगण्डितविरचितायां हृदयबोधिकायां
। पञ्चविंशोऽध्यायः ।

सा तत्पक्षेऽर्धाङ्गुलप्रवेशा । "अर्धाङ्गुलप्रवेशच्छिद्रा" इति हाटकः । तत्पक्षेऽर्धाङ्गुलपरिणाहेत्यर्थः" इति सारकृत् । उक्तं च भालुकीये —

"अर्धाङ्गुलपरीणाहमङ्गुलायतवेधनाम् ।
विद्यात् षडङ्गुलायामामाकृतिर्बोक्तो भवेत् ॥" इति ।

तदूर्ध्वतः वृत्तार्धाङ्गुलादुपरिष्टाच्चतुरश्रा । "तदूर्ध्वतः द्वारस्योर्ध्वतः" इति पाठ्यकारः । 'ततोऽर्धत' इति केषाचित् पाठः । तत्पक्षे अर्धाङ्गुलप्रमाणैव चतुरश्रा स्यादिति मोक्षे आराप्रमाणमङ्गुलमानमिति प्रोक्तं भवति । "आरा दैर्घ्याच्चतुरङ्गुला" इतीन्दुः । तया आरया शोफं मर्माणां विध्येत् । कदा, पक्वामसंशये किमयं शोफः पक्वः, उताऽऽम इति मन्देहे । बहलां च कर्णपालीं तथा विध्येत् । बहलातिमांसलया । तस्या एव बहलायाः कर्णपाल्या एव च व्यधनार्थे सूची शस्यते न केवलमारा । कीदृशी, त्रिभागसुषिरा त्रिभागमात्तभागे सुषिरो यस्याः सैवम् । दैर्घ्येण त्र्यङ्गुला नाम्ना कर्णवेधनी स्यात् । इति षड्विंशतिशस्त्राणि प्रोक्तानि । अत्रोद्देशादेव सिद्धे षड्ग्रहणं परमतनिराकरणार्थम् । सूचीकूर्चकर्तरीव्रीह्यादेरनुक्तया सङ्ख्यया[1]त्वमिच्छति सुश्रुतः । मण्डलाग्रवृद्धिपत्रसूच्यादीनामवान्तरभेदात् सङ्ख्यानहुत्वमित्यन्ये । कर्तरीशरारीमुखयोरेकत्वमिच्छति कश्चित् । सूचीकूर्चमुखोरेकत्वमिच्छन्त्यन्ये । यैपुण्योद्वित्वमिच्छत्यपरः । आराकर्णवेधन्योरेकत्वमभिमतं कस्मचित् । त्रिकूर्चकूर्चयोरत्यन्तभिन्नयोरप्यैक्यमिच्छन्ति किं पुनरारार्कर्णवेधन्योरेककार्ययोः । तस्माद् येषां मण्डलादीनां कर्णवेधन्यन्तानां संज्ञा कृता तान्येतानि षड्विंशतिरिति ॥ २२-२६ ॥

जलौकःक्षारदहनकाचोपलनखादयः ।
अलौहान्यनुशस्त्राणि तान्येवं च विकल्पयेत् ॥ २७ ॥
अपराननुपन्त्रादीन्युपयोगश्च यौगिकम् ।
उत्पाट्यपाट्यसीव्यैष्वलेख्यप्रच्छानकुट्टनम् ॥ २८ ॥
छेद्यभेद्यव्यधोन्मन्थग्रहो दाहश्च तत्क्रियाः ।

जलौकःप्रभृतयोऽलौहान्यनुशस्त्राणि । अशस्त्राण्येव शस्त्रकार्यं कुर्वन्तीत्यनुशस्त्राणि । शस्त्रकार्यं रक्तस्रावणादिकम् । अनुशस्त्राणीति रूढसारादीनां पारिभाषिकी संज्ञा । अथवा अनुशब्दः सामीप्यार्थः । शस्त्रसमीपानि शस्त्रा-

१. 'अपराण्यपि' इति मुद्रितपाठः हृदयपाठः

सह ससीव्य तस्मिन् रोमपुञ्जे शस्त्रस्थिति कार्येत्यर्थः । तथा शलाकया पिहित स्थगितमास्य यस्य स एवम् । विन्यस्तपाशे मुखे दृढाच्छिन्ने परपरिहरणार्थं यन्त्रशलाकयास्य विघट्टितव्यमित्यर्थः । शोभन सञ्चयो यस्य स सुसञ्चयः । शस्त्रपूत इति तानि तानि शस्त्राणि स्वे स्वे पुटे स्थापयित्वा शस्त्रैः सम्पूर्ण एव कार्य । असम्पूर्णे शस्त्राणा घट्टन शिथिलत्वादित्यर्थः । कल्पकोशः (०८५३-५५०) अधिगतशास्त्रो शस्त्रशिक्षा कुर्यात । तथा चोक्त सुश्रुते— "अधिगततन्त्रः शस्त्रशिक्षां कुर्यात् । यथा पुष्पफलाढ्यवादिषु छेदनस्य, पङ्कपूर्णदृतिप्रभृतिषु भेदनस्य, तरोस्त्वि चर्मणि लेखनस्य, मधूच्छिष्टोपचिते शाल्मलीफलके विस्रावणस्य, सूक्ष्मघनयोस्सान्तयो मृदुचर्मान्तयोश्च सीवनस्य, मृतपशुदन्तेषु आहार्यस्य, वेणुशुष्काढ्यवादिषु एषणस्य मृतपशुसिरासु उत्पलनालेषु च वेधनस्य, मृदुमासस्पण्डेषु अभिक्षारयो, घटाद्यावृश्चेषु वस्तिपीडनस्य च 'योग्यां कुर्यात्" । योग्या शिक्षा । श्लोकश्चात्र—

' एवमादिषु मेधावी योग्यार्हेषु यथाविधि ।
द्रव्येषु योग्या कुर्वाणो न प्रमुह्यति कर्मसु ॥"

इति ।

अनुशस्त्राण्युक्तानि । तेषु अगौरव: प्रधानम् । अतस्तत्रा आह—

जलौकसस्तु सुखिनां रक्तस्रावाय योजयेत् ।

जलौकसस्त्वित्यादि । सुखिना सुखोचिताना नृपभीरुबालस्थविरसुकुमारनार्यादीनाम् । एते तु क्षासहिष्णव तेषा रक्तविस्रावणार्थं जलौकसो योजयेत् । उक्त च तन्त्रान्तरे—

"नृपाणा सुकुमाराणा नारीणा बालवृद्धयो ।
दुर्बलाना व्याधिजुषा रक्ते साध्ये जलौकस ॥
योजयेदूरविस्रावे स्वादुपायो मृदु. सुखः ।"

दुष्टाम्बुमत्स्यभेकाहिद्यूतकोथमलोत्भवाः ॥ २५ ॥

दुष्टाम्बूद्भवा जलौकसः सविषा इति वर्जयेत् । तथा मत्स्यभेकसर्पादिशवकोथोद्भवाः । तथा तेषामेव मत्स्यादीनां ये मला मूत्रपुरीषादयः तदुद्भवाश्च सविषा इति वर्जयेत् ॥ २५ ॥

सविषाणां लक्षणमाह —

रक्ताः श्वेताः भृशं कृष्णाः चपलाम्बुलपिच्छलाः ।
इन्द्रायुधविचित्रोर्ध्वराजयो रोमशाश्च ताः ॥ २६ ॥
सविषा वर्जयेत्, ताभिः कण्डूपाकज्वरभ्रमाः ।
विषपित्तास्रजुत्कार्यं तत्र,

रक्ता इत्यादि । यावल्लोमशाः स्युः ताः ताः सविषाः मनसतो वर्जयेत् । ता न योजयेत्, ताभिर्हि योजिताभिः कण्ड्वादयः स्युः । उपलक्षणं चैवम् । दाहार्त्तो-त्कमूर्च्छादयोऽपि स्यु । तत्र तासु मोहाद् योजितासु विषादिजित्कार्यम् । दाहकोऽप्याह— "दुष्टाम्बुनि मत्स्यादीनां शवकोथे मले च या उद्भवन्ति रक्तत्वादियुक्ताः सविषा इति वर्जयेत्" । मृशशब्दस्य सर्वत्रान्वयः । इन्द्रायुध-विचित्रोर्ध्वराजय इन्द्रायुधवदूर्ध्वराजी । विचित्रा इत्यनेन जलौकस्यशब्देन सविषा आचष्टे । तल्लक्षणमेवमुक्तं भोजे —

ऊर्ध्वराजीचिता या तु दृश्यते चेन्द्रधन्ववत् ।
मसिनू जटे सा भवति प्रदीप्तमिव दृश्यते ॥

सैवोद्वहे यं दशति हरितं काय वा मृगम् ।
उपशाम्यति तत्रैव विषवेगसमीरितः ॥

तयां रक्तमधाध्मं तु जानीयात् कुशलो भिषक् ।
इन्द्रायुधेति तां विद्यात् मृणुष्वैतद्विरूपमपि ॥ " इति ।

रोमशा इति मूले रोमशाः रोमवत्यः । कृष्णे इति विशेषः कालान्तरात् । शुष्कं हि भोजे—

"वलक्षकुंभुरी नाम तृतीया तु निशा मे ।
रोमशं च मरुश्चैव मूत्र मन्मथ वै यदा ॥
मलत्यक्ता मृगं कृष्णं सविषां तां विनिर्दिशेत् ।" इति ॥ २६ ॥

नन्तराणि शस्त्रसन्निहितानि शस्त्रलाभे शस्त्रागमने वा शस्त्रकर्म साधयन्तीति अनुशस्त्राणि । जलौकाः=(জোঁক) दहनो अग्नि । काचः=(কাঁচ) आदिशब्देनायस्कान्तशोफाल्मिपत्रादीना ग्रहणम् । अलौहानि न लोहवृत्तानि । अनेन लोहवृत्तान्यप्यनुशस्त्राणि सन्तीति गमयति । अल्लोहानीति वा पाठः । लोहवर्जितानीत्यर्थ ।

"जलौका स्फटिक काचो नखोऽग्निर्सार एव च ।
कुन्विन्दाभा क्षारमण्डमश्च हुताशन ॥
कर्कशानि च पत्राणि तीक्ष्णाग्राण्यपि कण्टका ।
अनायसानि शस्त्राणि दद्यैतानि विनिर्दिशेत् ॥"

इति भोजे । एवञ्चोक्तेन न्यायेन तान्यानुशस्त्राणि विषयेषु स्वबुध्या कल्पयेत् । अपरानप्यनुयन्त्रादीनिति अन्यानप्यनुयन्त्रादीन् निकल्पयेत् । आदिशब्देनानुशस्त्राणा ग्रहणम् । उपयोगं च यौगिकं साधुतर बुध्या कल्पयेत् निरूपयेत् । सङ्ग्रहे चोक्तम् — "स्वबुध्या च विकल्प्य विविधानि यन्त्रशस्त्राणि तत्कर्माणि चोपकल्पयेत् ।" हस्त एव चात्र प्रधानतम , तदधीनत्वाद् यन्त्रशस्त्राणाम् । अपि च —

'हस्त प्रधानं यन्त्राणा शस्त्राणामिति निश्चय ।
हस्ताधीन हि यन्त्राणा शस्त्राणा कर्म यत्नतः ॥
अनुशस्त्राणि शस्त्राणि यन्त्राण्यपि मनीषया ।
विविध कल्पयेत् तानि कर्मण्यानि यथा तथा ॥" इति ।

उत्पाट्यादीनि तत्क्रियाः तेषा षड्विंशतिशस्त्राणा क्रिया । अत्र सर्वत्र स्वार्थे तद्धितप्रत्यय । नखशस्त्रादिना शोफस्यान्तर्नयनमुत्पाटनम् । "ऊर्ध्वाव् ग्रहणमुत्पाटनम्" इति केचित् । अथवा उत्पाट्यम्=(ওপড়ানো ক্রিয়া.) पाट्यम् = (ফাড়া.) सार्व्यम् = (ছেঁচা) एष्यम् = (আহরণ.) उन्मन्थम् = (ঠেলা.) तत्क्रियास्तेषां शस्त्राणामनुशस्त्राणा यन्त्राणा च क्रिया इत्यन्ये ॥ २७,२८ ॥

शस्त्रदोषानाह—

कुण्ठखण्डतनुस्थूलह्रस्वदीर्घत्ववक्रताः ॥ २९ ॥
शस्त्राणा खरधारत्वमष्टौ दोषा. प्रकीर्तिता ।

कुण्ठेत्यादि — स्पष्टम् ॥ २९ ॥

अधुना शस्त्राणां ग्रहणविधिं दर्शयति —

छेदभेदनलेख्यार्थं शस्त्रं वृन्तफलान्तरे ॥ ३० ॥
तर्जनीमध्यमाङ्गुष्ठैर्गृह्णीयात् सुसमाहितः ।
विस्रावणानि वृन्ताग्रे तर्जन्यङ्गुष्ठकेन च ॥ ३१ ॥
तलप्रच्छन्नवृन्ताग्रं प्रायं व्रीहिमुखं मुखे ।
मूलेष्वाहरणार्थानि क्रियासौकर्यतोऽपरम् ॥ ३२ ॥

छेदेत्यादि । छेदभेदनलेख्यार्थं तर्जनीमध्यमाङ्गुष्ठैः शस्त्रं वृन्तफलान्तरे वृन्तफलयोर्मध्ये गृह्णीयात् । कीदृक्, सुसमाहितः तद्गतमनाः । वृन्तम् (ഞെട്ട്) विस्रावणानि विस्रावणकार्याणि आदावदनशरार्यास्यादीनि शस्त्राणि । वृन्ताग्रे वृन्तप्रान्ते नातिमूल इति यावत् । तर्जन्यङ्गुष्ठाभ्यां गृह्णीयात् । वृन्तस्यामं मध्ये निकटम् । तलेत्यादि । गृह्णीयादित्यनुवर्तते । तलशब्देन पाणितलमुच्यते । आदिलोपाल्लयया तन्त्रयुक्त्या तलेन पाणितलेन प्रच्छन्नं प्रच्छादितं वृन्ताग्रं यस्य तत् तथोक्तं व्रीहिमुखं मुखे गृह्णीयात् । आहरणार्थानि चलिशादीनि वृन्तमूलेषु गृह्णीयात् । अपरं शेषं शस्त्रं क्रियासौकर्येण गृह्णीयात् । सुकरस्य भावः सौकर्यम् । यथा सुकरा पाटनादिका क्रिया तत्तथाऽऽदीत्यर्थः ॥ ३०–३२ ॥

शस्त्रकोशमाह —

स्यान्नवांगुलविस्तारः सुघनो द्वादशाङ्गुलः ।
क्षौमपत्रोर्णकौशेयदुकूलमृदुचर्मजः ॥ ३३ ॥
विन्यस्तपाशसुस्यूतः सान्तरोर्णान्वयत्रकः ।
शलाकापिहितास्यश्च शस्त्रकोशः सुसञ्चयः ॥ ३४ ॥

स्यादित्यादि । नवाङ्गुलविस्तारः शस्त्रकोशः स्यात् । तथा सुघनो निबिडः । द्वादशाङ्गुलो दैर्घ्येण । तथा क्षौमादिजः । क्षौमम् (ചണത്തുണി) पत्रम् (പട്ടുതുണി) ऊर्णा (ചെമ്മരിരോമം) कौशेयम् (കൊക്കൂൺനൂൽ) दुकूलम् (ഉത്തമം) मृदुचर्म (നേർത്തതോൽ) तथा विन्यस्तः कृतः पाशो यस्य स विन्यस्तपाशः विधिनिर्दिष्टपाश इत्यर्थः । सुस्यूतः सूत्रादिभिः साधु सीव्यः । सान्तरोर्णान्वयत्रकः सान्तराणि मध्यवानानि तथा ऊर्णामयानि वस्त्राणि यस्मिन् स तथा । अन्तरान्तरा रोमभि-

आमं लक्षणमाह—

[1] शुद्धाम्बुसम्भवाः ॥ ३७ ॥

निर्विषाः शैवलश्यावाः वृत्ताः नीलोऽर्वराजयः ।
कषायपृष्ठास्तन्वङ्गयः किञ्चित्पीतोदराश्च याः ॥ ३८ ॥

शुद्धाम्बित्यादि । जलौकस इति वर्तते । शुद्धाम्बुसम्भवाः शुद्ध-जलसम्भवा. सौगन्धिकोत्पलकमलविपुलसलिलशेवलगाः जलौकसो निर्विषाः स्यु । शैवलश्यावा शैवलमिव श्यावा । तथा वृत्ताः तथा नीलोर्ध्वराजय' तथा कषायपृष्ठाः न्यग्रोधादिवल्कलसदृशं पृष्ठं यासां ताः एवम् । पाठ्य-क्रमोऽपि—"कषायपृष्ठा रक्तपृष्ठा" इत्याह । तथा तनुशरीरा किञ्चित्पीतवर्ण-जठराश्च निर्विषा वेद्याः । सर्वासां च परं प्रमाणमष्टावङ्गुलानि । तत्र चतु-र्थ्यष्ठाङ्गुला नृषु योजयेत् । गजवाजिष्वपरा' । ता निर्विषा अपि जलौकसो रक्तमत्ता इति त्यजेत् । न केवलं सविषा इति प्रतिपादनार्थोऽपिशब्दः ॥ [३७,३८ ॥

[2] रक्तमत्तत्वे हेतुद्वयमाह—

ता अप्यसम्यग्वमनात् प्रततञ्च निपातनात् ।

असम्यग्[1]वमनात् पीतस्य दुष्टरक्तस्यासम्यग्वमनेन प्रततं च निपा तनात् सततं रक्तपानाच्च भोजनेन दुष्टरक्तवासितत्वेन रक्तमत्ता भवन्ति ।

तासां कथं लक्षणमित्याह

सीदन्तीः सलिलं प्राप्य रक्तमत्ता इति त्यजेत् ॥ ३९ ॥
अथेतराः निशाकल्कयुक्तेऽग्नौ सि च संप्लुताः ।
अन्तिसोमे तक्रे वा पुनश्चाश्वासिता जले ॥ ४० ॥
लगयेत् घृतमृत्स्नान्यरक्तशबलपदाङ्गनैः ।
पिबन्तीरनवस्कन्धाः छादयेदार्द्रवाससा ॥ ४१ ॥

सीदन्तीः सलिलं प्राप्येति । तास्तोयपूर्णबुग्मनासाश्च सीदन्तीर्न यथापूर्वं चेष्टमाना रक्तमत्ता इति ज्ञात्वा त्यजेत् । अथेत्यादि । अथैव परीक्षा-नन्तर इतरा रक्तमल्लक्षणविहीना निर्विषा लगयेत् । किम्भूताः, निशाकल्कयुक्ते जले संप्लुताः क्षिप्ता काथिके वा अग्ने नक्रे वा क्षिप्ता । पुनः संप्लवनान्मु-क्तपुरीषा. सतृष्णाश्च भवन्ति । निशायुक्तजलादिमज्जनार्थं पुनर्नक्रे मुक्तः । तस्मादाश्वासिताः शान्तगुणे जले स्नपनात् सोत्साहा सतीर्योजयेत् ।

---

१ 'वीक्ष्य' इतिपाठान्तरदर्शनम्

अन्यान्तीः कथं लगेदित्याह । घृतादिनिपातेनस्ता योजयेत् । निपातनशब्दः प्रत्येकं योज्यः । दंशनेशुद्धयर्थं मृद्ग्रहणम् । आशुदहनार्थं घृतसन्निपातनम् । शस्त्रेणाशस्त्रमिरं मोक्षयित्वा वा ता योजयेत् । ताश्च पिबन्तीः सूक्ष्मवाससा छादयेत् । एवं हि मक्षिकाद्युपद्रवात् तासां सम्यग् योजना स्यात् । अथ किमेताः पिबन्त्युत नेति कथं ज्ञायत इति विशेषणद्वारेण हेतुमाह — उन्नतस्कन्धा इति उन्नतः स्कन्धो यासां ताः । एवमुन्नतस्कन्धत्वेन तासु पानं ज्ञात्वेत्यर्थः । 'सेचयेत्पाम्भसाद्यार्द्रं आर्द्रवाससा' इति वा पाठः ॥

[॥ ३९—४१ ॥

ननु दुष्टरक्तदुष्टरक्तयोर्मिश्रणात् शुद्धरक्तमपि विदूषते । ततः शुद्धरक्तग्रहणार्थं जलौकसां दोषाद ग्रहणमाह—

सम्पृक्तादूदुष्टशुद्धाभ्यां जलूका दुष्टशोणितम् ।
आदत्ते प्रथमं हंसः क्षीरं क्षीरोदकादिव ॥ ४२ ॥
दंशस्य तोदे कण्डूयां वा मोक्षयेत्, वामयेच्च ताम् ।

सम्पृक्तादित्यादि । दुष्टशुद्धाभ्यामिश्रितादपि दुष्टं रक्तं जलूकाः पूर्वमादत्ते न तु शुद्धं देहधातुस्थितमिति दृष्टान्तेन दर्शयति । हंसो यथा क्षीरजलमिश्रितात् प्राग्दुग्धमादत्ते न जलं तथा जलूकाः प्रागशुद्धं रक्तमादत्त इति जलूकाजातिस्वभावः । हंसवज्जलौकसः प्राग् दुष्टमसृक् पिबन्तीत्यर्थः । प्रथममिति दुष्टशोणितासावे पश्चात् शुद्धमपि पिबन्तीति न्याय्यमेतत् ।

"रक्तपा तु जलूकाया स्त्रियां भवति जलौकसः ।"

इति वचनात् जलौका इत्यपपाठः । पाठ्यकारोऽपि— "प्रथममिति वचनात् पुनरन्यदपि गृह्णातीत्यर्थः" इत्याह । दंशस्य तोदे सति कण्डूयां वा सत्यां शुद्धरक्तरक्षणार्थं अस्त्रियोगमयाच्च । वामयेत्येकवचननिर्देशादेकां जलूकां मोक्षयेत् अपनयेत् । न तु सर्वाः सहदेवेति गमयति । ता इति केषाञ्चित् पाठः । अथ पानलौक्यादू दशमसृजन्त्याः क्षौद्रकवणचूर्णं हरिद्राचूर्णं वा मुखे दत्वा मोक्षयेत् । मोक्षितां च जलौकसं वामयेत् ॥ ४२ ॥

वमनविधानमाह—

पटुतैलाक्तवदनां श्लक्ष्णखण्डनलोपिताम् ॥ ४३ ॥
रक्षन् रक्तमदान् भूयः पयसा तां न पाययेत् ।
पूर्ववत् पटुता दाढ्यं सम्यग्वान्ते जलौकसाम् ॥ ४४ ॥

क्लमोऽतियोगान्मृत्युर्वा दुर्बान्ते स्तब्धता मदः ॥ ४५ ॥

अन्यत्रान्यत्र ताः स्थाप्या घटे मृत्स्नाम्बुगार्भिणि ।

वामयेदित्यादि । तण्डुलखण्डनं तण्डुलत्वक्चूर्णम् । श्लक्ष्णेन सूक्ष्मेण तण्डुलखण्डनेन रूषितामुपदिग्धगात्रामवकीर्णामित्यर्थः । तण्डुलशब्दस्यात्र कोपलक्षणयुक्तया । तथा सैन्धवयुक्तेन तैलेनाभ्यक्तमुखीं पुच्छादामुखमनुलोमं घर्षयन् अपनीतां वामयेत् । जलौकामोक्षणादनन्तरं व्याधेश्चिकित्सामनुकृत्य जलौकसां वमनविधानवचनं कालातिक्रमात् तासां व्याध्युत्पत्तिप्रदर्शनार्थम् । उक्तं च भालुकीये —

"अवान्तायामधिरं तिष्ठेत् याव(त्मर्भोऽत्र)क्तं विमुंचते ।
तस्याश्चन्द्रमदो व्याधिरसाध्या सा जलायुका ॥"

इति । ताः कृतवमना जलौकसो रक्तमदात् रक्षन् सप्ताहं न योजयेत । जलौकसां सम्यग्रक्ते वान्ते सति पूर्ववदलगितानामिव पटुता दार्ढ्यं च भवति । अतियोगाद् वमनस्यातियोगात् क्लमो मृत्युर्वा स्यात । दुर्बान्ते स्तब्धता मदश्च स्यात् । ताश्च जलौकसस्त्र्यहात् पञ्चाहात् सप्ताहाद् वा अन्यस्मिन्नन्यस्मिन् घटे स्थाप्याः । किंभूते, मृत्स्नाप्लुतेन जलेन गर्भिणि तण्डुले इत्यर्थः । प्रशस्ता मृत् मृत्स्ना । "सस्नौ प्रशंसायाम्" (५.४.४०) इति स्नप्रत्ययः । जलौकसां प्रशस्ता मृत् स्वजन्मभूमिस्था । उक्तं च भालुकीये—

"वापीपल्वलजातानां तटाकेषु सरस्सु च ।
तत एव च गृह्णीयाद् वैद्यो वारि सकर्दमम् ॥" इति ।

लालादिकोथनाशार्थं सविषास्युस्तदन्वयात् ॥ ४६ ॥

अनेकभाजनस्थापनेन कोऽर्थ इत्याह— लालादिकोथनाशार्थमिति । आदिशब्देन मूत्रपुरीषादिपरिग्रहः । लालादीनां जलौकःसम्बन्धिनां कोथः पूतित्वं क्लिन्नता तन्नाशाय । "कोथो मृतजलौकसां शरीरम्" इति हाटकः । तदन्वयात् लालादियोगात् ताः सविषाः स्युः ।

अशुद्धौ स्रावयेद्दंशात् हरिद्रागुडमाक्षिकैः ।
शतधौताज्यपिचवस्ततो लेपाश्च शीतलाः ॥ ४७ ॥

दुष्टरक्तापगमनात् सद्यो रोगहरा श्रमः ।

अशुद्धं चलितं स्थानात् सितं रक्तं व्रणाशये ॥ ४८ ॥
व्यम्लीभवेत् पर्युषितं तस्मात्तत्स्रावयेत् पुनः ।
युञ्ज्यान्नालाबुघटिका रक्ते पित्तेन दूषिते ॥ ४९ ॥
तासामनलसंयोगाद्युञ्ज्याच्च कफावुना ।
कफेन दुष्टं रुधिरं न शूलेन निरीरयेत् ॥ ५० ॥
रूक्षत्वात्, वातपित्ताभ्यां दुष्टं शूलेन निर्हरेत् ।
मात्रं बध्वोपरि दृढं रज्ज्वा पट्टेन वा समम् ॥ ५१ ॥
स्नायुसन्ध्यस्थिमर्माणि त्यजन् प्रच्छानमाचरेत् ।
अधोदेशप्रविस्तृतैः पदैरुपरिगामिभिः ॥ ५२ ॥
न गाढघनतिर्यग्भिर्न पदे पदमाचरन् ।
प्रच्छानेनैकदेशस्थ ग्रथितं जलजन्मभिः ॥ ५३ ॥
हरेच्छृङ्गादिभिः सुप्तमसृग्व्यापि सिराव्यधः ।
प्रच्छान पिण्डिवे वा स्यादवगाढं जलोत्सः ॥ ५४ ॥
स्वस्थेऽथानुघटीशृङ्गं, सिरेव व्यापदोऽन्यथा ।

अशुद्धं अशुद्धिलिङ्गान्वितं रक्तं नखे दृश्यमाने सति तत् स्रावयेत् दंशात् हरिद्रादिभिः । ततो रक्तमुत्पान्तर गतौ राज्यादिचयः स्यात् तैस्तृप्त-संपृक्ताः पिचवो योज्या तिरोप । शतधौतेऽतिस्वर्थाय । बहुशो धौत मित्यर्थः । तथा घीमला लेपाश्च यष्टीचन्दनोशीरादिना हिताः । योज्या इति शान्वय । दशस्थितचलितरक्तमग्रदनायेति भावः । दुष्टरक्तस्यापगमात् निःसरणात् सद्यो द्रागेव रागस्तनां शमः स्यात् । रागस्तच्छम इत्युभयत्रापि । अयमुदाहृतोपशमोऽपि हि स्यादेव । तत्र घृतपरिषेकः कार्यः । धन्वन्तरीयाः पुनराहुः— "पीतमात्रमनन्तर घृतपरिषेक कार्यः । अग्न्यत्वात् प्रसादनत्वाच्च ।" क्षेमकश्चात्र—"पीतमात्र जलूकाभि घृतेन परिषेचयेत्" इति । अशुद्धं निर्गतशिष्ट स्वस्थानाच्चलितं गमनोन्मुख अग्रस्थाने स्थितं रक्तं व्यम्लीभवेत् पाकोन्मुखं भवेत् यतस्तेनात् तत् रक्तं मूयः स्रावयेत् । व्यम्लीभूत पित्तवृषितं स्वभावमधुर-मम्लं प्रभावहम् । रक्ते पित्तेन दूषिते सति अलाबुघटिका न योजयेत् । तासा-मलाबूनां घटिकाना चाग्नेः संयोगात् पित्तरक्तापचेरिति भावः । ताच्च कफवायुना

दुष्टेऽस्रजि युञ्ज्यात् । फेफेन दुष्टं रक्तं शृङ्गेण नार्कयेत् । स्कन्नत्वात् स्थानत्वाद् हेतो । शृङ्गस्याग्नियोगाभावेन स्फोटविलयनसामर्थ्याभावात् प्रतिषेधः । वातपित्ताभ्यां दुष्टं रुधिरं शृङ्गेण निर्हरेत् । गात्रं प्रच्छानीयप्रदेशं रज्ज्वा पट्टेन वाससा वा दृढं समं यथा उपरि प्रच्छानीयप्रदेशस्य तथा स्नायवादि परिहरन् प्रच्छानं कुर्यात् । कथं, अधोदेशात् प्रविस्तृतैः प्रसृतैः पदैरुपरिगामिभिरूर्ध्व-मसारिभिः ऊर्ध्वगतपदाद्रक्तस्रवणैरधोभागो न दृश्यत इति । किं भूते पदे, न गाढे न घनैः न निरन्तरैः न च स्निग्धैर्न तिरश्चीनैः तथा न पदे पद्माचरन् पदस्योपरि पदमकुर्वन्नित्यर्थः । एकदेशे स्थितं रक्तं प्रच्छानेनाकर्षेत् । ग्रथितं पद्ममिवोन्नतं मन्थ्यर्बुदगण्डशोफादिषु रक्तं जलजन्तुभिर्जलौकोभिर्हरेत् । सुप्तं निश्चेतनं सत् प्रसुप्त्यादिविकारकारि शृङ्गादिभिर्हरेत् । हारीतोऽपि— "सहज प्रसुप्तं वातदूषितमविकारकारि रक्तं शृङ्गादिभिर्हरेत्" इत्याह । व्यापि सकल-शरीरव्यापि सर्वशरीरस्थितं सिराव्यधैरा कर्षेत् । गात्रप्रदेशे पिण्डिते ग्रन्थिजनके रक्ते प्रच्छानं वा स्यात् । अगाढे रक्ते जलौकसः स्युः । त्वक्स्थे उत्ताने रक्तेऽलाबुघटीशृङ्गाणि स्युः । सर्वशरीरव्यापके रक्ते सिरैव स्यात् । सिरासा मतभेदो नास्तीत्येवशब्दार्थः ॥

वातादिधाम वा शृङ्गजलाकोऽलाबुभिः क्रमात् ॥ ५५ ॥

सुतासृजः प्रदेहाद्यैः शीतैः स्याद्वायुकोपतः ।
सतोदकण्डूशोफस्तं सर्पिषोष्णेन सेचयेत् ॥ ५६ ॥

वातादीत्यादि । अथवा वातादिस्थानस्थितं रक्तं यथाक्रमं शृङ्गादिभि-र्हरेत् । हारीतोऽपि — "वातधाम्न्यधः काये शृङ्गेण, पित्तधाम्नि मध्यकाये जलौकाभिः, कफधाम्नि पूर्वकायेऽलाबुना क्रमान्निर्हरेत्" इत्याह ॥

सुतरक्तस्य नरस्य शीतले प्रदेहादिभिस्तोदकण्डूयुतः शोफो वातकोपात् स्यात् । तं तादृशं शोफमुष्णेन सर्पिषा सेचयेत् ॥ ५६ ॥

अथ सप्तविंशोऽध्यायः ।

प्रसङ्गे शोणितस्रावे सिरावेधोऽभ्यणीयत ।
अतस्तद्विधिसिध्यर्थमतोऽध्याय उच्यते ॥

अरुणदत्तोऽप्याह—"अनन्तरं तेऽध्याये रक्तादीन् लोहितावसेचनोपायानुक्त्वा" "प्रच्छानेनैकदेशस्थम्" इत्यादिवाक्येन तेषां विषयो दर्शितः । सिराव्यधस्य तु बहुवक्तव्यत्वात् पृथगध्यायो शुरू" इति । हारीतोऽप्याह— "रक्तावसेचनोपायेषु सिराव्यध उक्तः । तस्य बहुवक्तव्यत्वात् पृथगध्यारम्भः प्रधानत्वाच्च । वचनं हि—

'रक्तावसेचनसाध्येष्वामयेषु सिराव्यध प्रधानम् ।'

इमुना हि ते समूला 'शोषमुपयान्ति केदारसेतुभेदेन जलक्षयाच्छाल्यादय इव ।

"सिराव्यधविधिर्विद्वन्नार्थे सम्पूर्ण वा चिकित्सितम् ।
शल्यतन्त्रे स्मृता यद्वद् वस्तिःकायचिकित्सिते ॥
यथा रक्तमधिष्ठानं विकाराणां विकारिणाम् ।
अन्यं नहि तथा दुष्यं हर्मेद प्रथम तत ॥" इति ॥

अथातः सिराव्यधविधिमध्यायं व्याख्यास्यामः ।

अथात इत्यादि । सन्त्यामी रक्तमिति सिराः, तासां व्यधसद्विधिस्तमध्यायं व्याख्यास्याम ।

एतं किमुच्यत इत्याह —

मधुरं लवणं किञ्चिदुष्णशीतोष्णमग्रहम् ।
पद्मेन्द्रगोपहेमाभिशशलोहितलोहितम् ॥ १ ॥
लोहितं ग्रसदच्छुद्धं ननोस्तेनैव च स्थितिः ।
तत्पित्तश्लेष्मलैः प्रायः दूष्यते कुरुते ततः ॥ २ ॥
सिसर्पविद्रधिप्लीहगुल्मास्रिमदनज्वरान् ।
मुखनेत्रशिरोरोगमदवृद्धलक्षणास्यताः ॥ ३ ॥
वृष्ठनातासपिपासातद्वत्म्लोदुर्गतिरणश्रमान् ।

मधुरमित्यादि । अथवा न साध्य शोणित शुद्धमिति शुद्धस्य लक्षणं माह । शुद्धस्य विज्ञानाद्विशुद्ध न ज्ञायते । लोहितं मधुरादिगुणयुक्तं तथा किञ्चिल्लवणम् । किञ्चिच्छब्द ईषदर्थे, ईषल्लवणम् । लवणशब्देनैव

किञ्चित्पदस्यान्वयः । तथा अशीतोष्णम् । नर्मपदयेः । ईषच्छीतमीषदुष्णं च । शीतोष्णगुणसाधारणमित्यर्थः । असंहतं द्रवरूपम् । इन्द्रगोपः कीटविशेषः । अविशदयोर्लोहितशब्देन रक्तवाचिना सम्बन्धः । पद्मादीनां द्वन्द्वः । पद्मेन्द्रगोपहेमाविशदलोहितामिव लोहितं रक्तवर्णं यद्रक्तं तच्छुद्धं स्यात् । पद्मादिनैकदृष्टान्तोपादानं प्रकृत्यनुविधायित्वेनोक्त्य शुद्धरक्तस्यानेकवर्णदर्शनात् । हरदत्तोऽपि — "पद्मादिरूपदार्ढ्यवर्णेन प्रकृत्यनुसारेण लौहित्यस्य विशेषसिद्ध्यर्थम्" इत्याह । तच्च तनोः शरीरस्य प्रभव उत्पत्तिहेतुः । शोणितस्यौजोवाग्दस्य गर्भकर्मणत्वात तेनैव च रक्तेन शरीरस्य स्थितिः । प्रबन्धाविच्छेदलक्षणा उत्पत्तिः स्थितिश्च तनो शोणितादित्यर्थः । 'शोणित प्रवदेत' इति वा पाठः । तच्च शुद्धरक्तं वातेन पित्तश्लेष्मभ्यां दूष्यते । पित्तं पित्तलैः कारोष्णतादिभिः श्लेष्मणः श्लेष्मलैः मापतिलादिभिः दूष्यते । प्रायोग्रहणाद् कालस्वभावाद्धावनादिभिश्चेत्यर्थः । ततो दूषणात् कारणात् विसर्पादीन् आमान्वान् जुस्ते ॥ १-३ ॥

रक्तजानां विसर्पादीनतिरिक्तानां रोगाणामवगमायाह —

शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ॥ ४ ॥
सम्यक् साध्या न सिध्यन्ति ते हि रक्तप्रकोपजाः ।
तेषु स्रावयितुं रक्तमुद्रिक्तं व्यधयेत्सिराम् ॥ ५ ॥

शीतोष्णेत्यादि । वातादिशमकैः शीतोष्णादिभिः सम्यगुपक्रान्ताः सम्यक् चिकित्सिताः साध्या अपि साध्यलक्षणयुक्ता अपि रोगा ये न सिध्यन्ति शान्ति न यान्ति ते च रोगा रक्तप्रकोपजाः रक्तप्रकोपोद्भूताः । न केवलं विसर्पादय इति चार्थः । आदिशब्देन कुष्ठस्वेदादिपरिग्रहः । ननु शीतोष्णादीनां मध्ये गुरुस्निग्धादयः किमिति नोक्ताः । उच्यते, तेषां षण्णामप्युपक्रमाणामेषु चतुर्ष्वन्तर्भावात् । किञ्च तेषां नैकविषयाभावत्वाद् । गुरु श्लेष्मशमाय भवति; कदाचित् कोपाय । यथा मधु वाराहं मांसं तथा स्निग्धं चित्रकं शमाय, आज दधि कोपाय । शीतादयस्तु नियतकार्या एवेति ग्रहणम् । तेषु विसर्पादिषु रोगेषूक्तेषु उद्रिक्तमुल्बणं रक्तं स्रावयितुं सिरां व्यधयेत् यथास्वम् । हरदत्तस्तु 'व्यधयेत्' इति पठति । अदन्त्वत्वाद् वृद्धेरभावः ॥ ५ ॥

किञ्चित्पदस्यान्वय । तथा अशीतोष्णम् । नञोभयत्र । ईषच्छीतमीषदुष्णं च । शीतोष्णगुणसाधारणमित्यर्थ । असंहत द्रवरूपम् । इन्द्रगोपः कीटविशेष । आविशब्दयोर्लोहितशब्देन रक्तवाहिना सम्बन्ध । पद्मादीनां द्वन्द्व । पद्मेन्द्रगोपहेमाविशलोहितानिव लोहित रक्तवर्ण यद्रक्त तच्छुद्धं स्यात् । पद्मादयेनेकदृष्टान्तोपादान प्रकृत्यनुविधायिनोऽस्य शुद्धरक्तस्यानेकवर्णदर्शनात् । इयावाशेऽपि — "पद्मादिवदुपदर्शितवर्णेन प्रकृत्यनुसारेण शोणितस्य विशेषसिद्ध्यर्थम्" इत्याह । तच्च तनौ शरीरस्य गर्भ उत्पत्तिहेतुः । शोणितस्यानेवाश्रयत्व गर्भकारणत्वात् तेनैव च रक्तेन शरीरस्य स्थिति । प्रबन्धाविच्छेदलक्षणा उत्पत्ति स्थितिश्च तनौ शोणितादित्यर्थ । 'लोहित प्रवर्तेत' इति वा पाठ । तच्च शुद्धरक्त बाहुल्येन, पित्तश्लेष्मलैः दूष्यते । पित्तले क्षारोष्णताक्षणादिभि श्लेष्मले मापतिलादिभि दूष्यते । प्रायोग्रहणात् कालस्वभावादवगादिनिश्चेत्यर्थ । ततो दूषणात् कारणात विसर्पादान् त्रयोदशान् क्षुद्रते ॥ १-३ ॥

रक्तजानां विसर्पाद्यतिरिक्तानां रोगाणामवगमायाह —

शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः ॥ ४ ॥

सम्यक् साध्या न सिध्यन्ति ते हि रक्तप्रकोपजाः ।
तेषु स्रावयितुं रक्तमुद्रिक्तं व्यधयेत्सिराम् ॥ ५ ॥

शीतोष्णेत्यादि । यातादिशमनै शीतोष्णादिभिः सम्यगुपक्रान्ताः सम्यक् चिकित्सिता साध्या अपि साध्यलक्षणयुक्ता अपि रोगा ये न सिध्यन्ति शान्ति न यान्ति ते च रोगा रक्तप्रकोपजाः रक्तप्रकोपोद्भूता । न केवल विसर्पादय इति चार्थ । आदिशब्देन रागमण्डलादिपरिग्रहः । ननु शीतोष्णादीना मध्ये गुरुस्निग्धादय किमिति नोक्ता । उच्यते, तेषां पण्णामप्युपक्रमाणामेषु चतुर्ष्वन्तर्भावात् । किञ्च तेषां नवविषयागावबत्वाद् । गुरु श्लेष्मशमाय भवति, कदाचित् कोपाय । यथा मधु घृतात् मेदस तथा स्निग्धु चिक्कणाय, आम दधि कोपाय । यातादयस्तु नियतकार्या एवेति महणम् । तेषु विसर्पादिषु रोगपूरुषेषु उद्रिक्तमुल्बण रक्तं स्रावयितुं सिरां व्यधयेत् यथास्वम् । अरुणदत्तस्तु 'व्यधयेत्' इति पठति । अदन्तत्वाद् वृद्धेरभाव ॥ ५ ॥

इन्द्रबस्तिर्नाड्यन्तरे वक्ष्यमाणः । सक्थ्यतौ सक्थिपीडायां गुल्फस्योर्ध्वं चतुरङ्गुले अतिक्रान्ते विध्येत् । *कोष्टुकशीर्षिको जानुमध्ये वातरोगः । पाददाहादिषु क्षिप्रमर्मणः उपरिष्टाद् व्यङ्गुले सिरां विध्येत् । खुडं वात-शोणितम् । 'उपरि क्षिप्रमर्मण' इति तत्र मर्मगुणाद्युपरीति सामीप्ये सप्तमी योज्या । यथा वटे गावः सुशेरते' इति केचित् । घृतदग्धस्नेहो नाराधयति । शास्त्रमोक्षकरणाद् दोषो न सम्भवति । यथा वस्तिभेदोऽश्मरीहेतुः सिद्धि यातीति तथात्रापि व्यङ्गुले विद्धे दोषो नेति प्रत्यक्षमेतत् । विश्वर्म्यां गृध्र-स्यामिव सिरा विध्येत । गृध्रस्या जानुनोऽधस्तादूर्ध्वं वा चतुरङ्गुल इतिचत् । विश्वर्म्यां कूर्परस्याधस्तादूर्ध्वं वा चतुरङ्गुले सिरा विध्येदित्यर्थः । एतेन बाहू व्याख्यातौ । विशेषस्तु प्लीहोदरे वामबाहुमध्ये विध्येत् । यकृदाख्ये दक्षिण-बाहुमध्ये विध्येत् । कासश्वासयोरपि बाहुसिरामादिशन्ति । यथोक्तानां सिराणामदर्शने सति मर्मवर्जिते यथासन्ने देशे व्याधिवशादपरां सिरां विध्येत् । हारीतोऽप्याह — "यथोक्तानां सिराणामदर्शने यस्मिन् व्याधौ या सिरोक्ता सा यदि न दृश्यते तदा अन्यव्याध्युक्तापि तत्सिकटे व्यथनीया" इति ॥ १३—१७ ॥

अथ स्निग्धतनुः सज्जसर्वोपकरणो बली ॥ १८ ॥
कृतस्वस्त्ययनः स्निग्धरसान्नप्रतिभोजितः ।
अभितापतपस्विन्नो जानूत्तासनसंस्थितः ॥ १९ ॥
मृदुपट्टान्तकेशान्तो जानुस्थापितकूर्परः ।
मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्ये गाढं निपीडयेत् ॥ २० ॥
दन्तप्रपीडनोत्कासगंडाभ्यानानि चाचरेत् ।
पृष्ठतो यन्त्रयेच्चैनं वस्त्रमावेष्टयन्नरः ॥ २१ ॥
कन्धरायां परिक्षिप्य न्यस्यान्तर्भ्रमतर्जनीम् ।
एषोऽन्तर्मुखवर्जानां सिराणां यन्त्रणे विधिः ॥ २२ ॥

अथेति मङ्गले आनन्तर्ये वा । स्निग्धा तनुर्यस्य सः स्निग्धतनुः । तथा सज्जानि सगुणानि उपकरणानि पिचुस्रोतोवस्त्रसूत्रवेणिकागारधूमलवणक्षौम-मयीव्यजनघृततैलदार्वीतोदकघटाहोष्णोदकघटाहपीठशयनादीनि यस्य सः सज्ज-सर्वोपकरणः । तथा बली पुष्टः । तथा कृतं स्वस्त्ययनं बलिमङ्गलहोमादिकं

* कोष्टुकशीर्षिके च विशेषेण गुल्फस्योर्ध्वं चतुरङ्गुले विध्येत् ।

पीनसे प्रतिश्याये नासाललाटयोः स्थितां सिरां विध्येत् । मुखरोगेषु जिह्वादिगाः 'सिरा विध्येत् । ऊर्ध्वं वे ग्रन्थयस्तेषु ग्रीवाद्याश्रिताः सिरा विध्येत् । उन्मादे उरःस्था अपाङ्गस्था ललाटाश्रिताश्च विध्येत् । अपस्मारे तु हनुसन्धौ सिरां विध्येत् । समस्ते वेति — सर्वस्मिन् वा हनौ सिरां विध्येत् । सिरां भ्रूमध्यगामिनीमिति भ्रूमध्यस्थां वापस्मृतौ विध्येदिति । वाशब्दोऽत्रानुवर्त्य योज्यः । अथवा 'सर्वतोऽर्धाङ्गव्याधौ भ्रूमध्यगामिनीम्' इति केचित् पठन्ति ॥ ९—१२ ॥

विद्रधौ पार्श्वशूले च पार्श्वकक्षास्तनान्तरे ।
तृतीयकेऽसयोर्मध्ये स्कन्धसाधश्चतुर्थके ॥ १३ ॥
प्रवाहिकायां शूलिन्यां श्रोणितो व्यङ्गुले स्थिताम् ।
शुक्रमेढ्रामये मेढ्रे ऊरुगाङ्गलगण्डयोः ॥ १४ ॥
गृध्रस्यां जानुनोऽधस्तादूर्ध्वं वा चतुरङ्गुले ।
इन्द्रवस्तेरधोऽपच्यां व्यङ्गुले चतुरङ्गुले ॥ १५ ॥
ऊर्ध्वं गुल्फस्य सक्थ्यस्तौ तथा क्रोष्टुकशीर्षके ।
पाददाहे खुडे हर्षे विपाद्यां वातकण्टके ॥ १६ ॥
क्षिप्ते च व्यङ्गुले विध्येदुपरि क्षिप्रमर्मणः ।
गृध्रस्यामिव विश्वच्यां यथोक्तानामदर्शने ॥ १७ ॥
मर्महीने यथासन्ने देशेऽन्यां व्यधयेत्सिराम् ।

विद्रधौ पार्श्वशूले च पार्श्वस्यां कक्षस्या स्तनान्तरस्थाश्च सिरा विध्येत् । "नात्र यथासङ्ख्यं पार्श्वकक्ष्यास्तनान्तरान्तर" इति अम्मदुगुरवः । 'पार्श्वे कक्षस्तनयोरन्तरस्थाम्' इति सौश्रुते । 'तृतीयके ऊर्ध्वे असयोर्मध्ये असस्थौ स्थितां सिरा विध्येत' इति अरुणदत्तः । 'असस्थाम्' इति हृदयाकारः । चतुर्थके ज्वरे स्कन्धस्याधोगतामन्यतरपार्श्वाश्रयां सिरा विध्येत् । प्रवाहिकायां श्रोणितः कट्याः समन्ताद् व्यङ्गुले स्थिता सिरां विध्येत् । शुक्ररोगे मेढ्ररोगे च मेढ्रे स्थिता सिरा विध्येत् । गलगण्डयोश्चोभयोरूर्ध्वस्थितां विध्येत् । गलस्य पार्श्वापेक्षया द्विवचनम् । गृध्रस्यां जानुनोऽधस्ताच्चतुरङ्गुले अतिक्रान्ते स्थिता सिरां विध्येत् । जानुन ऊर्ध्वं वा चतुरङ्गुले स्थिताम् । अपच्यीसंज्ञाया इन्द्रवस्तेरधो व्यङ्गुले स्थितां सिरा विध्येत् ।

इन्द्रनास्तिर्नेच्छान्तरे वक्ष्यमाण । सक्थ्यतो सक्थिपीडाया गुल्फस्योर्ध्वं चतुरङ्गुले अतिक्रान्ते विध्येत् । *कोष्टुकशीर्षिणो जानुमध्ये वातरोग । वातदाहादिषु क्षिप्रमर्मण उपरिष्टाद् व्यङ्गुले सिरा विध्येत् । सुखं वात-शोणितम् । 'उपरि क्षिप्रमर्मण' इति तत्र मर्मसङ्घातादुपरीति सामीप्ये सप्तमी योज्या । यथा वटे गावः सुरेरते' इति केचित् । 'तदसम्मतो नाराधयति । शास्त्रमोक्षकरणाद् दोषो न सम्भवति । यथा वस्तिभेदोऽश्मरीहेतु सिद्धि यातीति तथात्रापि व्यङ्गुले विद्धे दोषो नेति प्रत्यक्षमेतत् । विश्वम्या गृध्र स्यामिव सिरा विध्येत । गृध्रस्या जानुनोऽधस्तादूर्ध्वं वा चतुरङ्गुल इतिवत् । विश्वम्या कूर्परस्याधस्तादूर्ध्वं वा चतुरङ्गुले सिरा विध्येदित्यर्थः । एतेन बाहू व्याख्यातौ । विशेषस्तु हृल्लोहिते वामबाहुमध्ये विध्येत् । यकृदाख्ये दक्षिण-बाहुमध्ये विध्येत् । कासश्वासयोरपि बाहुसिरामादिशन्ति । यथोक्तानां सिराणामदर्शने सति मर्मवर्जिते यथासन्ने देशे व्याधिवशादपरा सिरा विध्येत् । डाटकोऽप्याह — "यथोक्ताना सिराणामदर्शने यस्मिन् व्याधौ या सिरोक्ता सा यदि न दृश्यते तदा अन्यव्याधुक्तापि तन्निकटे व्यधनीया" इति ॥ १३—१७ ॥

अथ स्निग्धतनुः सज्जसर्वोपकरणो बली ॥ १८ ॥
कृतस्वस्त्ययनः स्निग्धरसान्नप्रतिभोजितः ।
अभितापातपस्विन्नो जानूच्चासनसंस्थितः ॥ १९ ॥
मृदुपट्टान्तरक्षेत्रान्तो जानुन्यापितकूर्परं ।
मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्ये गाढं निपीडयेत् ॥ २० ॥
दन्तप्रपीडनोत्कासगंडाध्मानानि चाचरेत् ।
पृष्ठतो यन्त्रयेच्चैनं वस्त्रमावेष्टयन्नरः ॥ २१ ॥
कन्धरायां परिक्षिप्य न्यस्यान्तर्मर्मवर्जनीषु ।
एषोऽन्तर्मुखवर्जानां सिराणां यन्त्रणे विधिः ॥ २२ ॥

अथेति मङ्गले आनन्तर्ये वा । स्निग्धा तनुर्यस्य स स्निग्धतनुः । सज्जानि प्रगुणानि उपकरणानि पिचुपोतवस्त्रमूत्रवेणिकागारधूमलवणक्षौम-वर्षोव्यजनघृततैलशीतोदकक्वाथोष्णोदकस्नानपीठशयनादीनि यस्य स सज्ज-सर्वोपकरणः । तथा बली पुष्ट । तथा कृत स्वस्त्ययन बलिमङ्गलहोमादिक

* कापुकशीर्षिक च विशेषेण गुल्फस्योर्ध्वं चतुरङ्गुले विध्येत् ।

यस्य स कृतस्नेहस्नेयनः । तथा व्याधिबलसात्म्याद्यपेक्षया स्निग्धरसयुक्तेनान्नेन प्रतिभोजितः । प्रतिभोजनमिति क्रियामुद्दिश्य भोजनम् । अथवा स्निग्धरसान्नप्रतीति पृथक्पदम् । "सुप्तिङन्तं मात्रार्थे" (२-१-९) इत्यव्ययीभावसमासः । स्निग्धरसान्नं मात्रया भोजित इत्यर्थः । अग्नितापश्वातपश्च ताभ्यां स्विन्नः । तथा जानुतुल्यमुच्चमासनं तत्र संस्थितः । तथा मृदुना सूक्ष्मपट्टेनाचो गृहीतः केशान्तो यस्य स एवम् । तथा जानुनि स्थापितः कूर्परः येन स एवं तथा । आतुरो मुष्टिभ्यां वस्त्रगर्भाभ्यां मन्ये अतिशयेन पीडयेत् । दक्षिणेन मुष्टिना दक्षिणा मन्यां वामेन वामा पीडयेत् । तथा दन्तमर्दनाद्याचरेत् । धन्यश्च नरः पुरुष एनमातुरं पृष्ठतः पृष्ठदेशे आतुरग्रीवायां वस्त्रमावेष्टयन् यन्त्रयेत् । कथं—आतुरग्रीवायां वस्त्रं परिक्षिप्य तथा अन्तर्मध्ये वामतर्जनीं न्यस्य आतुरकृकाटिकाया वस्त्रस्य च मध्ये आत्मीयां प्रदेशिनीमङ्गुलिं कृत्वा यन्त्रयेदित्यर्थः । अन्तर्मुखवर्जानां सिराणां यन्त्रणेऽप विधिरतद् विधानं प्रकार इत्यर्थः । अन्तर्मुखं जिह्वादन्तोविवर्ज्यनामित्यपपाठः । यन्त्रणप्रयोजनं सिराव्यधः शोणितस्य सुखागमनं च । उक्तं च—"तत्र वेध्यसिरं पुरुषं प्रत्याङ्मित्यमुखमूरलिमाग्रोच्छ्रिते निवेश्यासने सव्यग्रीवकुञ्चितयोर्निवेशितयोर्परसन्निरुद्धयस्य उभयहस्तावन्तर्गूढाङ्गुष्ठौ कृत्वमुष्टी मन्ययोः स्थापयित्वा वस्त्रशाटकेन ग्रीवागुष्ठौ परिक्षिप्यान्येन पश्चात् स्थितेन पुरुषेण वामहस्तमदिशिगीमन्तरीकृत्य दक्षिणहस्तेन शाटकमुखान्तं आकृष्य तत्तो वैद्यो ग्रीवात् सिरोत्पत्तनार्थं सरलतारणार्थं च ग्रीवेन पीडयेति । कर्मपुरुषमातुरं च मुखे वासं धारयित्वा रक्षयेति । एष उक्तमाङ्गगतानां मुखवर्जानां सिराणां वेध यन्त्रविधिः", इत्यादि ॥ १८—२२ ॥

ततो मध्यमयाङ्गुल्या नखोऽङ्गुष्ठविमुक्तया ।
ताडयेदुत्थितां ज्ञात्वा पर्वाङ्गुष्ठप्रपीडनैः ॥ २३ ॥
धृतार्या रक्षयेन्मध्ये वामहस्तगृहीतया ।
फलोद्देशे सुनिष्कम्पं सिरां तद्वच्च मोक्षयेत् ॥ २४ ॥
ताडयन्पीडयेच्चैनां विध्येद्वीहिमुखेन तु ।
अङ्गुष्ठेनोन्नम्याग्रे नासिकामुपकासिकाम् ॥ २५ ॥
ततो यन्त्रणाकर्मणं वैद्योऽङ्गुष्ठविमुक्तया अङ्गुष्ठविधृतया मध्यमाङ्गुल्या ताडयेत् । स्पर्शेन चाङ्गुष्ठपीडनेनोत्थितां ज्ञात्वा ऊर्ध्वदण्डया सिरया

मध्ये न्यस्य वामहस्तेन गृहीतया कुठार्या सिरा लक्षयेत् । हाढकोऽप्याह—"सम्यगुत्थिता सिरा स्पर्शनात् किञ्चिदुत्थितामङ्गुष्ठोदरनिर्मार्जनैर्गूढवद्दलत्व-कच्छतामुन्नमितां ज्ञात्वा वामहस्तेनोर्ध्वदण्ड गृहीत्वा कुठार्या मध्ये सिरा लक्षयेत्" इति । तद्यथ मोक्षयेद् यथव लक्षयेत् तथैवैना लक्षिता सिरा मध्यमाङ्गुल्या ताडयेत् । अङ्गुष्ठोदरेण वा निर्मार्जयेदिति अङ्गुष्ठेन । नासिका-मग्रे उन्नमय्य उपनासिका सिरा व्रीहिमुखेन विध्येत् । अरुणदत्तस्त्वा-ह—"तद्यथ मोक्षयेत् यथैव लक्षयेत् तथैवार्थ" इति । ताडयेदित्यादि । व्रीहिमुखेन पुनस्ताडयन् व्यथमन् तथाकुठादिना पीडयन् एना कुठारिकाविषया सिरा विध्येत् । नन्, कुठारिकाविषय कर्म व्रीहिवक्त्रस्य प्रयोग । यत "अप, मात्रविषय परिहृत्योत्सर्गो प्रवर्तन्ते" इति न्याय । व्रीहिवक्त्रस्य सामान्ये । प्रयोगोऽनुज्ञात । तथा चाह—

'व्रीहिवक्त्र प्रयोज्य च तत्सिरोद्रव्योर्व्यधे' ॥ इति ॥

कुठार्या पुन विशेषोऽभिहित । "तयोर्ध्वदण्डया विध्येदुपर्यन्यां सिरा सिराम्" इति । तस्मादयुक्तमेतत् । अत्रोच्यते ज्ञापकम् । 'कुठारिका-विषये व्रीहिवक्त्रस्य प्रयोगो न्याय्य एव । यदयमाचार्यो वक्ष्यति—

"मासले निक्षिपेद् देशे व्रीद्यास्य व्रीहिमात्रकम्" ॥ इति ॥

अनेन हि वचनेन अन्यकार इद प्रत्यपादयत् । चतुमास शरीरावयवे व्रीहि-मुख व्रीहिमात्र निक्षेप्यम् । अन्यत्र ज्ञापकानुरोधेन व्रीहिवक्त्रस्य प्रयोग कार्य इति । अनेनैवाभिप्रायेण शास्त्रकृता 'प्रमाणपरिमाणाभ्या सङ्ख्यायाश्चापि सशये । मात्रच् वक्तव्य:' इत्यनेन मानकमिति ज्ञानम् । अन्यथा स्पष्ट कृत्वा 'व्रीहिप्रमाण व्रीद्यास्य मासले निक्षिपेद् व्यधे' इति पाठ कुर्यात् । तस्माद् युक्तमुक्त व्रीहिमुख कुठारिकाविषयेऽपि प्रयोक्तव्यम्' इति । अन्ये त्वेव वदन्ति—"कुठार्या वेधप्रकारे प्रोच्यमाने लाघविक सत् अन्यकारो व्रीहि-मुखवेधप्रकारमपि प्रोक्तवान् इति । अङ्गुष्ठेत्यादि । अग्रे नासिकां अग्रे नासिका । "सप्तमी—" (२-१-४०) इति योगविभागात् समास । "अग्रविषयां नासिकामङ्गुष्ठेनोन्नमय्य ततो व्रीहिमुखेन उपनासिका नासिकासमदेशस्थां सिरां विध्येत्" इत्यरुणदत्तोक्ति ॥ २३—२५ ॥

तथा स्थिते सतीत्येतावदेवात्र सङ्कल्प्यम् । अत्रास्मद्गुरवस्त्वेवमाहुः— 'पाषाणगर्भहस्तस्य पुरुषस्य भुजे कुक्षेरारभ्य मृदिते बद्धोर्ध्वपट्टके सिरां विध्येत् । अत्र भुजशब्देन कूर्परमनुमीयते । कुक्षेरारभ्य मृदित इति प्रोक्तत्वात् । अतो वक्ष्यति सूत्रकारः प्लीहोदरे— "वामबाहौ तु मोक्तव्या कूर्पराभ्यन्तरे सिराम्" इति । विध्येद्धस्तसिरामित्यादिना मणिबन्धादिसिरायन्त्रणाविधिरिति । जङ्घा-सिराभ्यामित्यादिना बध्वा विध्येत् सिरामित्यन्तेन जङ्घासिरायन्त्रणविधिः' इति । इत्थमनेन प्रकारेण यन्त्रलक्षणोद्देशेनानुक्तमपि यन्त्रं तदुद्देशमाहात्म्यात् क्रिया-सौकर्यार्थं तेषु तेषु अनुक्तेषु प्रपदादिषु प्रदेशेषु शरीरावयवेषु स्वबुद्ध्या तत्तद् यन्त्रं यन्त्रणां यथायोगं कल्पयेत् । उपायज्ञो वैद्यः । प्रदेशानुसारेण यन्त्र-येदित्यर्थः । कुत्रचिदूर्ध्वबन्धनं कुत्रचिदधोबन्धनं कुत्रचिदुचितस्थाने बन्धन कुत्रचिच्चतुरङ्गुले कुत्रचिद् वितमनं कुत्रचिदायमनं इत्यादि । आकुञ्चनप्रसारणावयोऽप्येवमेव परिकल्पनीयाः । सर्वथोभयत्र बन्धनं क्वचिदपि न दृष्टपूर्वं श्रुतपूर्वं च । यत्त्वरुणदत्तहृद्याकाराभ्यां प्रोक्तं, तद् बुधैश्चिन्त्यम् ॥ २८—३२ ॥

प्रदेशविशेषेण शस्त्रविशेषेणोपयोगं दर्शयति—

मांसले निक्षिपेद्देशे व्रीह्यास्यं व्रीहिमात्रकम् ।
यवार्धमस्थ्नामुपरि सिरां विध्यन्कुठारिकाम् ॥ ३३ ॥

मांसल इत्यादि । मांसले शरीरावयवे व्रीहिमुखं शस्त्रं व्रीहिप्रमाणं निक्षिपेत् । अस्थ्नामुपरि यवार्धमात्रं कुठारिकां निक्षिपेत् । किं कुर्वन् सिरां विध्यन् ।

'यवार्धमस्थ्नामुपरि सिरां विध्येत् कुठारया' ।

इति वा पाठः । यवार्धमात्रमस्थ्नामुपरि सिरां कुठारिकया विध्येत् । सर्वत्र चानुच्चानमनवगाढमृज्यसङ्कीर्णं मर्माण्यनुपघाति सर्वसिरामध्ये शस्त्रमाशु पातयेत् ॥

सम्यग् योगादिलक्षणमाह —

सम्यग्विद्धा स्रवेद्धारां यन्त्रे मुक्ते तु न स्रवेत् ।
अल्पकालं वहत्यल्पं दुर्विद्धा तैलचूर्णनैः ॥ ३४ ॥

सशब्दमतिविद्धा तु स्रवेद् दुःखेन धार्यते ।
भीमूर्छायन्त्रशैथिल्यहृष्टत्वखलनिग्रहैः ॥ ३५ ॥

क्षामत्वेगितास्रेदा रक्तस्यासृतिहेतव' ।

सम्यग् विद्धेत्यादि । सम्यग् विद्धा सिरा धारां स्रवेत् । यन्त्रे मुक्ते सति न स्रवेत् । 'सम्यग्विद्धे स्रोद्धाराम्' इति वा पाठ । 'सम्यग् विद्धे सति धारा स्रवेत्' इत्यरुणदत्तः । अल्पं विद्धा सती सिरा स्रोकफाल वहति । अल्पं विद्धे सतीति वा । दुर्विद्धा असम्यग्विद्धा सिरा तैलयुक्तैश्चूर्णनैः चूर्णनिक्षेपे स्रवेत् । 'दुर्विद्धा तैलचूर्णेन्रक्तफालमल्प वहति' इत्येके । दुर्वेधास्तु बहुशो जायन्ते । वैद्यदोषाद्यन्त्रदोषादातुरदोषाद् मन्त्रदोषात् काश्यदोषाच्च । तत्र प्रतीकार उक्त । उक्त च वाग्भटेन—

"अदेशे वा सिरा विद्धा स्त्रस्ता वा मारुतेन या ।
शस्त्रेण वाणुना विद्धा विद्धा वाप्यप्रमाणत ॥
मासावृता या सूक्ष्मा वा मच्छन्ना वापि मेदसा ।
अतिबद्धाप्यबद्धा वा सिरा रक्त न मुञ्चति ॥
अदेशविद्धा विज्ञाय देशं निध्येत्सिरा भिषक् ।
विद्धा सूक्ष्मेण शस्त्रेण प्रमाणस्थेन वेधयेत् ॥
अप्रमाणेन या विद्धा ता प्रमाणेन वेधयेत् ।
मासावृतायां शस्त्रेण वेधान्मासं विनिर्हरेत् ॥
सूक्ष्मा विद्धा तु विज्ञाय विध्येत् स्थूलतरा भिषक् ।
ज्ञात्वा तु मेदसा मच्छन्नां स्रवणेनानुसारयेत् ॥
अतिविद्धां प्रतिथिरा कुर्यादेवमसृक् स्रवेत् ।
युक्त्या त्वबद्धा नद्धीयात् तथा स्रवति शोणितम् ॥"

इति । अतिविद्धा तु सिरा सम्यक् स्रवेत् । दुःखेन कृच्छ्रेण धार्यते । भीमूर्च्छादयो रक्तस्रावणहेतव रक्तस्रावना । मूर्च्छा मोहस्तमश्चैव प्रवेश । यन्त्रणाधैर्य्यमगाढ कृत्वा यन्त्रणम् । तथा कुण्ठशस्त्रम् । तथा अतिवृद्धि रतिसौहित्यमतिमात्राशितत्वमित्यर्थ । क्षामत्वं दुर्बलत्वम् । वेगिता सञ्जात-वेगत्वम् । 'मूत्रितोच्चाशितत्व वेगित्वम्' इति हाराणचन्द्र । अस्वेदः स्वेदायोग । सम्यग् विद्धेऽप्येते रुधिरस्यासृतिहेतव. । ततो रक्तस्रावेन परिहार्या ॥

पूर्वोक्त तैलचूर्णमाह

असम्यग्विद्धे स्रवति चेच्छ्यो पनिशान्तः ॥ ३६ ॥

मागारधूमलवणैर्न्निर्घातिनगमुग्रयुक् ।
सम्यक्प्रवृत्ते दोषेण नेत्रेन स्रावेण च ॥ ३७ ॥

असम्यगस्र इत्यादि । असम्यगस्रे स्रवति विस्रादिभि सिरावदन दिशात् प्रलेपयेत् अवगुण्ठेत् । न मारु नरति । सम्यक् प्रवृत्तेऽपि रक्ते रक्तानिलोपशमनरक्तविस्रावणार्थं स्निग्धरूक्षोष्णाभ्यां लवणाभ्यां दिशात् । उष्णस्वभावत्वान्निर्हृतं सिरामुखं सिद्धेदित्यर्थः ॥ ७ ॥

अग्रे स्रवति दुष्टास्र कुसुम्भादिव पीतिका ।
सम्यक्प्रवृत्य स्वयं तिष्ठेच्छुद्धं तदिति नाहरेत् ॥ ३८ ॥

यन्त्रं विमुच्य मुक्तेऽग्रे व्यजनैर्वीजिते पुनः ।
स्रावयेन्मूर्छति पुनस्त्वपरेद्युरथेऽपि वा ॥ ३९ ॥

अग्र इत्यादि । दुष्टादुष्टरक्तादेकलोहितीभूतादग्रे प्रथमं दुष्टास्र स्रवति कुसुम्भादिव पीतिका यथा रागपीतिकामिश्रीभूतात् कुसुम्भादग्रे पीतिका स्रवति तद्वदिति ।

अग्रमङ्गणात् पश्चाद्दुष्टमपि रक्तं स्रवतीत्याह—

सम्यक् यथावत् प्रवृत्य स्वयं यत्नेन विना तिष्ठेत् न स्रावयेत । शुद्धं सदिति ज्ञात्वा नाहरेत् न स्रावयेत्, जीवितहेतुत्वात् । सम्यग् रक्ते स्रवति मूर्च्छायां सत्यां यन्त्रं विमुच्य व्यजनैर्वीजिते समाश्वस्ते नरे सति पुनरस्रं स्रावयेत् । पुनरपि मूर्च्छत्यास्रावे सत्यशुद्धमपि रक्तं तस्मिन्नहनि न स्रावयेत । तर्हि कदा स्रावयेदित्याह । अपरेद्युरन्यस्मिन् दिने व्यहेऽपि वा तृतीयेऽहि वा स्रावयेत् ॥ ३८, ३९ ॥

वाताच्छ्यावारुणं रूक्षं वेगस्राव्यच्छफेनिलम् ।
पित्तात्पीताभितं तिक्तमस्कन्दौष्ण्यात्सचन्द्रकम् ॥ ४० ॥

कफात्स्निग्धमसृक्पाण्डु तंतुमत्पिच्छिलं घनम् ।
संसृष्टलिङ्गं सर्गात् त्रिदोषं मलिनाविलम् ॥ ४१ ॥

वातादित्यादि । वातात् रक्तं श्यावादिलक्षणं स्यात् । अस्कन्दि नष्टस्थानम् । उष्णत्वात् सचन्द्रकं च । चन्द्रकं वर्णम् । कफात् स्निग्धादि

क्षुब्धं रक्तं स्यात् । ससर्गाद् दोषाणां संसृष्टलक्षणं स्यात् । त्रिदोषं रक्तं मलिनं कलुषम् । तथा आविलमन्तर्धनम् । अनेन दोषत्रयसंसर्गाधिक्यादधिक लक्षणं मन्तव्यम् । न स्वेतावदेव त्रिदोषलक्षणम् ॥ ४०–४१ ॥

यदुक्तं सुश्रुतेन तावल्लक्षणं यथा वै –

अशुद्धो बलिनोऽप्यसृङ् न प्रस्थान्मात्रयेत्परम् ।
अतिस्रुतौ हि मृत्युः स्याद् दारुणा वा चलामयाः ॥ ४२ ॥
तत्राऽभ्यङ्गसृगीरक्तपानानि भेषजम् ।
क्षुते रक्ते शनैर्यन्त्रमपनीय हिमाम्बुना ॥ ४३ ॥
प्रक्षाल्य तैलस्रोताक्तं बन्धनीयं सिरामुखम् ।
अशुद्धं स्रावयेद् भूयः सायमह्नयपरेऽपि वा ॥ ४४ ॥
स्नेहोपस्कृतदेहस्य पक्षाद्वा भृशदूषितम् ।

अशुद्धमित्यादि । अशुद्धमसृं बलवतोऽपि हि पुनर्बलिनः प्रस्थात् परमधिकं न स्रावयेत् । कस्मादित्याह—अतिस्रावे हि रक्तस्य मृत्युः स्यात् । दारुणाः कृच्छ्रा वातरोगा अपतानकाद्याः स्युः । तत्र रक्तातिस्रुतावभ्यङ्गादीनि भेषजम् । प्रस्थात् परमिति सार्धत्रयोदशपलं प्रस्थं बोध्यम् । रुधिरे प्रस्थशब्दो न षोडशपलवाचकः । उक्तं च तन्त्रान्तरे—

"वमने च विरेके च तथा शोणितमोक्षणे ।
सार्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः" ॥ इति ॥

क्षुते रक्ते सति यन्त्रं शनैर्मन्दं सहसा अपनीय विमुच्य सिरामुखं शीतोदकेन प्रक्षाल्य तैलप्लोतं तैलयुक्तं चेलखण्डेन तेनाक्तं पश्चात् बन्धनीयं बध्नीयात् । प्लोतः(Cotton) अशुद्धं शुद्धं वा वातादिदुष्टरुधिरलक्षणैर्दुष्टं ज्ञात्वा भूयः पुनः स्रावयेत् । कदा, सायमपराह्णे तस्मिन्नेव दिने अथवा अपरेऽह्नि वा द्वितीयेऽहनि । अथवा स्नेहेनोपस्कृतो भावितो देहो यस्य तस्य । भृशं दूषितमतिशयेन क्षुद्र पक्षादूर्ध्वं पुनः स्रावयेत्' ॥ ४२–४४ ॥

किञ्चिदिशेषे दुष्टासृङ् नैव रोगोऽतिवर्तते ॥ ४५ ॥
सशेषमप्यतो धार्यं नात्यातिसृतिमाचरेत् ।

"किञ्चिदित्यादि । अरुणदत्तोऽपि– "किञ्चिच्छेषं दुष्ट रक्तं स्थापयेदुत सर्वं स्रावयेदिति संशयापनोदायेदमाह" इत्याह । हि यस्मात् किञ्चिच्छेषे दुष्टरक्ते नैव रोगो दुष्टरक्तोद्भवो व्याधिरतिवर्तते क्रियापथमतिक्रम्य मार्गान्तरमसौ नायाति अतो दुष्टमपि रक्तं सशेषं धार्यम् । नात्य रक्तस्रातिसृतिमाचरेत् प्राणायतनत्वात् । सौश्रुतेऽप्यध्यगीष्ट—

"सशेषं दुष्टरुधिरमपि कुर्याद् विचक्षणः ।
न चातिप्रसृतिं कुर्याच्छेषं संयमनैर्जयेत् " ॥ इति ॥

अथ किञ्चिच्छेष रक्तमुपेक्षणीयं उत प्रतिक्रिया तत्र कान्वित् कार्येत्याह—

हरेच्छृङ्गादिभिः शेषं प्रसादमथवा नयेत् ॥ ४६ ॥
शीतोपचारपिचासक्रियाशुद्धिविशोषणैः ।
दुष्टं रक्तमनुद्रिक्तमेवमेव प्रसादयेत् ॥ ४७ ॥
रक्ते त्वधिष्ठिते क्षिप्रं स्तंभनीमाचरेत्क्रियाम् ।

हरेदित्यादि । स्रुतशेषं दुष्टरक्तं किञ्चित्कालेऽतीते शृङ्गालाबुघटिकादिभिः हरेत् न तु सिरया । अथवा शीतोपचारेण पिचासृक्क्रियया शुध्या च । "(शुध्या)वमनविरेचनरूपया" 'वमनादिरूपया' इत्यरुणदत्तः । विशोषणेन रूक्षनरूपेण तद् दुष्टं रुधिरं प्रसादं नयेत् । कल्पितामपसृज्य तस्य प्रसन्नमुपपादयेत् । विधिदुष्टे रक्ते एवं कार्यम् । मृदुदुष्टे क्षिप्ते रक्ते मासमात्रं स्नेहादिभिरुपचर्यं पुनश्च विध्येत् । पूर्वमेव बहु वा,साध्यमाशुदरक्तदर्शनात् । आगमो हि—

येत् । यदा वृद्धं रक्तमाश्रित्य दुष्टिं विकारं च कुर्वन्ति तदा रक्तस्तम्भनम् । यथास्थिमांसच्छेदं । ननु दुष्टरक्तस्य स्रवणं क्रियते तदानिलकोपो मावी । उच्यते । अतिमात्रोद्रिक्तं रक्तमन्तरेणावसेकं न शक्यमुच्छेत्तुम् । तनो न जात्वामाधानिवृत्ति । तदवसेकात् क्षपितं पवनोऽन्येनोपक्रमेण शक्यं परिहर्तुमिति । न तु केवलं स्रुतशेषं दुष्टरुधिरं शीतोपचारादिभिः प्रसादयेत् । यद्वदनुद्रिक्तमप्रवृद्धमपि दुष्टं रुधिरमेवमनेनैव शीतोपचारादिना प्रसादयेत् । न तु तत्सिराव्यधादिना निर्हरेत् । अनुद्रिक्तरक्तनिर्हरणस्य सापायत्वात् । रक्ते त्वतिष्ठति स्थितिमरुममाने त्वरितमेव स्तम्भनी वक्ष्यमाणां क्रियामाचरेत् कुर्यात । रक्तस्य प्रायतनत्वात् ॥

तदेव स्तम्भनमाह

लोध्रप्रियङ्गुपत्तङ्गमार्पयष्ट्याह्वगैरिकैः ॥ ४८ ॥
मृत्कपालाजनक्षौममधूच्छीरित्वगुत्पलैः ।
विचूर्णयेद्व्रणमुखं पद्मकादि हिमं पिबेत् ॥ ४९ ॥
तामेव वा शिरां विध्येदधस्तात्तस्मादनन्तरम् ।
सिरामुखं च त्वरितं दहेच्चसशलाकया ॥ ५० ॥

लोध्रेत्यादि । लोध्रादिभिः सिराव्रणमुखमवचूर्णयेत । पद्मकादि हिमं शीतकषायं पिबेत् । हारीतोऽपि —"पद्मकादिभिर्मथितं क्षायं पिबेत्" इत्याह । वामेन पाणि विद्धा सिरां तस्मात् प्राच्यनादनन्तरमव्यवहितं विध्येत् । अथवा सिराद्वारं क्षिप्रं छित्त्वा अग्निना तप्तया शलाकया दहेत् । अग्निना दहन् सिरासङ्कोचेन रक्तस्थापनाय ॥ ४८-५० ॥

रक्तस्रावणादनन्तरं यद्विधेयं तदाह —

उन्मार्गगा यंत्रनिपीडनेन
स्वस्थानमायाति पुनर्न यावत् ।
दोषाः प्रदुष्टा रुधिरं प्रपन्ना-
स्तावद्विदाहारविहारभाक् स्यात् ॥ ५१ ॥

उन्मार्गगा इत्यादि । स्वमार्गादन्यमार्गगमनं उन्मार्गगमनं यन्त्रनिपीडनेनोन्मार्गगा स्वमार्गमुल्लङ्घ्य मार्गान्तरगमनेनोत्पथं प्रतिपन्ना दोषाः प्रदुष्टास्तथाविधा रक्तं प्रपन्नाः प्राप्ता पुनर्यावत् स्वस्थानं नायान्ति स्वाश्रय

म प्रतिपद्यन्ते तावद्धिताहारविहारभाक् स्याद् इति सम्बन्धः । हिताहारविहारौ भजते इति 'भजो ण्वि '(३ २-६२) इति ण्वि ॥ ५१ ॥

हिताहार वक्ति—

नात्युष्णशीतं लघु दीपनीयं
रक्तेऽपनीते हितमन्नपानम् ।
तदा शरीरं ह्यनवस्थितासृ-
मग्निर्विशेषादिति रक्षणीयः ॥ ५२ ॥

रक्तेऽपनीते स्राविते ऽन्नपान नात्युष्णशीतं हितम् । अत्युष्ण अन्नपान रक्त प्रदूषयेत् । अतिशीत स्वन्नपानमग्निं सादयेत् । तथा लघु स्वभावतो मात्रया सस्कारादिना वा । हारीतस्त्वाह—"रक्तेऽपनीतेऽत्युष्णमन्नमतिशीत च पानं न हितम् । कुत इयमाशङ्का । उच्यते, आगमात् 'उष्णमश्नीयात्' इति ।

'यदाहारगुणै पान विपरीतम् ।'

इति च । अतोऽस्य विधे प्रासस्य प्रकर्षवत्त्वमपवर्तयति । तथा हि—अत्युष्णत्वाद्याहारस्य स्वस्थानाच्चलित रक्त दुष्टि यायात् । किञ्च ऊष्मवतश्च धातोरसृज ऊष्मादग्निमा-द्यमवश्यम्भावि । तस्मादग्निरक्षणार्थं नातिशीत पान लघुदीपनीय चान्नमुपयोजयेत् । अथ रक्तस्य वह्निसाम्य पित्तस्य च रक्षणार्थ-मुष्णमशन शीत च पानमिष्यते । तथा लघुदीपन चेति" इति । कुत एवविध-मन्नपान हितमित्याह । तदेत्यादि । यस्मादस्मिन् काले शरीरमनवस्थित चलितवृत्ति रक्त यस्य तदेवभूत भवति । तथासृक् शरीरस्याधार रक्तस्य च पित्त पित्तस्य च वह्नि । तथा च वक्ष्यति "पित्त वह्नि" इति । तस्माद् विशेषान्महता यत्नेन अग्नि. नात्युष्णशीतादिनाहारेण रक्षितव्य । पण्डित-स्त्वाह—'तदा शरीरमनवस्थितासृक् अग्निर्विशेषादनवस्थित तस्माद् रक्षि-तव्य. पुरुष" इति ॥ ५२ ॥

कुतसिराव्यधस्य पुरुषस्यो मार्गगामिना दोषाणां स्वस्थानप्रतिपत्तौ कालो नावगम्यते न च निहतदुष्टरक्त पुरुषो लक्षण विना ज्ञायत इति द्वयस्यापि परिज्ञानार्थमाह—

प्रसन्नवर्णेन्द्रियमिन्द्रियार्थै-
निश्चेष्टमव्याहतपक्तिवेगम् ।
सुखान्वितं पुष्टिबलोपपन्न
विशुद्धरक्तं पुरुष वदन्ति ॥ ५३ ॥

प्रसन्नेत्यादि । प्रसन्नानि वर्णश्च इन्द्रियाणि च यस्य तं प्रसन्नवर्णेन्द्रियम् । तथा इन्द्रियार्थान् शब्दादीन् स्वभावाभिप्रेतान् इच्छन्तमभिनन्दन्तम् । तथा अव्याहतः पक्तुर्वेगः प्रामर्थ्यं यस्य तम् । तथा सुसंहितसंहतप्रकृतिमापन्नम् । तथा पुष्टिबलाभ्यामुपपन्न एवंविध पुरुष विशुद्धरक्त वदन्त्याचार्याः । शरीरस्य विशुद्धरक्तस्य लक्षणमुक्तं 'मधुर रुचिरम्' इत्यादिना विशुद्धलक्षणमभिहितमिति ॥ ५२ ॥

इति श्रीमत्पण्डितविरचितायां हृदयद्योतिकायां
अष्टाविंशोऽध्यायः ॥

अथ अष्टाविंशोऽध्यायः ।

अथातः शल्याहरणविधिमध्यायं व्याख्यास्यामः ।

पूर्वाध्याये शल्पवर्मस्थ रक्तस्य सकलशरीरव्यापिनोऽपि चिराभ्यधात्वो निर्हरणोपाय उक्त । इदानीं प्रादेशिकस्य लोहादे शल्यस्य लक्षण निर्हरणोपाय च प्रदर्शयितु मध्याधारम्भः । इदमाकारोऽध्याह—

"दुष्टे रक्ते हि तल्लक्ष्य तस्माक्तो हरणे विधि ।
शल्यस्य धारुलन्तादेर्निर्हृतिर्वर्ण्यतेऽधुना ॥"

इति । "दुष्टरक्तस्य लक्ष्यत्वात् तदनन्तर शल्याहरणविधिमाह" इति पाठयकार । शल्य हिंसात्मकम् । उक्त च—

'यत्किंचिद्बाधकर तच्छल्यमिति कथ्यते ।'

इति । 'शल हिंसायाम्' इति धातो निष्पन्न रूप शल्यमिति । अस्माल्लोहमयेष्वेव शल्यव्यवहारोऽत्र प्राचुर्येण निर्दिष्ट । विशसनार्थोत्पन्नवाचोऽस्य । एवमनुश्रूयते हि — "दानवानां विशसनार्थं ब्रह्मणा सृष्ट लोहम्' इति ॥

ऋजुर्वक्रतिर्यगूर्ध्वाध शल्यानां पञ्चधा गतिः ।

वक्रेत्यादि । सुश्रुते चोक्त— "शल आशुगमने" इति धातुरूपस्य शल्यमिति रूप भवति । सर्वशरीराबाधकरमिहोपदिश्यते शल्यमिति । तद् द्विविध शारीरमागन्तु चेति । शारीरा नखदन्तरोमाणि । धातवो मला दोषाश्च । आगन्तु शल्येष्विहाधिकार. लोहवेणुवृक्षशृङ्गास्थिमयेषु लोहेष्वपि दूरानुपवेशाच्छर एवाधिकृत । स द्विविध कर्णवान् कर्णवांश्च । विविधवृक्षपत्रमुखा"

इत्यादि । "वक्रादिभेदभिन्नाना शल्याना पञ्च प्रकारा गतिर्गमनम् । कदाचिच्छल्यानि वक्र कृत्वा तिर्यग्वा ऊर्ध्वं वा अधो वा गच्छन्ति । कदाचिदृजु कृत्वा । एवमुभयथा तिर्यगूर्ध्वाधोभेदेन गमनाच्छल्याना पञ्चधा गति" इत्यरुणदत्तोक्ति । इत्योंकारोऽप्येनमेवार्थं हृदि कृत्य सङ्ग्रहाविरोधेन व्याख्या कर्तुकामः पद्येनाऽऽह—

"तिर्यगूर्ध्वमधश्चेति शल्यानां त्रिविधा गति ।
प्रत्येकमृजुवक्रत्वाद् द्वैविध्यमपि युज्यते ॥
अत शल्यगते पञ्चविधत्वमुपपद्यते ।"

इति । एव प्रोक्ते पोढा गतिर्भवतीति मन्यमानास्त्वन्ये वक्रादिभेदैनैव पञ्चधा गतिं ब्रुवते । विशिष्टस्यावयवै कुटिलीभवन कुटिला गति । ऋजु कृत्वा यत् प्रवेशनं ऋज्वी गति । अन्ये पार्श्वगमन तिर्यग्गति । उत्तमाङ्गाभिमुख ऊर्ध्वा गति । पादाभिमुखा गतिरधोगतिरिति । पाठ्यकारस्त्वाह— "अत्र सङ्ख्याग्रहण परमतनिरासार्थम् । पतमानाता शल्याना पञ्चधा गतिमप्याचक्षते तिर्यगूर्ध्वाध शल्याना गति पञ्चधा वक्रर्जुभेदेन सह' इति । हाटकोऽपि "वक्रादिभेदेन शल्यानां पञ्चप्रकारा गति." इत्याह । वचन हि — "सर्वशल्याना तु शरीरगतानां पञ्चविधो गतिविशेषो भवति । तद्यथा — ऊर्ध्वमधस्तिर्यग्वक्रमृजुरिति । ते तु वेगक्षयात् प्रतिघाता त्वगादिषु अणवस्तुष्वेवावतिष्ठन्ते । धमनिस्रोतोऽस्थिपेशीविवरसन्धिषु शरीरावयवेषु वा' इति । त्रिविधैव गति शल्याना तिर्यगूर्ध्वाधोभेदेन । एव शरीरे त्रिधा गच्छता शल्यानां वक्रमात्मान कृत्वा ऋजु वा कृत्वा गमनं सम्भवतीति उक्त पञ्चधेति । अस्माक तु सर्वथापि व्याख्यायमाने सदोषता प्रतीयत इति मौनमेव शरणमित्यस्मद्गुरवः ।

यदाह स्म वेगमिलाह—

श्यामं शोफरुजावन्त स्रवन्तं शोणित बहु[1]: ॥ १ ॥
अरुग्दुष्टं बुद्बुदवत् पिटकोपचितं व्रणम् ।
मृदुमासं विजानीयादन्तःशल्यं समासतः ॥ २ ॥

श्याममित्यादि । "एवविधं व्रण अन्तःशल्य समासतः सक्षेपेण जानीयात् । श्याम श्यामवर्ण तथा शोफरुजावन्त तथा बहुशोणितं

[1] बहुं इति मुद्रितोऽष्टाङ्गहृदयपाठ

स्रवन्तं तथा अभ्युद्गतमभिमुख्येनोद्गतोष्टम् । हाटकस्तु —'अभ्युन्नतम् इति पठन्ति अभ्युद्गतोष्ठमिति वदन् । तथा बुद्बुदेन तुल्य वर्तत इति बुद्बुदवत् तथा पिटकैरुपचित व्याप्त तथा कोमलमाम च ॥ २ ॥

इति सामान्यलक्षणाधिकृत्य शल्यस्य लक्षणमभिधाय स्वगादिगतस्य शल्यस्य लक्षणा यमाह—

विशेषाच्चर्मगते शल्ये विवर्णः कठिनायतः ।
शोफो भवति मांसस्थे चोषः शोफो विवर्धते ॥ ३ ॥

पीडनाक्षमता पाकः शल्यमार्गो न रोहति ।
पेश्यन्तर्गते मांसप्राप्तिवच्चेष्टायुं विना ॥ ४ ॥

आक्षेपः स्नायुजालस्य सरम्भस्तम्भवेदना ।
स्नायुगे दुर्हरं चैतत् सिराध्मान सिरास्थिते ॥ ५ ॥

स्वकर्मगुणहानिः स्यात्स्रोतसा स्रोतसि स्थिते ।
धमनीस्थेऽनिलो रक्त फेनयुक्तमुदीरयेत् ॥ ६ ॥

निर्याति शब्दवान् स्वाच्च हृल्लासः सान्त्रवेदन ।
सङ्कोचो बलवानास्थिसन्धिप्राप्तेऽस्थिपूर्णता ॥ ७ ॥

नैकरूपा रुजोऽस्थिस्थे शोफस्तद्वच्च सन्धिगे ।
चेष्टानिष्टाश्च भवेदाटोपः कोष्ठसंश्रिते ॥ ८ ॥

आनाहोऽन्नगन्धे मूत्रदर्शने च व्रणानने ।
विद्यान्मर्मगतं शल्य मर्मनिद्रोपलक्षणः ॥ ९ ॥

विशेषादित्यादि । पूर्वोक्त सामान्यलक्षणमन्त शल्यस्य सर्वत्र विधेये । विशेषेण पुनस्त्वग्गते शल्ये शोफो भवति । कीदृश, विवर्णः कठिनो दीर्घश्च । मांसगते शल्ये ओषस्य स्यात् । सर्वाङ्गीणस्तीव्रोऽरतिमान् दाह ओष उच्यते इत्यादु । हाटकस्त्वाह— "मांसगते शल्ये चोष स्यात् । सर्वाङ्गीणस्तीव्रोऽरतिमान् दाहश्चोष" । 'चोषोऽमद्यमानमरम्भेण चूषणमतीति" इति पाठकारः । तथा शोफो विवर्धते तथा पीडनक्षमत्व पाकस्य । शल्यमार्गो न रोहति रोह न याति । येन शल्य प्रविष्ट तत्यानुपसरोहस्वभावत्वात् । पेश्यन्तर्गते शल्ये मांसातुक्त स्वप्न अवयु वर्मविद्या । मांसावयवविशेषो पेशीत्वादिति पेश्यन्तर्गते । पेशी (न लक्षयाऽऽख्यः)

इत्यादि । "वक्रादिभेदभिन्नानां शल्यानां पञ्च प्रकारा गतिर्गमनम् । कदाचिच्छल्यानि वक्रं कृत्वा तिर्यग्वा ऊर्ध्वं वा अधो वा गच्छन्ति । कदाचिदृजु कृत्वा । एवमुभयथा तिर्यगूर्ध्वाधोभेदेन गमनाच्छल्यानां पञ्चधा गतिः" इत्यरुणदत्तोक्तिः । इत्याकारोऽप्येनमेवार्थं हृदि कृत्वा संग्रहाविरोधेन व्याख्यां कर्तुकामः पद्येन प्रोवाच—

"तिर्यगूर्ध्वमधश्चेति शल्यानां त्रिविधा गतिः ।
प्रत्येकमृजुवक्रत्वाद् द्वैविध्यमपि युज्यते ॥
अतः शल्यगतेः पञ्चविधत्वमुपपद्यते ।"

इति । एवं प्रोक्ते पाठा गतिर्भवतीति मन्यमानास्त्वन्ये वक्रादिभेदेन पञ्चधा गतिं ब्रुवते । विशिष्टस्रावयवैः कुटिलीभवनं कुटिला गतिः । ऋजु कृत्वा यत् प्रवेशनं ऋज्वी गतिः । अङ्गे पार्श्वगमनं तिर्यग्गतिः । उत्तमाङ्गाभिमुखं ऊर्ध्वा गतिः । पादाभिमुखा गतिरधोगतिरिति । पाठ्यकारस्त्वाह— "अत्र संख्याग्रहणं परमतनिरासार्थम् । पतनानां शल्यानां पञ्चधा गतिमप्याचक्षते तिर्यगूर्ध्वाधःशल्यानां गतिः पञ्चधा वक्रर्जुभेदेन सह" इति । हाटकोऽपि "वक्रादिभेदेन शल्यानां पञ्चप्रकारा गतिः" इत्याह । वचनं हि— "सर्वशल्यानां तु शरीरगतानां पञ्चविधो गतिविशेषो भवति । तद्यथा— ऊर्ध्वमधस्तिर्यग्वक्रमृजुरिति । ते तु वेगक्षयात् प्रतिघाता त्वगादिषु व्रणवस्तुष्वेवावतिष्ठन्ते । यन्निस्रोतोऽक्षिपेशीयिवरप्रभृतिषु शरीरावयवेषु वा' इति । त्रिविधैव गतिः शल्यानां तिर्यगूर्ध्वाधोभेदेन । एवं शरीरे त्रिधा गच्छतां शल्यानां वक्रमात्मानं कृत्वा ऋजु वा कृत्वा गमनं सम्भवतीति उक्तं पञ्चधेति । अस्माकं तु सर्वथापि व्याख्यायमाने सदोषता प्रतीयत इति मौनमेव शरणमित्यसद्गुरवः ।

यदाह्यं कथं वेद्यमित्याह—

श्यामं शोफं रुजावन्तं स्रवन्तं शोणितं बहुः ॥ १ ॥
अभ्युद्गतं बुद्बुदवत् पिटकोपचितं व्रणम् ।
मृदुमांसं विजानीयादन्तःशल्यं समासतः ॥ २ ॥

श्याममित्यादि । एवंविधं व्रणं अन्तःशल्यं समासतः संक्षेपेण जानीयात् । श्यामं श्यामवर्णं तथा शोफरुजावन्तं तथा बहुशोणितं

बहुः क्वचित् मुद्रितपाठादृदृश्यते ।

स्रवन्तं तथा अभ्युन्नतमभिमुख्येनोन्नतोष्ठम् । हाटकस्तु- -'अभ्युन्नतम्' इति पठन्ति अभ्युन्नतोष्ठमिति वदन् । तथा बुद्बुदेन तुल्यं वर्तत इति बुद्बुदवत् तथा पिटकैरुपचितं व्याप्तं तथा कोमलमांसं च ॥ २ ॥

इति सामान्येनोक्तिवस्य शल्यस्य लक्षणमभिधाय त्वगादिगतस्य शल्यस्य लक्षणान्यभ्याह—

विशेषात्त्वग्गते शल्ये विवर्णः कठिनायतः ।
शोफो भवति मांसस्थे चोषः शोफो विवर्धते ॥ ३ ॥

पीडनाक्षमता पाकः शल्यमार्गो न रोहति ।
पेश्यन्तरगते मांसप्राप्तवच्छ्वयथुं विना ॥ ४ ॥

आक्षेपः स्नायुजालस्य संरम्भस्तम्भवेदनाः ।
स्नायुगे दुर्हरं चैतत् सिराध्मानं सिराश्रिते ॥ ५ ॥

स्वकर्मगुणहानिः स्यात्स्रोतसां स्रोतसि स्थिते ।
धमनीस्थेऽनिलो रक्तं फेनयुक्तमुदीरयेत् ॥ ६ ॥

निर्याति शब्दवान् स्याच्च हृल्लासः साङ्गवेदनः ।
राजयो बलवानास्थिसन्धिप्राप्तेऽस्थिपूर्णता ॥ ७ ॥

नैकरूपा रुजोऽस्थिस्थे शोफस्तद्वच्च सन्धिगे ।
पेशीनिष्पिष्टवद्भेदाटोपः कोष्ठसंश्रिते ॥ ८ ॥

आनाहोऽन्नस्य कुक्षौ च मूत्रदर्शनं च घ्राणानने ।
विद्यान्मर्मगतं शल्यं मर्मविद्योपलक्षणैः ॥ ९ ॥

विशेषादित्यादि । पूर्वोक्तं सामान्यलक्षणमन्तःशल्यस्य सर्वत्र विद्यते । विशेषेण पुनस्त्वग्गते शल्ये शोफो भवति । कीदृशः, विवर्णः कठिनो दीर्घश्च । मांसगते शल्ये ओषश्च स्यात् । सर्वाङ्गीणश्लोषोऽतिमात्रं दाहश्लोष उच्यते इत्यादुः । हाटकस्त्वाह— "मांसगते शल्ये चोषः स्यात् । सर्वाङ्गीणश्लोषोऽतिमात्रं दाहश्लोष" । "चोषोऽन्नमानसंरम्भेण चूषणप्रवृत्तिः" इति पाठकारः । तथा शोफो विवर्धते । तथा पीडनासहत्वं पाकश्च । शल्यमार्गो न रोहति रोहं न याति । येन शल्यं प्रविष्टं तस्यानुपसंरोहस्वभावत्वात् । पेश्यन्तरगते शल्ये मांसगतत्वेऽपि स्रवणं श्वयथुं वर्जयित्वा । मांसावयवविशेषो पेशीत्युच्यते । पेशी (Muscle)

अस्थिपेश्योरन्तरं प्रायशः पेश्यन्तरम् । स्नायुगते शल्ये स्नायुजालस्याक्षेपाद्याः स्युः । स्नायु (ചലനാഡി) । आक्षेप आकर्षणम् । 'संरम्भः क्षोभः' इत्यरुणदत्तः । 'आवेगः' इति हाटकः । 'असह्यवेदना' इति पाठ्यकारः । 'शोफः' इति केचित् । स्तम्भः स्तब्धता (മിനമര്പ്പാലുള്ളത്) वेदना शूलम् । स्रावग इति वा पाठः । 'स्राव उभयस्नायुसंश्लेषो रज्वाकारः (പിണ ഞ്ഞത്) एतच्च स्नावगतं शल्यं दुःखेन निर्हर्तुं शक्यते । सिराश्रिते शल्ये सिराणामाध्मानमानाहः स्यात् । स्रोतोगते शल्ये स्रोतसां नाडीनां स्वकर्मगुणयोर्हानिः स्यात् । यानि रक्तादिवहनादीनि कर्माणि गुणाश्च ये शारीरे वक्ष्यमाणाः तेषां हानिः अथवा यथा कण्ठस्रोतसि स्थिते शल्ये पानान्यवहारनिरोधो जायते । गुणोऽपि यस्तस्य पुष्ट्यादिलक्षणः सोऽप्यस्य हीयते । मूत्रस्रोतोगते शल्ये मूत्रस्याप्रवर्तनमिति तत्कर्महानिः । गुणोऽपि योऽनिर्वेदनत्वादिलक्षणः सोऽप्यस्य हीयते । इत्येवमन्येषां स्वकर्मगुणहानिर्व्याख्येया । पद्यं च—

"यथा कण्ठगते शल्ये पानादीनां निरोधनम् ।
तेन देहस्य पुष्ट्यादिर्गुणो नैवोपजायते ॥
मूत्रस्रोतोगते शल्ये न च मूत्रस्य निर्गमः ।
तदभावाच्च न सुखं लाघवादिश्च नो भवेत् ॥
एवं कर्मगुणौ चिन्त्यौ स्रोतसां स्रोतसि स्थिते ॥"

इति । अथवा स्वकर्मणां गुणहानिः स्वकर्मगुणहानिः । गुण इति संपदपेक्ष इति वामदेवः । हृद्याकारोऽप्येनमेवार्थं प्राह— "स्रोतसि वाय्वादौ शल्यवति स्वकर्मगुणहानिः । स्वीयं कर्म स्वकर्म तस्य कर्मणो गुणः संपत्तिः तस्य कर्मगुणस्य हानिर्नाश । यथापुरं स्वकर्माणि कर्तुं स्रोतांसि न शक्नुवन्तीत्यर्थः" इति । पाठ्यकारोऽपि "स्रोतांसि रसवहा नाड्यः (കുഴൽ)" इत्याह । धमनीस्थे शल्ये वायुर्लोहितं सफेनं प्रेरयेत् । तमा सशब्दो मरुन्निर्याति । हृल्लासश्छर्दिपीडायुक्तः स्यात् । धमन्योऽतिस्थूलाः (കൊഴുത്തനാഡി) हृल्लासम् (ഓക്കാനം കലിക്കൽ) । अस्थिसन्धिप्रासे शल्ये बलवानस्थिसङ्घर्षः क्षोभः स्यात् । अस्थिपूर्णता च । सङ्घर्षः (കുത്തുകൊള്ളൽ) अस्थिस्थे शल्ये नैकरूपा नानाविधा रुजा भ्रमरक्रमृदितपीडितापनुन्नभामाः स्युः शोफश्च । तद्वत् सन्धिगे शरीरसन्धिगते शल्ये अस्थिस्थेन शल्येन तुल्यं लक्षणं भवति । तथा

अस्थिवेष्टाया व्यापारस्य प्रसारणादेर्निश्चिरुपरमश्च भवति । पूर्वमास्थिगतस्य शल्यस्य लक्षणमुक्तम् । अधुना तूक्त शरीरसन्धिगतलक्षणम् । अन्यो हि शरीरसन्धिः । तथा च राजयक्ष्मनिदाने वक्ष्यति— "शरीरसन्धीनाविश्य' इति । कोष्ठसाश्रिते उदरगते शल्ये आटोपः क्षोभः स्यात् । आटोप· (ಪೆಟ್ಟಿಗೆ ಹೊಡೆತ) । तथा आनाहो जठराध्मानम् (ಪೆಟ್ಟಿಗೆ ಹೊಡೆತ) । तथा व्रणमुखे अग्रशकृन्मूत्रदर्शनं स्यात् । स्थानविशेषेण यथासम्भव व्रणमुखे मूत्रादिदर्शनं भवतीत्यर्थः । व्रणाननम् (ಪೆಟ್ಟಿಗೆ ಹೊಡೆತ) । मर्मगत शल्यं मर्मविद्धोपलक्षणार्थत्वात् । मर्मविद्धस्य च लक्षण सङ्ग्रहे कथितम् । यथा—

"देहमसृस्रिर्गुरुता समोहः शीतकामता ।
स्तब्धो मूर्च्छा यमिः श्वासो मर्मविद्धस्य लक्षणम् ॥"

इति ॥ १—९ ॥

यथास्वं च परिस्रावैस्त्वगादिषु विभावयेत् ।
रुह्यते शुद्धदेहानामनुलोमस्थित तु तत् ॥ १० ॥

यथास्वमित्यादि । न केवल सामान्यलक्षणेन ध्यामादिना तथा विशेषलक्षणेन त्वगादिस्थदक्षणेन त्वगादिगत शल्य लक्षयेत । "गायद्यथास्वं परिस्रावैश्च तथारूपैस्त्वगादीनामनुरूपरूपैर्विभावयेत् लक्षयेत् । त्वक्परिस्रावेण त्वक्शल्यस्य मासपरिस्रावेण मासशल्यमित्यादि । सूक्ष्मगतिषु शल्येषु एतान्येव लक्षणान्यविस्पष्टानि भवन्ति । तत् प्राक् निर्दिष्ट शल्य वमनविरेचनादिभि शुद्धदेहाना शुद्धशरीराणा पुसा रुह्यते रोह याति । रुह्यत इति कर्मकर्तरि इति केचित् । तत्त्वयुक्तम् । यत. कर्मस्थभावकाना कर्मक्रियाणा च कर्ता कर्मवद् भवति । न कर्तृस्थभावकाना न च कर्तृस्थक्रियाणामित्युक्तम् । रहिश्च कर्तृस्थक्रिय । तस्माद् रोहतीति रूढ , रूढिवाचरति इति क्यन्तोऽयम् । 'रुह्यत इति रूढ' इति पाठे । रूढाभासोऽय तादात्विकबाधाभावात् । न तु सम्यग् रूढ । तथा च वक्ष्यति दोषकोपेत्यादि । तस्माद् अस्य रूढाभासत्वादेव व्युपचर्युक्ता ॥ १० ॥

दोषकोपाभिघातादिक्षोभाद्भूयोऽपि बाधते ।

दोषेत्यादि । अकुशल्यमसम्यग्मूढत्वात् भूयोऽपि बाधते प्रागबाधमानमपि पुनरापीडा जनयति । पूर्व कृतबाधत्वाद् भूयोग्रहण कुतो हेतोरित्याह—

दोषकोपश्चाभिघातश्च तावादौ येषां तेषां एव तैः क्षोभः सरम्भः तस्माच्चलितं यायते । अभिघातम् (लकुटादिकं)। आदिग्रहणाद् भावनरज्जुनादीनां ग्रहणम् ॥

त्वगादि नष्टं शल्ये मिथ्यारूपत्वाददृश्यता प्राप्ते सति शल्यपरिज्ञानार्थमिदमाह।

हाटकोऽपि—

"त्वगादि नष्टं लक्षणमुक्त प्रदेशापदेशतस्तु न लक्ष्यते तद्विज्ञानार्थं त्वङ्नष्ट इत्यादि [illegible]।

त्वङ्नष्टं यत्र तत्र स्युरभ्यङ्गस्नेहमर्दनैः ॥ ११ ॥
रागरुग्दाहसंरम्भा यत्र चाऽऽज्यं विलीयते ।
आशु शुष्यति लेपो वा तत्स्थानं शल्यवद्वदेत् ॥ १२ ॥
मांसग्रणष्टं संशुष्यन्कर्शनाच्छ्लथता गतम् ।
क्षोभाद्रागादिभिः शल्यं लक्ष्येत्तद्वदेव च ॥ १३ ॥
पेश्यस्थिसन्धिकोष्ठेषु नष्टं, तिर्यक् तु लक्ष्येत् ।
अस्थामभ्यञ्जनस्वेदबन्धपीडनमर्दनैः ॥ १४ ॥
प्रसारणाकुञ्चनतः सन्धिनष्टं तथास्थिवत् ।
नष्टे स्नायुसिरास्रोतोधमनीष्वसमे पथि ॥ १५ ॥
अश्वयुक्तं रथं खण्डचक्रमारोप्य रोगिणम् ।
शीघ्रं नयेत्ततस्तस्य संरम्भाच्छल्यमादिशेत् ॥ १६ ॥
मर्मनष्टं पृथङ्नोक्तं तेषां मांसादिसंश्रयात् ।

त्वगित्यादि । तत्र तेषु त्वगादिनष्टेषु शल्येषु मध्ये त्वङ्नष्टं गूढं शल्यं यत्र प्रदेशे स्यात् तत्र स्थानेऽभ्यङ्गादिभिः रागाद्याः स्युः । रागो लौहित्यम् (ब्यब्क्षुँ)। रुक् शूलम् (ब्ब व्यँ)। संरम्भः क्षोभः । दाहः(ब्यऽ)। यत्र वा घृतं स्थानं शोभितं विलीयते तत् स्थानं शल्यवत् सशल्यं वदेत् । अथवा लेपश्चन्दनादिनां दत्तो यत्रैव शुष्यति तत्स्थानं त्वग्देशं शल्यवज्जानीयात् । 'त्वङ्नष्टे यत्र तत्र स्यु' इति वा पाठः । मांसग्रणष्टमदृश्यता प्राप्तं संशुष्यता यमनविरेचनादिकर्म यत् कर्शनं तेन तस्माच्छ्लथता शिथिलत्वं गतं, क्षोभादनेकप्रकारात् वेदनोत्पात् तथा रागादिभिः रागरुग्दाहसंरम्भे शल्यं लक्ष्येत् । क्षोभादेतोरुद्भूते रागादिभिरिति वा । तद्वदित्यादि । पेश्यादिषु

नष्टं शल्यं तद्वदेव तेन मांसप्रनष्टेन तुल्यं वर्तते । यथा शुष्या कर्शनाच्छ्लथतां गतं क्षोभाद् रागादिभिर्लक्षयेदिति । यस्मिन तु नष्टं शल्यं अस्थ्नाम्न्यजेनादिभिर्लक्ष्येत् । सन्धिनष्टं शल्यं स्नेहस्वेदोपपन्नान् तान् सन्धीन् प्रसारणाकुञ्चनतः रागादिभिस्तथास्थिनष्टशल्यवच्च लक्षयेत् । स्नाय्वादिषु नष्टे शल्ये, असमे पथि विषमे मार्गे रथमारोप्य रोगिणं शल्यवन्तं शीघ्रं नयेत् । अश्वेव स्थानात् स्थानान्तरं प्रापयेत् । किं भूतं रथं, खण्डं चक्रं यस्य तं खण्डचक्रम् । ततस्तस्य प्रदेशस्य संरम्भाद् रथसंभूताच्छल्यमादिशेत् लक्षयेत् । संरम्भ इत्युपलक्षणम् । स्थागदाहैरिति च बोद्धव्यम् । अथवा ततस्तस्य रथस्य संरम्भात् स्थानाचलिते रागादिराविर्भविन शल्यं लक्षयेत् । यथा संरम्भात् स्वयमेव शल्यं निर्याति । मर्मनष्टं शल्यं पृथङ्नामेहितम्, कुतः तेषां मर्मणां मांसादिसंश्रयान्मांसादिरेव प्राङ्निर्दिष्टो यस्मात्संश्रयात् । न तु मांसादिभ्यः पृथङ् मर्माणि भवन्तीत्यर्थः ॥

एवं विशेषेण नष्टशल्यस्य लक्षणमुक्त्वा सामान्येन नष्टशल्यदेशं लक्षयितु माह—

सामान्येन सशल्यं तु क्षोभिण्या क्रियया सरुक् ॥ १७ ॥

सामान्येनेत्यादि । सामान्येन सामान्यलक्षणेन क्षोभिण्या क्रियया संरम्भोत्पादकेन कर्मणा हस्तिस्कन्धाश्वारोहणद्रुतयानलङ्घनप्राणायामादिना सरुक् स्थानं तत् सशल्यं जानीयात् । अनेन कर्मणा स्थानाच्चलिते कोचिन्निर्गते शल्ये रुग् भवतीति तस्य लक्षणत्वम् ॥ १७ ॥

वृत्तं पृथु चतुष्कोणं त्रिपुटं च समासतः ।
अदृश्यशल्यसंस्थानं व्रणाकृत्या विभावयेत् ॥ १८ ॥

वृत्तमित्यादि । समासतः संक्षेपेण वृत्तादिभेदेन चतुर्विधेनादृश्यस्यानुपलभ्यमानस्य शल्यस्य संस्थानमाकृतिं व्रणाकृत्या व्रणसंस्थानेन विभावयेत् अनुमिमीत । 'विधादि'त्यकणदत्तः । वृत्तं वर्तुलम्(२३०) पृथु पार्श्वपरपार्श्वाभ्यां यत् परिच्छिद्यते विस्तीर्णमिति प्रायशोऽर्थः । दाल्हणोऽपि "पृथु विशालम्, व्यश्रमित्यर्थः" इत्याह = (പ്രസ്ഥമാകൃതിയിൽ)। चतुष्कोणं चतुरश्रम् = (നാൽക്കോണാകൃതിയിൽ)। त्रिपुटं त्र्यश्रम् = (മൂലകോണാകൃതിയിൽ)। एवं समासतः संक्षेपेण अदृश्यशल्यसंस्थानं व्रणाकृत्या एतद् व्रणसदृशं शल्यमत्र देहप्रदेशे इममिति जानीयात् ॥ १८ ॥

अधुनैषामाकर्षणोपायमाह —

तेषामाहरणोपायौ प्रतिलोमानुलोमकौ ।
अर्वाचीनपराचीने निर्हरेत्तद्विपर्ययात् ॥ १९ ॥

तेषामित्यादि । तेषामदृश्यानां शल्यानामाकर्षणोपायौ प्रतिलोमानुलोमकौ । प्रतिलोमः शरीरस्यान्तःप्रवेशविपर्ययः । अनुलोमः शरीरस्यान्तःप्रवेशानुगः । प्रतिलोमानुलोमयोर्निर्हरणविषयमाह — अर्वाचीनेत्यादि । तयोः प्रतिलोमानुलोमयोः विपर्ययस्तद्विपर्ययः । तस्मात् तद्विपर्ययादर्वाचीनपराचीने शल्ये निर्हरेत् । अथवा तद्विपर्ययात् तेन विपर्ययेण तेन प्रतिलोमानुलोमेन क्रमेणेत्यर्थः । विपर्ययः क्रमवाची । प्रतिलोममर्वाचीनमानयेत्, अनुलोमं पराचीनमानयेद् इत्यर्थः । हृद्याकारोऽप्येनमेवार्थमतिस्पष्टं कृत्वोक्तवान् । "शरीरे प्रविष्टस्य शल्यस्यादृष्टस्य दृष्टस्य वा पाश्चात्येन मार्गेणाहरणं प्रतिलोमः । मुखाभिमुखमनुलोमः । तयोर्विषयमाह — 'अर्वाचीनपराचीने' इति । अर्वाचीनमनतिप्रविष्टं प्रतिलोमं हरेत् । पराचीनमतिप्रविष्टं अनुलोमं हरेत्" इति । हाटकोऽप्याह — "तेषामदृश्यानां शल्यानामाकर्षणोपायौ द्वौ प्रतिलोमानुलोमकौ । प्रतिलोमः शरीरान्तःप्रवेशविपर्ययः । अनुलोमः शरीरान्तःप्रवेशानुगः । प्रतिलोमानुलोमयोर्निर्हरणोपाययोर्विषयमाह — अर्वाचीनेत्यादि तद्विपर्ययादर्वाचीनपराचीनयोर्विपर्ययात् अर्वाचीनमूर्ध्वगतिशल्यं प्रतिलोममानयेत् । पराचीनमधोगतिशल्यं अनुलोममानयेत्" इति । पाठ्यकारस्त्वाह — 'तेषां शल्यानामाहरणोपायौ द्वौ । प्रतिलोमोऽनुलोमश्च । येन पथा प्रविष्टं तेनैवाहरणं प्रतिलोमः । निर्घात्य शस्त्रेण विशस्य वा अन्यपथाहरणमनुलोमः । एवं सामान्यमुक्त्वा पुनरर्वाचीनेत्यादिना विशेषमाह — अर्वाचीनमधोगतं ऊर्ध्वं नयेत् आहरेत् । पराचीनमूर्ध्वगतमधोमार्गेणैवाहरेदित्यर्थः । अर्वाचीनमनुलोमं समीपस्थितं प्रतिलोममाहरेत् । पराचीनं प्रतिलोमं दूरतः स्थितमुत्तुण्डितमनुलोममाहरेत् । अर्वाचीनपराचीनौ प्रतिलोमानुलोमपर्यायौ । प्रतिलोमानुलोमे शल्ये विपर्ययान्निर्हरेदिति पिण्डितार्थः" । अन्ये पुनरन्यथा वदन्ति — "तेषामित्यादिना चकर्जुभेदसंयुक्तानामाहरणमुक्त्वा, पुनरर्वाचीनेत्यादिना ऊर्ध्वाधोभेदसंयुक्तानां चोक्त्वा, सुखाहार्यमित्यादिना तिर्यगतस्याप्युक्तवान्" इति । तदयुक्तम् । समानतन्त्रविरोधात् । एवमुक्तं सौश्रुते — 'सर्वशल्यानां तु शरीर-

गतानां द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च । तत्र प्रतिलोममर्वाचीनमानयेत् अनुलोमं पराचीनम्' इति । अस्य व्याख्यानमेवमूचिवान् वामदेवः । "आहरणहेतू आहरणमार्गाविति यर्थः । तत्र प्रतिलोममिति — तत्र तयोः प्रतिलोमानुलोमहर्तव्ययोः प्रतिलोमं प्रतिलोमाहरणीयं शल्यमर्वाचीनमानयेत् । एवमर्वाचीनानयनं प्रतिलोमोपायः । अनुलोमाहरणीयं शल्यं पराचीनमानयेत् । एवं पराचीनमानयनं अनुलोमोपायः" इति । उक्तं च भालुकिना— "द्वावेव तु शल्यानयनमार्गौ भवतः । तद्यथा— अनुलोमः प्रतिलोमश्च । तत्र प्रतिलोमोऽर्वाचीनमाहरणम् । अनुलोमः पराचीनम्" इति । इन्दुनाप्ययमर्थः प्रत्यपादि । "प्रतिलोमं यद्यतः प्रविष्टं तेनैवानीयते । अनुलोमं यद्यतः प्रविष्टं ततः प्रवेश्य द्वितीयेन ह्रियते । तत्र अर्वाचीनं यच्छल्य तत् प्रतिलोममानयेत् । अर्वाचीनं पूर्वोक्तं ऊर्ध्वगतिः । तद्यतः एवं प्रविष्टं तेनैवाहरेत् । यच्छल्यं पराचीनं तदनुलोममानयेत् । यत्राभिमुखं तत्रैवानयेदित्यर्थः" । पराचीनमधोगतीति उपलब्धो प्रतिलोमानुलोमोपायौ । किं ताभ्यामाहरणीयं शल्यमित्यत्र ब्रवीति ।

॥ १९ ॥

न च सर्वमेव शल्यमाहरणीयमित्याह—

सुखाहार्यं यतः छित्त्वा तत्तिर्यग्गतं हरेत् ।
शल्यं न निर्घात्यमुरःकक्षावंक्षणपार्श्वगम् ॥ २० ॥
प्रतिलोममनुत्तुण्डं छेद्यं पृथुमुख च यत् ।

सुखाहार्यं यतश्छित्त्वेति । तिर्यग्गतं शल्यं यतो यस्माद् देहदेशात् सुखाहार्यं भवति सुखेनाहर्तुं शक्यते तस्माद् देहदेशान्मांसादीन् छित्त्वा विलुप्य उद्धरेत् । प्रतिलोमोपायेन अनुलोमोपायेन वा इत्यर्थः । छित्त्वेत्यस्य यद्यपि कर्म किञ्चिन्न निर्दिष्टं तथापि त्वङ्मांसादीना योग्यत्वात् तेषामेव कर्मत्वं बोध्यम् । मांसादीन् छित्त्वेत्यर्थः । शल्यमित्यादि । उरःप्रभृतिषु स्थितं शल्यं न निर्घात्यं न निर्घातनीयम् । वंक्षणम् = (കുലത്താണ്ട്) । पार्श्वम् = (വിലാവ്) । तथा प्रतिलोमं प्रतिलोमप्रविष्टं नानुलोमगतं तथा अनुत्तुण्डं बाह्ये बुद्बुदवन्नोन्नतं अदृश्यमानमुखमित्यर्थः । हृद्याकारोऽपि — "अनुत्तुण्डितमदृश्यमानद्वारं च त्वगादिभिरवरुद्धम्" इत्याह । उत्तुण्डम् = (തിരുമലപ്പം) । तथा पृथुमुख च विस्तीर्णानद्यं शल्यं न निर्घातनीयम् । सारकृत्त्वेवमाह — 'शल्यं न निर्घात्य'मित्यादिना प्रवेशतः प्रतिलोमाहर्तव्यं शल्यं ब्रवीति । निर्घातनं मुद्गरादिभिः प्रचालनम् । प्रतिलोमं प्रति-

लोमाहर्तव्य शल्यम् । अनुत्तुण्डं गम्भीरापगतमदृश्यमानमुखम् । तद्विद्धविशेषादेव प्रतिलोमम् । भूयश्छेदानुबन्धभयादुत्तुण्डमविच्छेदनीयमुखं प्रतिलोमं छेदायोग्ये स्थाने छेदसाधनमुखमित्यर्थः । अच्छेदनीयप्रदेशे उत्तुण्डितमित्यर्थः पृथुमुखं च । यदिति भल्लार्धचन्द्रादि । अथवा "छेदयोग्ये स्थानेऽपि भल्लादि प्रतिलोममाहरेदिति वा । एवं प्रतिलोममित्यादिना विद्धतः प्रदेशतः शल्याकृतिश्च प्रतिलोमाहर्तव्यं शल्यमुक्तं भवति । एतद् विपरीतमनुलोममित्यनुक्तेऽपि सिध्यति । उक्तं हि भालुकिना— "तत्र छेदनीयमुखमनुत्तुण्डिताश्च नित्यमनिर्घात्यान्याचक्ष्महे । भूयश्छेदानुबन्धदोषात् सर्व एव तु शल्या जत्रुकक्षपर्शुकावक्षोन्तरेषु अनिर्घात्या महापराधत्वात् । निर्घात्यमेभ्यो विपरीतमुत्तुण्डितं कर्णवन्तमपि निर्घात्यमाचक्ष्महे । तत्र निर्घातकर्णिकां पुरस्तान्निधाय मुखं चारङ्गुण्डेषु प्रतिपीडयेत् । नाड्या प्रतिपीड्य परतस्ततः पाणिना निर्घातयेत् । अग्नीलाग्निमुद्गराभिघातैर्वा" इति । उक्तं च भोजेन—

"अनुत्तुण्डानि शल्यानि छेदनीयमुखानि च ।
अनिर्घात्यानि जानीयात् भूयः च्छेदानुबन्धतः ॥
वक्षःकुक्ष्यन्तरगतं पार्श्वयोः कक्षयोरपि ।
सर्वमेव त्वनिर्घात्यं भवेच्छल्यमिति स्थितिः" ॥

इति । भोजेन प्रोक्ते ग्रन्थे प्रतिलोममित्यनुक्तं यतस्तस्माद् प्रतिलोममनुत्तुण्डमित्यत्रानुत्तुण्डादिगुणं शल्यं प्रतिलोमं हरेदिति वार्थः । 'छेद्यं पृथुमुखं च यत्' इत्यत्रापि पृथुमुखत्वाच्छेद्यमिति वार्थः ॥ २० ॥

नैवाहरेद्विशल्यघ्नं नष्टं वा निरुपद्रवम् ॥ २१ ॥

नैवेत्यादि । वृद्धाकारोऽपि— "नैवाहरेदित्यादिना प्रतिलोमानुलोमाभ्याम्)प्यनाहार्यं शल्यं ब्रूते" इत्याह । विशल्यघ्नं यदाहृतं सत् शून्यं स्रोतः कृत्वा मारयति तन्नाहरेत् । विशल्यं हन्तीति विशल्यघ्नम् । तावत्स जीवति यावत्सशल्यः । शल्यापाये तु म्रियते तस्माहरेदेव । शल्यस्य तस्योद्धृतस्य प्राणघातकत्वात् । एतत्स्वरूपं च मर्मविभागे स्पष्टं कृत्वा वक्ष्यते । तथा नष्टमदृश्यत्वात् प्राप्तं च यन्निरुपद्रवमुपद्रवरहितं तन्निमित्तरोगरहितं सत् नाहरेत् प्रत्यवायभयात् । वाशब्दः समुच्चये । उक्तं च भोजेन —

"..... न सर्वशो नोद्धरेद् भिषक् ।
मर्मस्थेषु विद्धस्तु निश्शल्यो म्रियतेऽचिरात् ॥

पाकरुक्च्छोफसंस्रावैः स्थानेऽन्यत्रापि वर्जितम् ।
प्रणष्टमथ शल्यं स्यादुपेक्ष्यमनुपद्रवम् ॥"

इति ॥ २१ ॥

अथाहरेत्करप्राप्यं करेणैवेतरत्पुनः ।
दृश्यं सिंहाहिमकरवर्मिकर्कटकाननैः ॥ २२ ॥
अदृश्यं व्रणसंस्थानाद् गृहीतुं शक्यते यतः ।
कङ्कभृङ्गाङ्गकुररशरारीवायसाननैः ॥ २३ ॥
संदंशाभ्यां त्वगादिस्थं तालाभ्यां सुषिरं हरेत् ।
सुषिरस्थं तु नलकैः शेषं शेषैर्यथायथम् ॥ २४ ॥

अथेत्यादि । करप्राप्यं हस्तग्राह्यं शल्यं करेणैवाहरेत् नापरेण कङ्कमुखादिना । इतरद् अकरप्राप्यं हस्तग्रहणाशक्यं तु दृश्यं सिंहमुखादिभिर्यन्त्रैराहरेत् । अदृश्यं पुनः शल्यं व्रणसंस्थानादाकलय्य कङ्कमुखादिभिर्ग्रहीतुं शक्यते यतस्ततस्तैर्हरेत् । यत्तदोर्नित्याभिसंबन्धत्वात् तदो लाभः । अर्थवशेन यत इति तृतीयार्थे तसिल् । येन यन्त्रेण गृहीतुं शक्यते तेनाहरेदिति । त्वगादिस्थं शल्यं संदंशाभ्यां निर्हरेत् । आदिग्रहणान्मांसादीनां ग्रहणम् । सुषिरं यच्छल्यं त्वगादिस्थं तालयन्त्राभ्यां हरेत् । न संदंशाभ्याम् । "ऊपसुषि – " (५- २- १०७) इत्यादिना समासः । सुषिरयुतं सुषिरस्थं स्रोतःस्थितं पुनः शल्यं नलकैर्नालीयन्त्रैराकर्षेत् । शेषं शल्यं शेषैर्यन्त्रैर्यथायोग्यमाहरेत् ॥

२२–२४॥

यन्त्रेणाप्यशक्यस्य ग्रहणमाह —

शस्त्रेण वा विशस्यादौ ततो निर्लोहितं व्रणम् ।
कृत्वा घृतेन संस्वेद्य यथ्वाचारिकमादिशेत् ॥ २५ ॥
सिरास्नायुविलग्नं तु चालयित्वा शलाकया ।

शस्त्रेणेत्यादि । शस्त्रेण वा पूर्वं विशस्य मांसादीन् छित्त्वा शल्यमानीय तदनन्तरमपनीतरक्तं, व्रणं विधाय उष्णसर्पिषा स्वेदयित्वा वस्त्रपट्टादिना ससर्पिर्मधु बद्ध्वा आचारिकं स्नेहविध्युक्तम् 'उष्णोदकोपचारी स्यात्' इत्यादिकमादिशेत् कथयेत् । सिरास्नायुविलग्नं पुनः शल्यं शलाकया चालयित्वा शिथिलीकृत्याहरेत् ॥ २५ ॥

१. "ह नायु" मुद्रितार्णवहृदयपाठः ।

एवं हस्तेनाहर्तुमशक्याना शल्यानामुद्धरणविधानमुक्त्वेदानी हस्तयन्त्राभ्यामश क्यानामाहरणविधिं वक्तुमारभते ।

हृदये संस्थितं शल्यं त्रासितस्य हिमाम्बुना ॥ २६ ॥
ततः स्थानान्तरं प्राप्तमाहरेत्तद्यथायथम् ।
यथामार्गं दुराकर्षमन्यतोऽप्येवमाहरेत् ॥ २७ ॥
अस्थिदष्टं नरं पद्भ्यां पीडयित्वा विनिर्हरेत् ।
इत्यशक्ये सुबालिशैः सुगृहीतस्य किङ्करैः ॥ २८ ॥
तथाप्यशक्ये वारङ्गं चक्रीकृत्य धनुर्ज्यया ।
सुबद्धं वक्त्रकटके बध्नीयात्सुसमाहितः ॥ २९ ॥
सुसयतस्य पद्भ्यांग्या वाजिनः कशयाथ तम् ।
ताडयेदिति मूर्धानं वेगेनोन्नमयन् यथा ॥ ३० ॥
उद्धरेच्छल्यमेवं वा शस्त्रायां कल्पयेत्तरोः ।
बध्वा दुर्बलवारङ्गं कुशाभिः शल्यमाहरेत् ॥ ३१ ॥

हृदये संस्थितमित्यादि । हृदये यदाश्रितं शल्यं तच्छीतजलेन त्रासितस्य स्थानान्तरगतं ज्ञात्वा यथायथं यथास्वं विशिष्टयन्त्रैः शल्यं निर्हरेत् । शल्यमिति प्रासशल्यादिकं प्रायश । सौश्रुतदर्शनादेव द्योत्यते । कथमिति । 'हृदयमभिप्रवर्तमाने शल्ये शीतजलादिभिः उद्वेजितस्योद्विग्नहृदयस्य प्रहारं दापयेत, यथाहारमार्गो नावरुध्यते' इति । अत्रैवं व्याख्यानमवोचद् वामदेवः— "हृदयमिति-प्रासशल्यादिके हृदयमभिवर्तमाने सति शीतजलादिभिरुद्वेजितस्य सत उद्विग्नहृदयस्य प्रहारं दापयेत् । यथा येन प्रकारेण आहारमार्ग आहार-गतिर्नावरुध्येत तथा प्रहारं दापयेत्। 'हृदये आहारमार्ग' इति वचनात् अवगम्यते प्रासशल्यमेवात्राधिकृतमिति । उद्वेजनेन विवृतस्रोतसः तत्कालमेव महारा-च्छल्यस्याध पतनं भवतीत्यभिप्रायः । अथवागन्तुशल्यानामसह्यरुजाकराणां सर्वत्र स्थितानामुद्धरणोपायार्थमस्यारम्भ. । हृदयमिति मनस्तदधिष्टानत्वात् मनः प्रपीड्य वर्तमाने शल्ये इत्योद्धरणे अशक्तो भवत्यातुरः। तत्रायमुद्धरणोपायः । शीतजलादिभिरुद्वेजितस्य प्रहारं शल्यनिष्पातनं दापयेत । यथाहारमार्गः आहरणमाहारः शस्त्रस्याहरणमार्गो नावरुध्यते यथा शीघ्रं मुखमागच्छति । शल्यमनुलोमं प्रतिलोमं वा तथा निर्घातं प्रतिनिर्घात वा दापयेत् "। भोजनाप्युक्तम्—

"शल्ये तु संबाधगते गम्भीरे हृदयाश्रिते ।
शल्यनिर्हरणार्थाय विधिं कुर्यादिमं भिषक् ॥
शीतलेन जलेनैनमबुद्धमवसेचयेत् ।
उद्विग्ने हृदये तस्य शल्यस्योद्धरणं हितम् ॥
प्रियां भार्यां स्त्रियं चान्यां सर्वालङ्कारभूषिताम् ।
दर्शयेत् तस्य विद्धस्य संहृष्टः सयने तथा ॥
हृदयेन सयानस्य शल्यं निर्वर्तयेद् भिषक् " ॥ इति ॥

यथेत्यादि । अन्यतोऽपि हृदयादन्यत्रापि देशे स्थितं शल्यं दुराकृष्टं दुःखेनाकृष्टुं शक्यते स्वमार्गेण यत्तत् एवमाहरेत् । यथा हृदयस्थं शल्यं स्थानान्तरं प्राप्तं निर्हार्यं तथा यथामार्गं मार्गानतिक्रमेणान्यदेशस्थमपि शल्यमाकर्षणीयम् । अस्थिदष्टं शल्यमस्थिद्वयमध्यगतं वास्थ्नापि दष्टमिव दष्टम् अस्थिविवरप्रविष्टमित्यर्थः । सनग्यन्तं वा । तस्मिन्नस्थिदष्टे शल्ये सति नरं बलवन्तं पद्भ्यां पीटयित्वा आक्रम्य यन्त्रेण तच्छल्यं निर्हरेत् । अस्थिनष्टम् इति वा पाठः । इत्यशक्ये अनेनापि प्रकारेणाकृष्टुमशक्ये शल्ये किन्नरैर्भृत्यैर्महाबलैः सुगृहीतस्य सुष्ठवष्टब्धस्य नरस्य शल्यं फक्कमुखादिना भिषगाहरेत् । तथाप्यशक्ये एवमप्याहर्तुमशक्ये शल्यस्य वारङ्गं प्रान्तं शिखाकारं वर्क्राकृत्य कुटिलतामापाद्य ततो धनुर्ज्यया स्नावादिमय्या सुबद्धं कृत्वानन्तरं वाजिनोऽश्वस्य वक्त्रकटकं बध्नीयाद् वैद्यः । वक्त्रकटकं—(ക്കടിവായ്ക്കെട്ട്)। किंभूतः, सुसमाहितः तद्गतमनाः । किंभूतस्य वाजिनः, पञ्चाङ्ग्या सुसंयतस्य सुष्ठु बद्धस्य पञ्चानामङ्गानां चतुर्णां पादानां मुखसहितानां समाहारः पञ्चाङ्गी बन्धविशेषः = (മെയ്ക്കെട്ട്) । उक्तं च—

"मुखे सुरचतुष्के च पञ्चाङ्गीसंज्ञया मतः "

इति । तया पञ्चाङ्गया बद्धस्यानन्तरं तं वाजिनं कशया एवं ताडयेत् यथा स वाजी मूर्धानमुन्नमयन् उत्क्षिपन् वेगेन बलेनाक्रान्त्या शल्यमुद्धरेत् । कशा चर्मयष्टिः । अथवा एवमनेन प्रकारेण वारङ्गं वक्त्रं नीत्वा धनुर्ज्यया सुबद्धं संपाद्य सुसमाहितो भिषक् वृक्षस्य शाखायां कल्पयेत् । वृक्षशाखामा-

नमय्य धनुर्ज्यायैव तस्यां तद्वद् बध्नीयात् शाखामवनम्य तस्यामश्वकर्णवद् धनुर्ज्या बध्नीयादित्यर्थः । अत्र च य' शाखा किञ्चरद्भस्तैर्मुक्तमात्रैवोर्ध्वमुन्नमन्ती शल्यमुद्धरति तादृशी कल्पनीया । दुर्बलं तनु वारङ्गं यस्य शल्यस्य तद् दुर्बलवारङ्गं शल्यं कुशाभिः कुशाभिधानैर्नैशादिकवालिकाभिर्भङ्गप्रतिषेधे वक्ष्यमाणैर्वध्वा शल्यमाहरेत् । कुशाशब्दो न तृणवाची "अस्त्री कुशम्" इत्यमरसिंहः ॥ २६–३१ ॥

श्वयथुग्रस्तवारङ्गं शोफमुत्पीड्य युक्तितः ।
मुद्गराहत्या नाड्या निर्घात्योत्तुण्डितं हरेत् ॥ ३२ ॥
तैरेव च नयेन्मार्गममार्गोत्तुण्डितं तु यत् ।
मृदित्वा कर्णिनां कर्णं नाड्यास्येन निगृह्य वा ॥ ३३ ॥
अयस्कान्तेन निष्कर्णं विवृतास्यमृजुस्थितम् ।
पक्वाशयगतं शल्यं विरेकेण विनिर्हरेत् ॥ ३४ ॥

श्वयथुना ग्रस्तमाच्छादितं वारङ्गं यस्य शल्यस्य तत् श्वयथुग्रस्तवारङ्गं शल्यमाहरेत् । कथं, युक्तितो युक्त्या यथा युज्यते तथा शोफमुत्पीड्य ऊर्ध्वं पीडयित्वा उत्तुण्डितं बुद्बुदवदुन्मुखीभूतं शल्यं मुद्गरेणाहतया नाड्या निर्घात्य चालयित्वा आहरेत् । मुद्गरग्रहणमुपलक्षणं पाषाणादीनाम् । पाषाणादिभिरप्याहत्या नाड्योत्तुण्डीकृतं हरेदिति बोध्यम् । तैरेव मुद्गरादिभिरान्तरमार्गोत्तुण्डितं अमार्गे उत्तुण्डितं शल्यं मार्गं नयेत् प्रापयेत् । हारीतोऽप्याह—"तैरेव मुद्गरादिभिः प्रहृत्यामार्गोत्तुण्डितं यतो निर्हर्तुं मर्मत्वान्न युज्यते तत उत्तुण्डितं मार्गमानयेत्" इति । कर्णः कर्णौ कर्णा वा विद्यन्ते येषां ते कर्णिनो भल्लादयः । तेषां कर्णं मृदित्वा तस्य कर्णशल्यं निर्हरेत् । कर्णिनमिति वा पाठः । "कर्णवन्तं शरशल्यं कर्णं मृदित्वा निर्हरेत्" इति हारीतः । अथवा नाड्यास्येन नाडीमुखेन पञ्चमुखच्छिद्रेत्यादिना निगृह्य निर्हरेत् । अयस्कान्तेन मणिविशेषेण निष्कर्णं कर्णरहितं तथा विवृतास्यं स्पष्टमुखम् ऋजुस्थितं शल्यं हरेत् । अयस्कान्तस्य लोहाकर्षणं प्रभावः । पक्वाशयगतं शल्यं विरेकेण विशेषतो निर्हरेत् ॥ ३२–३४ ॥

दुष्टमांसविपक्वान्नरक्तलोमादि चूर्णयेत् ।
कण्ठस्रोतोगते शल्ये सूत्रं कण्ठे प्रवेशयेत् ॥ ३५ ॥

अल्पसत्वेऽबले बाले पाके चात्यर्थमुद्धते ॥ १० ॥

दारणं मर्मसन्ध्यादिस्थिते चान्यत्र पाटनम् ।
आमच्छेदे सिरास्नायुव्यापदोऽसृगतिस्रुतिः । ११ ॥

रुजोऽतिवृद्धिर्दरणं विसर्पो वा क्षतोद्भवः ।
तिष्ठन्तः पुनः पूयः सिरास्नाय्वसृगामिषम् ॥ १२ ॥
विवृद्धो दहति क्षिप्रं तृणोलपमिवानलः ।
यश्छिनत्त्यामभज्ञानाद्यश्च पक्वमुपेक्षते ॥ १३ ॥

श्वपचाविव विज्ञेयौ तावनिश्चितकारिणौ ।
प्राक् शस्त्रकर्मणश्चेष्टं भोजयेदन्नमातुरम् ॥ १४ ॥

पानपं पाययेन्मद्यं तीक्ष्णं यो वेदनाक्षमः ।
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते ॥ १५ ॥

अल्पेत्यादि । अथैनं रक्तपाकाख्यं शोफं सम्यक् पक्वं विदित्वा अल्पसत्त्वादिषु जाते शोफे पाकाद्वा अत्यर्थमुद्धतेऽतिक्रान्ते दारणं कार्यम् । शोफे दारणं व्रणप्रतिषेधोक्तैर्दारणद्रव्यैः—

"गुग्गुल्वतसिगोदन्तस्वर्णक्षीरिकपोतविट् ।
क्षारौषधानि क्षारश्च पक्वशोफविदारणम् ॥"

इत्युक्तेः । न केवलमल्पसत्त्व इत्यादिके श्वैत्यथौ दारणं कार्यम् । यावत् चशब्दान्मर्मसन्ध्यादिस्थिते च श्वयथौ दारणं कार्यं न पाटनं शस्त्रेण । पाठ्यकारस्तु— "दारणं कुर्यात् (ळीऽुक्ष्ण) इत्याह । अन्यत्रेति । अन्यत्र दारणविषयादन्यत्र स्थाने शस्त्रेण पाटनं कार्यम् । पाटनं दीर्घच्छेदः । अबलो दुर्बलः । सर्वत्र आमस्य शोफस्य शस्त्रेण छेदे सति सिरास्नायुव्यापदो भवन्ति । तथा असृजोऽतिस्रावः स्यात् । तथा रुजाया अतिवृद्धिः अथवा दरणं, विसर्पो वा क्षतोद्भवः स्यात् । पक्वे पाके अतिक्रान्ते अन्तरे तु पूयस्तिष्ठन्नासीनः सन् सिरादीनि दहति । कथमिव तृणोलपमिवानलः तृणोलपं (ण्ऽ्ऽ्ँ) । अज्ञानान्मोहादामं छिनत्ति यः योऽपि पक्वमुपेक्षते न पाटयति तौ नरौ श्वपचतुल्यावातुरव्यापादनं कुरुतो विधत्त इत्याह— अनिश्चितकारिणावसमीक्ष्यविधायिनौ आतुरव्यापादनात् श्वपचतुल्यौ । न वैद्यौ । श्वपचश्चण्डालः । शस्त्रकर्मणः प्राक्

पूर्वमातुरमिष्टमन्नं भोजयेत् । व्रणेऽपथ्यमपि तद्लाघानार्थं योजयेदित्यर्थः । तथा यो वेदनाक्षमः शस्त्रव्यथासहिष्णुः तमातुरं मद्योचितं तीक्ष्णं तीव्रमदं मद्यं पाययेत् । एवं सति यत् स्यात् तदाह — न मूर्च्छत्यसंयोगादनुपयोगाच्च मुह्यति । तीक्ष्णमद्यपानान्मत्तः सन् शस्त्रमङ्गे न्यस्तं न बुध्यते न चेतयते । तं कृतान्नतया क्रम्यत इत्यर्थः ॥ १५ ॥

अन्यत्र मूढगर्भाश्ममुखरोगोदरातुरात् ।
अथाहृतोपकरणं वैद्यः प्राङ्मुखमातुरम् ॥ १६ ॥
सम्मुखो यन्त्रयित्वाशु न्यसेन्मर्मादि वर्जयन् ।
अनुलोमं सुनिशितं शस्त्रमापूयदर्शनात् ॥ १७ ॥
सकृदेवाहरेत्तच्च पाके तु सुमहत्यपि ।
पाटयेत् त्र्यङ्गुलं सम्यग्द्व्यङ्गुलव्यङ्गुलान्तरम् ॥ १८ ॥

अन्यत्रेत्यादि । मूढगर्भादिभिर्यं आतुरस्तं वर्जयित्वा इष्टभोजनं मद्यपानं च कारयितव्यम् । अश्मशब्देनाश्मरी गम्यते । अथेत्यादि । अथशब्दो मङ्गलवाची । अथशब्देन मङ्गलवाचिना सङ्ग्रहोक्तमर्थं सुमुहूर्तविप्रार्चनदेवतानमस्कारादिकं सूचयति । भिषजा उपक्रम्यस्य आयुश्च परीक्ष्यमिति बोद्धव्यम् । तथा चोक्तं सुश्रुते — "आतुरमुपक्रम्यता वैद्येनायुरादित एव परीक्ष्यम् । सत्यायुषि अश्विवयोदेहबलसात्म्यसत्त्वप्रकृतिभेषजदेशकालांश्च परीक्षेत । तत्र महापाणिपादपृष्ठं स्निग्धस्तनाग्रदशनललाटं दीर्घाङ्गुलिपर्वोच्छ्वासनेत्रबाहुं विस्तीर्णभ्रूस्तनान्तरोरस्कं ह्रस्वमेढ्रभ्रुवं गम्भीरसत्त्वस्वरमित्येवमादिलक्षणोपेतं पुरुषं जानीयाद् दीर्घायुः खल्वयम्" इति । तमेकान्तेनोपक्रमेत । श्लोकश्चात्र —

"गूढसन्धिसिरास्नावः संहताङ्गः स्थिरेन्द्रियः ।
उत्तरोत्तरमद्यात्रो यः स दीर्घायुरुच्यते ॥"

इति । सत्त्ववतः क्रिया कर्तव्येति चोक्तं यथा—"सत्त्ववतः क्रिया" । सत्त्वं सत्त्वगुणोत्कर्षः ।

"सत्त्ववान् सहते सर्वं सुखं दुःखं च मानवः ।
राजसः स्तभ्यमानस्तु सहते नैव तामसः ॥" इति ॥

अस्मिन्नप्युक्तम् —

"आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि ।" इति ॥

---

१. द्व्यङ्गुलमिति मुद्रिताष्टाङ्गहृदयपाठः ।

वक्ष्यति च —

"अनुत्सेकमदैन्यं च सुखं दुःखं च सेवते ।
सत्त्ववान् स्तभ्यमानस्तु राजसो नैव तामसः ॥" इति ॥

तथा आहृतं ढौकितमुपकरणं तत्कालयोग्यं पट्टशस्त्रामिजाम्बवोष्ठपिचु-प्लोतस्नेहमधुकफल्कादिकं यस्यातुरस्य तमातुरम् । शस्त्रावचारणात् पूर्वमुपकरणानि कल्प्यानि । सुश्रुते चोक्तं— यथा 'छेद्यं, भेद्यं, लेख्यं, वेध्यं, आहार्यं, विस्राव्यं, एष्यं सीव्यं" इत्यष्टविधं शस्त्रकर्म । एषामन्यतमं चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि भवन्ति । यन्त्रशस्त्रक्षाराग्निशलाकापिचुसूत्रमधुघृततैलतर्पणकषायलेपादयः परिचारकाश्च" इति । "आहृतोपकरणं सम्भृतोपकरणम्" इति हाटकः । उपकरणानि सिराव्यधोक्तानि' इति पाठ्यकारः । प्राङ्मुखं पूर्वाभिमुखं परिकर्मभिर्गृह्णीत्वेत्यर्थः । संमुखनातेन उपविष्टं चेति बोद्धव्यम् । एवंविधमातुरं वैद्यः संमुखोऽभिमुखः प्रत्यङ्मुखो यन्त्रयित्वा अचलनार्थं क्रियासौकर्यार्थं च शस्त्रमाशु अविलम्बितं न्यसेत् निक्षिपेत् । मर्मादि वर्जयन् मर्मसिरास्नायुसन्ध्यादि परिहरन् । भोजने चोक्तम् —

"प्रत्यङ्मुखो भवेद् वैद्यः प्राङ्मुखश्चातुरो भवेत् ।
चत्वारः पुरुषा द्वौ वा परिगृह्णीयुरातुरम् ॥"

इति ॥ तथा अनुलोमं रोगशस्त्रानुकूलं कृत्वा; न प्रातिलोम्येन । अनुलोमं = (ശരിക്ക് ചെയ്യാ കീഴ്ക) इति पाठ्यकारः । किम्भूतं शस्त्रं, सुनिशितं अतितीक्ष्णं आपूयदर्शनान्न्यसेत् । तच्च शस्त्रं सकृदेवाहरेत् छिन्द्यात् । न बहून् वारान् । अरुणदत्तस्त्वाह—'तच्च शस्त्रमापूयदर्शनादाहरेत् । नत्वधिकं तत्रैव स्थाप्यम् । तच्च सकृदेव न बहून् वारान् न्यसेत्' इति । सारकृदप्याह—'आपूयदर्शनात् सकृदेव न्यसेत । आहरेत् तच्चेति पूयदर्शनानन्तरं तत्र न स्थाप्यमित्यर्थः । तत्र न पाटनं कुर्यादिति पिण्डितार्थः" इति । उक्तं च भोजने —

"तावत् प्रणिदधेच्छस्त्रं यावत् पूकोऽत्र दृश्यते ।
निपिच्यमाने पूके तु पदं कुर्याद् विचक्षणः ॥"

इति । पूकः पूयः । "अथेत्यादिविधानं सर्वेषामेव शस्त्रकर्मणां समानम् ।" न्यसेत् सुनिशितं शस्त्रमापूयदर्शनादिति भेदने विशेषः । इतरेषां पुनर्विशेषांस्तत्र

तत्रोपदेक्ष्यति । इतरेषां शस्त्रकर्मणां विधानमनुक्त्वा भेदनविधेर्वचनं व्रणमूलस्य पक्वशोफस्य प्रतीकारार्थत्वात् भेदनस्य । पाके तु सुमहत्यपि व्यङ्गुलं पाटयेत् । व्यङ्गुलपरिमाणं व्रणं सम्यक् कुर्यात् नाधिकम् । अनेन परं शस्त्रपदप्रमाणं वर्ण्यते । अपिशब्दादेकेन पदेन दुःशोधनीयेषु नालीव्रणादिषु पदबहुत्वमपीष्टमिति द्योतयति । तत्र पदबहुत्वे विधानं कथयति — व्यङ्गुलव्यङ्गुलान्तरमिति । यत्र पाकस्यातिमहत्त्वापेक्षया बहूनि पदानि क्रियन्ते तत्राङ्गुलद्वयमथवाङ्गुलत्रयमन्तरीकृत्य पुनरन्यत् पूर्वप्रमाणं व्रणं कुर्यात् । न त्वासन्नम् । एवं व्रणकरणं स्रावादिरक्षणार्थम् । उक्तं च भोजेन —

"व्यङ्गुलं तु व्रणं कुर्याद् व्यङ्गुलं तु व्रणान्तरम् ।
पाकस्य वा प्रमाणेन पदं कुर्याद् विचक्षणः ॥

इति ॥ १८ ॥

अथानन्तरं गतिज्ञानार्थमाह —

एषित्वा सम्यगेषिण्या परितः सुनिरूपितम् ।
अङ्गुलीनालवालैर्वा यथादेशं यथाशयम् ॥ १९ ॥

एषित्वेत्यादि । एषिण्या सम्यगेषित्वा परितः समन्तात् सुनिरूपितं पर्यालोचितम । न केवलमेषिण्या यावदङ्गुल्यादिना । नातिविवृते पाके एषिण्या, अतिविवृते अङ्गुल्या नालेन वा पद्मोत्पलादिजेन, अतिसंवृते वालेन वराहादिसम्बन्धिना अन्वेष्य यथादेशं यथाशयं व्रणं कुर्यात् । यथादोषमिति वा पाठः । नालं तृणकाण्डमिति पाठ्यकारः ॥ १९ ॥

यथादेशं यथाशयमिति प्रोक्तम् । अस्यैव प्रदेशं दर्शयितुमाह —

यतो गतां गतिं विद्यादुत्सङ्गं यत्र यत्र च ।
तत्र तत्र व्रणं कुर्यात्सुविभक्तं निराशयम् ॥ २० ॥
आयतं च विशालं च तथा दोषो न तिष्ठति ।
शौर्यमाशुक्रिया तीक्ष्णं शस्त्रमस्वेदवेपथुः ॥ २१ ॥
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते ।

यत इत्यादि । यतो यस्मिन् प्रदेशे गतां दूराध्वां गतिं जानीयात् । तस्मिन् देशे व्रणं कुर्यात् । गतिः (७व्यधुतौ६०) । यत्र यत्र आशयप्रदेशे

---

१. अथा शीघ्र मुद्रितादर्शपुस्तकपाठ ।

उत्सङ्गं उन्नतिं विद्यात् । तत्र तत्र प्रदेशे व्रणं कुर्यात् । उत्सङ्गः उन्नतिः । शुष्कस्य पूयस्य संश्लेष इति केचित् । पाठ्यकारोऽपि—उत्सङ्गः (ഗാഢ ക്ഷ്വ്ഡ്യ) इत्याह । किंभूतं व्रणं, सुविभक्तं पार्श्वापरपार्श्वाभ्याम्, अथवा दर्शनीयं अकरालमित्यर्थः । अरुणदत्तोऽपि— "सुष्ठु विभक्तं पार्श्वापरपार्श्वादि विभागो यस्य तं तथाविधम्" इत्याह । तथा निराशयं न विद्यते आशयः पूयादेर्दोषस्य स्थानं यस्य तं तथाभूतं निराशयं कुर्यात् । हाटकोऽपि "निराशयं निर्गतपूयस्थानमित्यर्थः" इत्याह । आशयम् (ചലങ്ങാവച്ഛ്വ) तथायतं दीर्घं तथा विशालं विस्तीर्णं च कुर्यात् । तथा एवं कृते सति दोषः पूयाद्यो न तिष्ठति न स्थानं लभते । उक्तं च सुश्रुते — "मुक्तवन्तमातुरमुपवेश्य यन्त्रयित्वा मर्मसिरास्नायुसन्ध्यस्थिभमनीः परिहरन् रोमशय्यानुकूलं शस्त्रं निदध्यात् अपूक्तदर्शनादिति । सकृद्देवाहरेच्छस्त्रमाशु च महत्स्वपि च पाकेषु * व्यङ्कुलं शस्त्रपदमुक्तम् । तत्रायतत्वं विशालत्वं सुविभक्तत्वं व्रणगुणाः" इति । शौर्येत्यादि । शस्त्रकर्मणि वैद्यस्य शौर्यादिकं शस्यते । शौर्यं पाटनादौ वीर्यम् । सामर्थ्यमिति हाटकः । अध्यवसायान्तगामी शूरः । तस्य भावः शौर्यमिति वा । आशुक्रिया चतुरहस्तता । तीक्ष्ण शस्त्रं निशितशस्त्रवत्ता । अस्वेदवेपथुः न विद्यमानौ स्वेदवेपथू यस्य स एवम् । स्वेदाभावः कम्पाभावश्चेत्यर्थः । हाटकोऽपि — 'अस्वेदवेपथुः स्वेदराहित्यं हस्तादिकम्पाभावश्च' इत्याह । अस्वेदवेपथू इति वा पाठः । असम्मोहस्तत्कालोचितकार्यकरणे सम्यक् प्रवृत्तिः । ननु शौर्यं वैद्यस्य शस्यत इत्युक्तमेव स्वेदकम्पाभावः प्रत्यपादि । तथा च स्वेदवेपथू भीरोरेव सम्भवतः । न तु शूरस्येत्यनर्थकमस्वेदवेपथुरिति । अत्राचक्ष्महे — सत्यमेतौ भीरुगुणौ । किन्तु उष्णकालवशात् प्रकृतिवशाद् वा यस्य स्वेदवेपथू भवतः तत्परिहारार्थमेतदुक्तम् । सस्वेदस्य हि वैद्यस्य शस्त्रकर्म कर्तुमुद्यतस्य शस्त्रग्रहणमेव न तथा सम्पद्यते । तद्वत् सकम्पस्यापि । तस्मात् तत्परिहारो युक्तः । 'शस्त्रकर्मण्यातुरस्य वैद्यस्य च शौर्यादिकं शस्यते' इति केचित् । अथवा अवेपथ्वन्तान्यातुरे वैद्ये च । 'कर्मण्यसम्मोहः शौर्यादिकं सर्वं वैद्यस्यैवेतीन्दुः ।

अनुलोमशस्त्रपदस्येदाभावपक्षाद —

तिर्यक् छिन्द्याल्ललाटभ्रूदन्तवेष्टकजत्रुणि ॥ २२ ॥

कक्षिकक्षाक्षिकूटौष्ठकपोलगलवक्षसि ।

---

* व्यङ्कुलं व्यङ्गुलान्तरं वेति मुद्रितसुश्रुते ।

अन्यत्र छेदनात्तिर्यक् सिरास्नायुविपाटनम् ॥ २३ ॥

तिर्यगित्यादि । ललाटादिदेशे तेषां संस्थानात् तिर्यक् छिन्द्यात् भिन्द्यादित्यर्थः । उक्तं च —

"आमच्छेदे सिराच्छेदे स्नायुकन्धरयोरपि ।
तथा तिर्यक् प्रकारे तु छेदशब्दः प्रपठ्यते ॥"

इति । ललाटादिदेशे तिर्यक्छेदः कार्यः रोमशय्यानपेक्षम् । दन्तवेष्टकं दन्तपीठिका दन्ताधार उच्यते । अन्यत्र प्रदेशे तिर्यक् छेदनात् सिराणां स्नायूनां वा व्यापत्तिः स्यात् ॥ २३ ॥

शस्त्रेऽवचारिते चाग्निभः शीताम्भोभिश्च रोगिणम् ।
आश्वास्य परितोऽङ्गुल्या परिपीड्य व्रणं ततः ॥ २४ ॥
क्षालयित्वा कषायेण प्लोतेनाम्भोऽपनीय च ।
गुग्गुल्वगुरुसिद्धार्थहिङ्गुसर्जरसान्वितैः ॥ २५ ॥
धूपयेत् पद्मपद्मग्रन्थानिम्बपत्रघृतद्रुतैः ।
तिलकल्काज्यमधुभिर्यथास्वं भेषजेन च ॥ २६ ॥
दिग्धां वर्तिं ततो दद्यात्तैरेवाच्छादयेच्च ताम् ।
घृताक्तैः सक्तुभिश्चोर्ध्वं घनां कवलिकां ततः ॥ २७ ॥
निधाय युक्त्या बध्नीयात् पट्टेन सुसमाहितः ।
पार्श्वे सव्येऽपसव्ये वा नाधस्तान्नैव चोपरि ॥ २८ ॥

शस्त्रे अवचारिते न्यस्ते सति वाग्भिस्तत्कालोचिताभिर्मधुराभिः स्वस्थो जातोऽसीत्येवंविधाभिराश्वास्य तथा शीताम्भोभिः परिषेकादिभिरातुरमाश्वास्यानन्तरं व्रणं परितः समन्ताद्अङ्गुल्या प्रपीड्य पूयादिदोषनिर्हरणाय ततः अनन्तरं कषायेण यष्ट्यादिसिद्धेन क्षालयित्वा ततः प्लोतेन कार्पासादिजेन वस्त्रखण्डेन जलमपनीय हृत्वा अनन्तरं व्रणं गुग्गुल्वादिभिर्निम्बपत्रान्तैर्धूपयेत् । किम्भूतैः, घृतद्रुतैः द्रुतग्रहणाद् बहुघृतैरिति द्योतयति । सङ्ग्रहे चोक्तम्— "गुग्गुलाद्यैरिव चाशयं धूपयेद्" इति । पद्मग्रन्था (पद्मकम्) ततोऽनन्तरं वर्तिं कार्पासादिमयीं दद्यात् व्रणस्यान्तः प्रवेशयेत् । वर्तिः (वर्त्तिकाकृतिः) । किम्भूतां, दिग्धामुपलिप्तां कैः तिलकल्कादिभिः । एषां हि सर्वव्रणहरत्वम् । तस्मात् तैरेव तिलकल्कादिभिर्गुणपद्मिकाम् । न केवलं

तिलकल्कादिभिः यथास्वं भेषजेन च यस्य दोषस्य स्वं भेषजं तेन दिग्धाम् । हाटकोऽपि — 'तिलकल्कादिभिर्दोषानुरूपभेषजेन च दिग्धाम्' इत्याह । हृद्याकारोऽपि — 'यथास्वं भेषजेन वातादिहरौषधेन' इत्याह । अरुणदत्तस्त्वाह — तिलकल्काज्यमधुभिर्वातादिषु यथाक्रमं दिग्धां वातव्रणे तिलकल्कदिग्धां पित्तव्रणे घृतदिग्धां कफव्रणे मधुदिग्धां यथास्वं भेषजेन वा दिग्धाम्' इति । तैरेव च तिलकल्कादिभिस्तां वर्तिं व्रणान्तःप्रविष्टां शिष्टा-माच्छादयेत् स्थगयेत् । ऊर्ध्वं तत उपरिष्टाद् घृताक्तैः सक्तुभिर्नीवि-भृष्टैः यवसक्तुभिराच्छादयेत् । ततो वर्तिच्छादनानन्तरं कवलिकां बहुवस्त्र-खण्डपुटनिर्वर्तितां निधाय संस्थाप्य पट्टेन विशिष्टवस्त्रखण्डेन मङ्कुतत्वाद् व्रणं युक्त्या दोषकालानुगुणया बध्नीयात् । युक्तिश्च सङ्ग्रहोक्ता —

'वातश्लेष्मोद्भवांस्तत्र द्विस्त्रिर्वा वेष्टयेद् व्रणान् ।
सकृदेव परिक्षिप्य रक्तपित्ताभिघातजान् ॥'

शस्त्रक्षतरुजायां तु यष्टीमधुकसिद्धेन सर्पिषोष्णेन सेचयेत्' इति । कथं बध्नीयात्, सुसमाहितः न हेलया । सव्ये वामपार्श्वे अपसव्ये दक्षिणपार्श्वे वा अधस्तान्न बध्नीयात् । नैवं चोर्ध्वं बध्नीयात् ॥ २७–२८ ॥

शुचिसूक्ष्मदृढाः पट्टाः कवलयः सनिरेखिकाः ।
धूपिता मृदवः श्लक्ष्णा निर्वलीका व्रणे हिताः ॥ २९ ॥

कुर्वीतानन्तरं तस्य रक्षां रक्षोनिषिद्धये ।
बलिं चोपहरेत्तेभ्यः सदा मूर्ध्नावधारयेत् ॥ ३० ॥

तथा शुचयः सूक्ष्मसूत्राः दृढाः पट्टा हिताः । तथा कवलिकाः सविकेशिकाः विकेशिकाश्च व्रणे हिताः । कवलिका (പഞ്ഞിക്കഷ്ണ്ടം) । विकेशिका (നൂല്) । वर्तिरित्यस्मदुरवः । किंभूताः, धूपिताः तथा मृदवः तथा श्लक्ष्णाः तथा वलीरहिताः । अनन्तरं रोगिणः कृतशस्त्रकर्मणो व्रणे रक्षां कुर्यात् । किमर्थं, रक्षोनिषिद्धये पिशिताशनराक्षसादिनिषेधाय । रक्षा-तेभ्यश्च रक्षोभ्यो बलिमुपहरेत् दद्यात् । सर्वकालं च औषधीर्मूर्ध्नी धार-येत् ॥ २९–३० ॥

ता एवाह लक्ष्मीमित्यादिना —

लक्ष्मीं गुहामतिगुहां जटिलां ब्रह्मचारिणीम् ।
वचां छत्रामतिच्छत्रां दूर्वां सिद्धार्थकानपि ॥ २१ ॥

ततः स्नेहदिनेहोक्तं तस्याचारं समादिशेत् ।
दिवास्वप्नो व्रणे कण्डूरागरुक्शोफपूयकृत् ॥ २२ ॥

स्त्रीणां तु स्मृतिसंस्पर्शदर्शनैश्चलितस्रुते ।
शुक्रे व्यवायजान् दोषानसंसर्गेऽप्यवाप्नुयात् ॥ २३ ॥

लक्ष्मीः पद्मचारिणी । गुहा पृश्निपर्णी (ചെറുപയർ വള്ളി)। अतिगुहा सालपर्णी – (ശാലില)। 'कश्मीरजे सोमसमे' इति केचित् । जटिला मांसी । ब्रह्मचारिणी ब्रह्मयष्टिका (നീലാമാഴഞ്ഞി)। वचा उग्रगन्धा । छत्रा शतपुष्पा (നിലപ്പന)। इति पाठ्यकारः । अतिछत्रा विषाणिका (കടുകരോഹിണി)। "छत्राधिच्छत्रिके विद्याद् रक्षोघ्ने कन्दसम्भवे' इति सौश्रुते । सिद्धार्थकं श्वेतसर्षपम् । ततोऽनन्तरं व्रणिने आचारमादिशेत् । कतमं स्नेहदिनेहोक्तं स्नेहस्य दिनं पानोपलक्षितमहः तत्रेहा चेष्टा तस्यामुक्तं स्नेहपानविधयुक्तम् । "उष्णोदकोपचारी स्याद्" इत्यादिकम् । दिवेति । दिवास्वप्नो व्रणे कण्ड्वादिकृत् । तस्माद् व्रणिना अहःस्वप्नो न सेव्यः । स्त्रीणां स्मृतिसंस्पर्शदर्शनैः पूर्वं स्वस्थानाच्चलितं पश्चात् स्रुतं तस्मिंश्चलितस्रुते शुक्रे सति असंसर्गेऽपि तासामसम्बन्धेऽपि मैथुनमन्तरेणापीत्यर्थः । व्यवायजान् दोषान् मैथुनोत्थान दोषानवाप्नुयात् । तस्मात् स्त्रीस्मरणस्पर्शनदर्शनानि वर्ज्यानीत्यर्थः । स्त्रीणां त्विति तुशब्दोऽवधारणे । स्त्रीणां स्मृत्यादिभिरेव दोषो भवत्यसंसर्गेऽपि इति सूचयितुम् । उक्तं च :—

"व्रणे श्वयथुरायासात् स च रागश्च जागरात् ।
तौ च रुक् च दिवास्वप्नात् ते च मृत्युश्च मैथुनात् ॥

इति ॥ २१-२३ ॥

व्रणौ वातश्लेष्मोद्भवौ तौ समं कृत्वा बध्नीयात् । न तु गाढं न शिथिलम् । समस्थाने यत्र स्थाने समो बन्ध उपदिष्टः तत्र स्थाने गात्रसंदौ वातश्लेष्मोद्भवौ व्रणौ गाढमेव बध्नीयात् । भृशमित्यादि । "तदित्यनेन गाढाशयः परामृश्यते । तद्गाढाशये गाढबन्धोद्दिष्टे स्थाने ऊर्वादौ वातश्लेष्मोद्भवौ व्रणौ भृशं सुतरां गाढं बध्नीयात् । तौ वातश्लेष्मोद्भवौ शीते हेमन्तशिशिरयोः काले वसन्ते च त्र्यहात् त्र्यहात् त्रिदिनं त्रिदिनमन्तरीकृत्य मोक्षणीयौ मोक्षणार्हौ" इत्यरुणदत्तवृद्धाकारौ प्रोचतुः ! 'तृतीये दिवसे' इति सारकृत् । भोजेनाप्युक्तम् —

"द्वितीयेऽहनि तु ग्रीष्मे तृतीये तु हिमागमे ।
सततं च वसन्तेषु मोक्षयेत व्रणान् भिषक् ॥" इति ।

मोक्षकालात्ययाद् व्रणस्यानेकोपद्रवोत्पत्तिरिति विज्ञेयम् । उक्तं हि भोजेन —

"मोक्षकालात्ययात् पूकः सन्तापाद् दूषिते व्रणे ।
त्वङ्मांसं दूषयंस्तत्र भूयः पाकं न गच्छति ॥
कृन्तुंश्च जनयेत् तत्र गन्धं वा कुणपोपमम् ।
तस्माद् कालमनुप्राप्य मोक्षयेत व्रणं भिषक् ॥

इति ॥ ६४ ॥

पित्तरक्तोत्थयोर्बन्धो गाढस्थाने समो मतः ।
समस्थाने श्लथो नैव शिथिलस्याशये तथा ॥ ६५ ॥
सायंप्रातस्तयोर्मोक्षो ग्रीष्मे शरदि चेष्यते ।
शवद्धो दंशमशकशीतवातादिपीडितः ॥ ६६ ॥
दुष्टोम्बेर्चिरं चात्र न तिष्ठेत्स्नेहभेषजम् ।
कृच्छ्रेण शुद्धिं रूढिं वा याति रूढो विवर्णताम् ॥ ६७ ॥

पित्तरक्तोत्थयोर्व्रणयोर्गाढबन्धस्थाने समो बन्धो मतः न शिथिलः । समबन्धस्थाने स्रासावदनादौ पित्तरक्तोत्थयोर्व्रणयोः शिथिलो बन्धः कार्यः । शिथिलस्य बन्धस्याशये स्थाने नेत्रादौ नैव बन्धः कार्य इति । एवकारोऽवधारणार्थः कृतः । सायमित्यादि । तयोः पित्तरक्तोद्भवयोः सायंप्रातर्द्वौ कालावपेक्ष्य मोक्ष इष्यते । ग्रीष्मे शरदि चान्यदोषोत्थव्रणस्यापि सायंप्रातर्मोक्ष इष्यते ।

यत्र बन्ध उक्तस्तत्र बन्धाभावे दोषमाह — अबद्ध इत्यादि । अबद्धो व्रणो दंशादिभिः पीडितो व्यथित. तथा आदिशब्दाद् रजोधूमादिभिः, अदुष्टोऽपि व्रणो दुष्टीभवति । अल्पदुष्टोऽपि भृशं दुष्टीभवति । अत्र च व्रणे बन्धमन्तरेण व्रणघ्नः स्नेह उपयोजितो भेषजं वा योजितं चिरं न तिष्ठेत् । बन्धं विना सम्यगुपचर्यमाणो व्रणः कृच्छ्रेण शुद्धिं याति । रूढिं वा कृच्छ्रेण याति । रूढोऽपि सन् विवर्णतां याति, न शरीरवर्णतामित्यबन्धनदोषाः ।

इदानीं बन्धनगुणानाह —

बद्धस्तु चूर्णितो भग्नो विश्लिष्टः पाटितोऽपि वा ।
छिन्नस्नायुसिरोऽप्याशु सुखं संरोहति व्रणः ॥ ६८ ॥

उत्थानशयनाद्यासु सर्वेहासु न पीड्यते ।
उद्वृत्तौष्ठः समुत्सन्नो विषमः कठिनोऽतिरुक् ॥ ६९ ॥

समो मृदुररुक् शीघ्रं व्रणः शुध्यति रोहति ।

बद्धस्त्वित्यादि । तुरवधारणे । बद्ध एव व्रणो बन्धमाहात्म्यात् चूर्णितादिलक्षणः सुखं संरोहति । चूर्णितश्चूर्णितास्थिसमाश्रितः । भग्नो मर्मास्थिसमाश्रितः । विश्लिष्टः सन्धिस्थानादन्यस्थानगतो व्रणः, नेत्रादिः पाटितः, सर्वदेशस्थितोऽपि तथा छिन्नस्नायुसिरोऽपि एवंविधोऽपि शुद्धव्रणः सुखं सम्यग् रोहति । तथोत्थानशयनाद्यासु सर्वासूहासु चेष्टासु न पीड्यते न बाध्यते । उद्वृत्तौष्ठ इत्यादिना दुष्टव्रणस्य बन्धनाच्छुद्धिं रूढिं चाह । ऊर्ध्वं वृत्तौ वर्तुलावोष्ठौ यस्य स उद्वृत्तौष्ठः (ऊर्ध्व वृत्तौ वर्तुलौ ओष्ठौ), तथा समुत्सन्नः उन्नतमांसः = (ऊर्ध्वमांसः), तथा विषमः उद्वृत्तौष्ठसमुत्सन्नाभ्यां व्यतिरिक्तः क्वचित् निम्नः क्वचिदुन्नतः क्वचित् कुथितः एवं विषमसंस्थानः । तथा कठिनः तथा अतिरुक् । एवमुद्वृत्तौष्ठादिषड्प्रकारो दुश्चिकित्स्यतरोऽपि दुष्टव्रणो बन्धमाहात्म्यादशुभरूपतां हित्वा समत्वादित्रिविधगुणयुक्तः शीघ्रं शुद्धिं याति रोहति च । उद्वृत्तौष्ठसमुत्सन्नविषमलक्षणः समो भवति कठिनो मृदुर्भवति अतिरुग्गरुक् भवति । हारीतोऽप्याह — 'उद्वृत्तौष्ठत्वादियुक्तोऽपि व्रणो बन्धेन समत्वादियुक्तो भवति । ननूद्वृत्तौष्ठसमुत्सन्नावपि विषमशब्देनैव गृह्येते किमेताभ्यामुपाधिभ्याम् । अस्त्येवैतत् । किं त्वनयोः पृथङ्निर्देशेन दुश्चिकित्स्यतरत्वं

गमयति । उद्वृत्तौष्ठादिसंयुक्तः शुध्यति । समादिलक्षणसंयुक्तो रोहति ।" इति । पाठ्यकारस्त्वाह — 'न च व्रणस्योपरि बन्धग्रन्थिं कुर्यात्' इति ॥

बन्धगुणकथनं विधाय स्थिराणा मित्यादिना पत्रदानविषयमाह —

स्थिराणामल्पमांसानां रौक्ष्यादनुपरोहताम् ॥ ७० ॥
प्रच्छाद्यमौषधं पत्रैर्यथादोषं यथर्तु च ।
अजीर्णतरुणाच्छिद्रैः समन्तात्सुनिवेशितैः ॥ ७१ ॥
धौतैरकर्कशैः क्षीरिभूर्जार्जुनफदम्बजैः ।

स्थिराणां दीर्घकालानुषङ्गिणां तथाल्पमांसानाम् अनुपचितपललानां अत एव हेतो रौक्ष्यादनुपरोहतां रूढिमगच्छतां व्रणानामुपरि दत्तमौषधं कल्कक्वेथादिकं पत्रैः क्षीरिभूर्जार्जुनफदम्बजैः प्रच्छाद्यं स्थगयितव्यम् । यथादोषं दोषानतिक्रमेण । ऋत्वनतिक्रमेण च । तद्वशाद् यथायोगं, यथा वातव्रणे शीतलैः स्निग्धोष्णैः, पित्तव्रणे घर्मकाले शीतस्वभावैः, कफव्रणे उष्णकाले रूक्षोष्णस्वभावैः । एवं साधारणेऽपि काले मिश्रदोषे च कल्पनीयम् । किम्भूतैः पत्रैः । अजीर्णतरुणाच्छिद्रैः इति । न जीर्णैर्नापि तरुणैः तथा छिद्ररहितैः तथा समन्वात् सुनिवेशितैः तथा धौतैर्जलादिना निर्मलीकृतैः तथा अकर्कशैरकठिनैः ॥

अबन्धनीयान् दर्शयति —

कुष्ठिनामग्निदग्धानां पिटकामधुमेहिनाम् ॥ ७२ ॥
कर्णिकाश्वोन्दुरुविषे क्षारदग्धा विषान्विताः ।
न मांसपाके च बध्नीयाद् गुदपाके च दारुणे ॥ ७३ ॥
शीर्यमाणाः सदाहाः शोफावस्था विसर्पिणः ।
अरक्षया व्रणे यस्मिन्मक्षिका निक्षिपेत्कृमीन् ॥ ७४ ॥
ते भक्षयन्तः कुर्वन्ति रुजाशोफास्रसंस्रवान् ।
सुरसादि प्रयुञ्जीत तत्र धावनपूरणे ॥ ७५ ॥
सप्तपर्णकरञ्जार्कनिम्बराजादनत्वचः ।
*गोमूत्रकल्किता लेपाः सेकाः क्षाराम्बुना हिताः ॥ ७६ ॥
प्रच्छाद्य मांसपेश्या वा व्रणं तानाशु निर्हरेत् ।

* 'गोमूत्रकल्किते लेपः सेक' क्षारांबुना हित.' इति मुद्रितायाष्टाङ्गहृदयपाठः.

कुष्ठिनामित्यादि । कुष्ठिनामग्निदग्धानां च ये व्रणाः ते न बन्धनीयाः। तथा मधुमेहिनां पिटकाः तथा उन्दुरुविषे याः कर्णिकाः कोठरूपाः किञ्चिदुन्नताः (ഒരുതരം വ്രണം മാംസം) ताश्च न बन्धनीयाः । तथा क्षारदग्धाः ये व्रणास्ते च न बन्धनीयाः । तथा मांसपाके व्रणाः तथा गुदपाके चातिदारुणे, न गुदपाकमात्रे, व्रणाः ते च न बन्धनीयाः । मांसपाक इति 'मांसस्य पचियुग्यजोः' इत्यलोपः । तथा शीर्यमाणाः सदनावस्थां भजमानाः तथा सशूदाहाः तथा शोफावस्थाः शोफवदेकामाद्यवस्थाः। श्वयथुयुक्ता इति केचित् । अरुणदत्तस्तु "शोफावस्थाः अनेकावस्थां भजन्तोऽपि ये शोफावस्थाः स्थिताः" इत्याह । तथा विसर्पिणः विसर्पावस्थास्थिताः । हृदयाकारस्तु "पर्यन्ते सूक्ष्मपिटकावन्तः" इत्याह । विसर्पिणः (ഗാംഗ്രീനാദി) इति पाठकारः । अरुषया अपालनेन यस्मिन् व्रणे मक्षिका कृमीन् निक्षिपेत्। जातावेकवचनम् । मक्षिकाः क्रिमीन् निक्षिपन्ति । ते तत्रस्थाः कृमयः मासादिकं भक्षयन्तो रुजादीन् कुर्वन्ति । तत्र तस्मिन् व्रणे सुरसादिगणो धावने पूरणे च तन्निमित्तं प्रयोज्यः । तथा तस्मिन् व्रणे सप्तपर्णादीन् त्वचो गोमूत्रकल्किताः पिष्टलेपा हिताः। "गोमूत्रकल्कितः पिष्टो लेपो हितः" इति हाटकः । अथवा मांसपेश्या व्रणं प्रच्छाद्य पिधाय तान् कृमीनाशु निर्हरेत् ॥

किञ्चिच्छुद्धं न रोपयेत् इत्याह —

न चैनं स्वरमाणोऽन्तःसदोषमुपरोहयेत् ॥ ७७ ॥
सोऽल्पेनाप्यपचारेण भूयो विकुरुते यतः ।
रूढेऽप्यजीर्णव्यायामव्यवायादीन्विवर्जयेत् ॥ ७८ ॥
हर्षं क्रोधं भयं चापि यावदास्थैर्यसम्भवात् ।
यादरेणानुवर्त्योऽयं मासान्पट् सप्त वा विधिः ॥ ७९ ॥

न चैनमित्यादि । न चैनं व्रणमन्तःसदोषं स्वरमाणो वैद्य उपरोहयेत् । अन्तःसदोषमशुद्धमिति प्रायशोऽर्थः । कस्मादित्याह स इत्यादि । यतो यस्मात् सोऽन्तःस्थितदोषो व्रणो रूढोऽपि भूयः पुनः स्तोकेनाप्यपचारेण विकृतिं याति । हाटकस्तु —"सदोष अन्तरुत्सङ्गं कृत्वा गतो विकुरुते" इत्याह । अतः सम्यग् रूढेऽपि सत्यजीर्णादीन् वर्जयेत्।

अयमजीर्णादिवर्जनीयविधिरादरेण यतवता षट् सप्त वा मासाननुवर्त्योऽनुष्ठातव्यः । सम्यगूढेऽपि षट् सप्त वा मासानजीर्णादीन् वर्जयेदित्यर्थः ।

उपसंहरति —

उत्पद्यमानासु च तासु तासु
वार्तासु दोषादिबलानुसारी ।
तैस्तैरुपायैः प्रयतश्चिकित्से-
दालोचयन्विस्तरमुत्तरोक्तम् ॥ ८० ॥

उत्पद्येत्यादि । तासु तासु वार्तास्ववस्थासु अनिर्दिष्टस्वरूपाभिधानासु उत्पद्यमानासु जायमानासु तैस्तैरुक्तानुक्तैरुपायैः साधनैश्चिकित्सेत् वैद्यः । किम्भूतः, दोषादिबलानुसारी दोषादीनां बलं दोषादिबलम् । आदिग्रहणाद् देशकालादयो गृह्यन्ते । तदनुसरणशीलो यो वैद्यो दोषादिबलानुरूपेण चिकित्सेदित्यर्थः । तथा प्रयतः प्रयत्नपरः । तत्रोत्तरे तन्त्रे व्रणप्रश्नविधाने उक्तं निर्दिष्टं विस्तरमालोचयन् निरूपयन् । न तु यदृच्छयेति भावः । हाटक्रोऽप्याह — "उत्तरे विस्तरेणोक्तं व्रणविधानमालोचयन् । अस्मिन् संक्षेपेण व्रणसाधन उक्तः" इत्यर्थः । वचनं हि —

"इतीदं व्रणमाश्रित्य दिङ्मात्रमुपदर्शितम् ।
उत्तरे विस्तरस्तस्य वक्ष्यते साधनं प्रति ॥"

इति ॥

इति इन्दुविरचितायामष्टाङ्गहृदयस्य सूत्रस्थानस्य
एकोनत्रिंशोऽध्यायः ॥

अथ त्रिंशोऽध्यायः ।

अथातः क्षाराग्निकर्मविधिमध्यायं व्याख्यास्यामः ।

शस्त्रकर्मप्रसङ्गात् क्षाराग्निविधिमाह । अयमपि शस्त्रकर्मविधिरेव । अथवा शस्त्रसाध्येषु विधिमुक्त्वा शस्त्रदुष्करेषु क्षाराग्न्योर्विधिमाहेति संबन्धः । डाटकोऽप्याह— 'यथैव भेषजविषयमतिक्रान्ते शस्त्रस्योपयोगः तथा शस्त्रसामान्यात् क्षाराग्न्योरपि । अतस्तद्विज्ञानार्थमध्यायारम्भः' इति । अरुणदत्तोऽप्याह— 'यथैव हि शस्त्रेण पाटनादीनि कृत्वा तत्साध्यं आमयं उपक्रम्यते तथैव क्षाराग्निभ्यामित्याह' इति ।

अनुशस्त्राणां प्रथमौ शस्त्राणां कर्मकारिणौ च यतः ।
क्षाराग्नी तेन विधिं तयोर्वक्ष्यन्नथ शास्त्रकृत् सकलम् ॥

इति हृच्च कार. । क्षारस्याग्नेश्च क्षाराग्नी तयोः कर्म क्षाराग्निकर्म तस्य विधिः । अयं पूर्ववत् क्षारस्य बाह्याभ्यन्तरोपयोगित्वेन बहूपयोगित्वेन च पूर्वमुपन्यासः ।

सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठो बहूनि यत् ।
छेद्यभेद्यादिकर्माणि कुरुते विषमेष्वपि ॥ १ ॥
दुःखावचार्यशस्त्रेषु तेन सिद्धिं नयात्सु च ।
अतिकृच्छ्रेषु रोगेषु यच्च पानेऽपि युज्यते ॥ २ ॥

सर्वेत्यादि – सर्वाणि च तानि शस्त्राणि अनुशस्त्राणि च तान्येवं तेषां सर्वशस्त्रानुशस्त्राणां मध्ये क्षारः श्रेष्ठो ज्यायान् क्षरणाद् व्याधीनां स्वगुणानां क्षरणाद् वा क्षारः इति निर्वचनम्

उक्तं च विश्वामित्रीये—

"गुणान् क्षरति रोगेषु व्याधीन् क्षारयतीति वा ।
भक्षते क्षतहृत्त्वाच्च तस्मात् क्षार इति स्मृतः ॥"

इति । कस्मात् श्रेष्ठ इत्याह—यद्यस्मात् छेद्यादीनि बहूनि कर्माण्यसौ करोति । आदिशब्देन लेखनपाटनादिपरिग्रहः । विषमेष्वपि देहदेशेषु नासार्श्यर्बुदादिषु दुःखावचार्यशस्त्रेषु दुःखेनावचारयितुं यवयं शस्त्रं येषु तेषु युज्यते । अपिशब्दात् समेषु देहदेशेषु युज्यते । येन च शस्त्रेण सिद्धिं नयात्सु असिध्यत्सु दुष्टव्रणेषु बहुशः प्रकोपिषु । किंभूतेषु, अतिकृच्छ्रेष्वति-दुःखसाध्येषु युज्यते योग्यः संपद्यते । चशब्दादन्येष्वपि रोगेष्वसौ क्षारो युज्यते योग्यः संपद्यते । ततोऽपि हेतोः क्षारः श्रेष्ठः । यद्येति । यस्माच्च क्षारः

---

१. 'विद्धिनवात्सु च' इति मुद्रिताष्टाङ्गहृदयपाठः ।

पाने पानविषयेऽपि युज्यते शरीरान्तःस्थितरोगशान्त्यै । अपिशब्दात् बाह्येऽपि बाह्यस्थितरोगशान्त्यै लेपे स युज्यते । अतिकृच्छ्रेषु रोगेषु गुल्मोदरादिषु पानेऽपि युज्यते इत्यन्वयं ब्रुवतेऽन्ये ॥

स पेयोशोंऽग्निसादाश्मगुल्मोदरगरादिषु ।
योज्यः साक्षान्मशश्चित्रवाह्यार्शःकुष्ठसुप्तिषु ॥ ३ ॥

भगन्दरार्बुदग्रन्थिदुष्टनाडीव्रणादिषु ।
न तूभयोऽपि योक्तव्यः पित्ते रक्ते चलेऽबले ॥ ४ ॥

ज्वरेऽतिसारे हृन्मूर्धरोगे पाण्ड्वामयेऽरुचौ ।
तिमिरेऽकृतसंशुद्धौ श्वयथौ सर्वगात्रगे ॥ ५ ॥

भीरुगर्भिण्यृतुमतीप्रोद्वृत्तफलयोनिषु ।
अजीर्णेऽन्ने शिशौ वृद्धे धमनीसंधिमर्मसु ॥ ६ ॥

तरुणास्थिसिरास्नायुसीवनीगलनाभिषु ।
देशेऽल्पमांसे सूपणभेदस्रोतोनरान्तरे ॥ ७ ॥

वर्त्मरोगार्दितेऽक्ष्णोश्च शीतवर्षोष्णदुर्दिने ।

स पेय इत्यादिना क्षारस्य पेयलेपद्वैविध्यं विषयविभागं च दर्शयति। अन्तर्गतार्शःप्रभृतिषु विषये स पेयः स. क्षारः द्रवरूप. पेयाख्यो योज्यः। गरादिष्वित्यत्रादिशब्देनानाहशूलादयो गृह्यन्ते । लेपनविषयमाह योज्य इत्यादि । साक्षात् क्षारो लेपाख्यो मशादिषु योज्यः । मशः क्षुद्ररोगः । व्रणादिष्वित्यत्रादिग्रहणात् चर्मकीलवर्मतिलकालकादिपरिग्रहः । न तूभय इत्यादि । उभयः पानलेपनभेदाद् द्विविधोऽपि क्षारः पित्तादौ न योज्यः । चले वाते । अबले प्राणहीने प्रोद्वृत्तफलयोनिरुत्तरे गुह्यरोगविज्ञाने वक्ष्यमाणा । यथा —

"वेगोदावर्तनाद्योनिं प्रपीडयति मारुतः ।
सा फेनिलं रजः कृच्छ्रादुदावर्तं विमुञ्चति ॥
इयं व्यापदुदावृत्ता"

इत्येवमादि । प्रकर्षेणोद्वृत्तं फलं रजोरूपं यस्या योनेः सा प्रोद्वृत्तफलयोनिः । रज एव फलं गर्भाख्यफलसाधनोपायत्वात् । उद्वृत्त-

योन्या फलयोन्यां चेत्यन्ये । उक्तं च भोजेन – "तत्र साध्येष्वप्युपद्रुतमतिचालमतिवृद्धं कृशं दुर्बलं क्षतक्षीणं सर्वाग्निशूनमृतुमतीं गर्भिणीं रजस्वलां क्षीयमाणामुद्वृत्तयोनिं फलयोनिं क्लीबं ज्वरदाहमूर्च्छापिपासापरीतमपि वर्जयेत् क्षारेण" इति । तरुणास्थीनि नासादिष्वस्थीनि । सीवनी (व्रण)। गलनाभिः कण्ठमणिः । शीते हेमन्तशिशिरे न योक्तव्यः अयोगभयात् । तद्वद् वर्षासु दुर्दिने च । दुर्दिनं मेघाद्याकुलं दिवसम् । उष्णे ग्रीष्मे न योक्तव्यः अतियोगभयात् । अत्र क्षारवर्जितेषु पुरुषेषु प्रदेशेषु च क्षारनिपातनात् किं भविष्यतीति चेद् व्याधिवृद्धिरनेकोपद्रवोत्पत्तिर्मरणं वा भविष्यति इत्यवगन्तव्यम् । सिद्धेनाप्युक्तम् —

"याः क्रियाः प्रतिषेद्धव्यास्ताः क्रियाः कुर्वतो भृशम् ।
तद्व्याधिवृद्धिर्मरणमन्या वा व्यापदो ध्रुवाः ॥"

इति । धान्वन्तरीयाः क्षारं त्रिदोषघ्नमिति समर्थयन्ति । यथा — "शस्त्राणुशस्त्राणां क्षारः प्रधानतमः । छेद्यभेद्यलेख्यकरणात् त्रिदोषघ्नत्वाच्च । अनेकौषधिसमवायेन निष्पन्नद्रव्यत्वात् त्रिदोषघ्नत्वम् । क्षरणात् क्षारः । स च द्विविधः । प्रतिसारणः पानीयश्चेति । प्रतिसारणनालेपः । स च कुष्ठादिषु । पानीयो गुल्मोदरकृम्यादिषु' इति ।

अधुना क्षारपाकविधिमाह—

कालशुष्ककरम्याकक्षदलीपारिभद्रकान् ॥ ८ ॥

अश्वकर्णमहाशृङ्गपलाशास्फोतवृक्षकान् ।
इन्द्रवृक्षार्कपूतीकनक्तमालाश्वमारकान् ॥ ९ ॥

काकजङ्घामपामार्गमग्निमन्थाग्निनिम्बकान् ।
सार्द्रान्समूलशाखादीन् खण्डशः परिकल्पितान् ॥ १० ॥

कोशातकीश्चतस्रश्च शूकनालं यवस्य च ।
निवाते निचयीकृत्य पृथग् ज्ञानि शिलानले ॥ ११ ॥

प्रक्षिप्य शुष्ककचये सुधाश्मानि च दीपयेत् ।
दग्धास्तिलानां कुलत्थैर्दग्धाभौ विगते पृथक् ॥ १२ ॥

कृत्वा सुधाश्मनां भस्म द्रोण त्वितरमम्मनः ।
मुष्ककोत्तरमादाय प्रत्येकं जलमूत्रयोः ॥ १३ ॥
गालयेदर्धभारेण महता वाससा च तत् ।
यावत्पिच्छिलरक्ताच्छस्तीक्ष्णो जातस्तदा च तत् ॥ १४ ॥
गृहीत्वा क्षारनिष्यन्दं पचेल्लौह्यां विघट्टयन् ।
पच्यमाने ततस्तस्मिंस्ताः सुधाभस्मशर्कराः ॥ १५ ॥
शुक्तीः क्षीरवक्त्र शङ्खनाभिश्चायसभाजने ।
कृत्वाग्निवर्णान्बहुशः क्षाराच्छे कुडवोन्मिते ॥ १६ ॥
निर्वाप्य पिष्ट्वा तेनैव प्रतीवापं विनिक्षिपेत् ।
श्लक्ष्णं शकृदक्षशिखिगृध्रकंककपोतजम् ॥ १७ ॥
चतुष्पात्पक्षिपित्तालमनोह्वालमणानि च ।
परितः सुतरां चातो दर्व्यां तमवघट्टयेत् ॥ १८ ॥

कालेत्यादि । मुष्ककस्य श्वेतादिभेदो विद्यते, तस्मात् कालमुष्कक इत्युक्तम् । हृद्याकारोऽप्याह— "कालमुष्ककमहणान्मुष्ककबहुत्वम् । तत् पुष्पवर्णैरुपलभ्यते । उक्त च विश्वामित्रीये—

"कालपुष्प श्वेतपुष्प रक्तपुष्प तथैव च ।
चतुर्थं पीतपुष्प च श्रेष्ठ तद्धि नराधिप" ॥

इति । हृदयकोऽप्याह— "कालाभिधानान्मुष्ककबहुत्व पुष्पतोऽवगन्तव्यम्" इति । मध्यमवयसश्चेत्यप्याहार्यम् । बालस्य जीर्णस्यासञ्जातफेनवीर्यत्वा । । सञ्जातफेनपुष्पफलत्वं मध्यमवयस्त्व, तस्य ग्रहणकालान् हेमन्तशरद्वसन्तानुपदिशन्त्याचार्या" इति । पारिभद्रम् (ಪಾರಿಭದ್ರ) । अश्वकर्णः कुशिक । महावृक्षः नुही (ನುಗ್ಗೆ) । आस्फोतो गिरिकर्णिका (ಆಸ್ಫೋತ) । वृक्षकः कुटज (ಕೊಡಸಿಪಾಲೆ) । इन्द्रवृक्षो नन्दीवृक्ष (ಇಂದ್ರವೃಕ್ಷ) । पूतीकः पूतीकरञ्ज (ಅಬ್ಬಲಿಗೆ) । नक्तमालः करञ्ज (ಬಿಂಡಿ) अश्वमारः कणवीर । कालमुष्कादीन् मूलादिसहितान् खण्डशः परिकल्पितान् परश्वधादिना छिन्नान्, तथा कोशातकीश्चतस्रः यत्रस्य च शूकनाल यवशूको नाल इव यो भवति शूक च नाल चेति वा शूकनालम् । 'शूकस्य नालमि'ति हृद्याकारः । तानि निगदि

देशे शिलातले वृत्ते पृथङ् निचयीकृत्य शुष्ककचये च सुधाश्मानि सुधा शर्कराः प्रक्षिप्य दीपयेत् ज्वालयेत् । कैः तिलानां क्षुतलैः काण्डैः । 'सुधाश्मानि चे'ति नपुंसकत्वं चिन्त्यम् । पृथग् दीपने चैषामाचिन्त्यः प्रभावः । एवं तानि दग्ध्वा ततोऽनन्तरं विगते प्रशान्तेऽग्नौ सुधाश्मनां भस्म द्रोणं पृथक् कृत्वा न्यस्तं संस्थाप्य इतरभस्मनः शम्याकादिद्रव्योद्भवात् द्रोणमादाय गृहीत्वा, किंभूत द्रोण शुष्ककमुत्तरमधिकं यस्मिन् द्रोणे यस्य वा तमादाय जलमूत्रयोः प्रत्येकमर्धभारेण तद् भस्म गालयेत् । महता विस्तीर्णेन वाससा । कियन्तं कालं, यावत्क्षारनिष्यन्दं क्षारस्रावः शनैः स्वयं पतितः पात्रे पिच्छिलरक्ताच्छस्तीक्ष्णो जातः संपन्नः । शुष्ककोत्तरमिति एकद्रव्यभस्मनो द्विगुणं शुष्ककभस्मेत्यर्थः इति केचित् । तदा तस्मिन् काले तं क्षारनिष्यन्दं गृहीत्वा लौहीं स्थाल्यां स्नेहपाकविधिना पचेत् । किं कुर्वन्, दर्व्या विघट्टयन् आलोलयन् । ततोऽनन्तरं तस्मिन् क्षारनिष्यन्दे ताः पृथक् संस्थापिताः सुधाभस्मशर्कराः भस्ममयीः सुधाशर्कराः(ശുദ്ധിക്കല്ല്) तथा शुक्तीः प्राणिविशेषास्थीनि (കപടിലക്കി) तथा क्षीरनकं प्रलेपकं घटिकासंज्ञं (പരിശംഖ്) शुक्तिक्षीरवकं श्वेतशुक्तिरिति वा । तथा शङ्खनाभिं च (ശംഖ്) तानभिवर्ण्य कृत्वा क्षाराच्छे क्षारनिष्यन्दे अच्छं (ശുദ്ധിനീർ) कुडवोन्मिते पलचतुष्टयप्रमाणे, पलाष्टकप्रमाण इत्यर्थः । वचनं हि—

'द्विगुण योजयेदार्द्रं कुडवादि तथा द्रवम् ।'

इति । आयसभाजने तीक्ष्णलोहपात्रस्थिते क्षाराच्छे बहुशो बहून् वारान् निर्वाप्य शीतीकृत्य शीर्णशेषांश्च तेनैव क्षारनिष्यन्देन द्रुपदि पिष्ट्वा तस्मिन् क्षारनिष्यन्दे पच्यमाने प्रतीवापं विनिक्षिपेत् । द्रवेऽर्धपक्वे यद् द्रव्यान्तर श्लक्ष्णपिष्टं दीयते स प्रतीवापः कल्क, उच्यते । सुधाभस्मशर्करादीनां भागाविशेषात् समभागत्वसिद्धिः । उक्तं च सौश्रुते —

"निर्दिष्टा न भवति यत्र भागसंख्या
तत्रेष्टं संगुणमोषधं प्रयोगे ।" इति ॥

समानतन्त्राद् वा भागविशेषसिद्धिः । एवं चाह विश्वामित्रः—

"अष्टौ भागाः शर्कराया सुधायाश्चत्वार एव च ।
द्वौ शुक्तेश्चात्र विज्ञेयावेक शङ्खस्य नाभिज" ॥

इति। सुधाभस्मशर्करादीनां किं कल्कप्रमाणमिति चेद् अनुक्तत्वात् बुद्धि-गम्यम्। अथवा यावान् क्षारोदकबुडुबेन पेय्यस्तावान् प्रक्षेपयितव्य स्यात् इति। अथवा समानतन्त्राद् वा तत्सिद्धिः। उक्तं हि विश्वामित्रीये—

"क्षीरोदकचतुर्भागं कल्कमेषां प्रदापयेत्"

इति। न च केवलमेत एवात्र प्रतिवापत्वेन क्षेप्तव्याः यावद् दक्षादिशकृदादींश्च पिष्ट्वा प्रतीवाप विनिक्षिपेत्। दक्षादीनां शकृत्। दक्षः कुक्कुटः। तथा चतुष्पदां गवादीनां पक्षिणां च पित्तम्। तथा हरितालमनोह्वालवणानि च श्लक्ष्णानि कृत्वा प्रतीवापं विनिक्षिपेत्। हाटकोऽपि—"एषा शुक्त्यादीनां लवणान्तानां भागविशेषात् समभागसिद्धिः" इत्याह। अतः प्रतीवापानन्तरं परितः समन्ताद् दर्व्या तमवघट्टयेत्॥ १८॥

सक्षाप्पैश्च यदोच्चिष्ठेद् बुद्बुदैर्लेहवद् घनः।
अवतार्य तदा शीतो यवराशावयोमये॥ १९॥
स्याप्योऽयं मध्यमः क्षारो, न तु पिष्ट्वा क्षिपेन्मृदौ।
निर्वाप्यापनयेत्; तीक्ष्णे पूर्ववत्प्रतिवापनम्॥ २०॥

सक्षाप्पैरित्यादि। यदा यस्मिन् काले सः क्षारनिष्यन्दः सक्षाप्पैः सोष्मभिः बुद्बुदैर्घनो लेह इव उच्चिष्ठेत् उद्गच्छेत्। यदा च दर्वीलेपी स्यात् तदा अवतार्य शीतः सन् अयोमये लोहभाण्डे स्थितो यवराशौ क्षिप्य। अयं मध्यमः क्षारः। मृदौ क्षारे मुद्गादीन् निर्वाप्यापसारयेत् न तु पिष्ट्वा क्षिपेत्। तीक्ष्णे तीक्ष्णक्षारे पूर्ववत् मध्यमक्षारतुल्यं प्रतिवापनं निर्वाप्य पिष्ट्वा विनिक्षिपेदिति॥ २०॥

न चैतावताय प्रतिवापनमित्याह—

तथा लाङ्गलिकादन्तिचित्रकातिविषादयः।
स्नुक्किकाकनकक्षीरिहिङ्गुपूतीकपल्लवाः॥ २१॥
नालपर्णी बिडं चेति सप्तरात्रात्परं तु सः।

तथेत्यादि। लाङ्गलिकादीनि च अत्र प्रतिवाप्यं विनिक्षिपेत् कनकक्षीरी हेमदुग्धा। नालपर्णी (जालीवत्; -लिपत्रमिति द्वितीया-

विभक्त्यन्तः पाठो न समीचीनः। एवं कृतः क्षारः सप्तरात्रात् परं योज्यः त्रिविधः क्षारो योज्यः योग्यतामेति।

इति क्षारत्रैविध्यमुक्त्वा क्षारविषयमाह—

योज्यस्तीक्ष्णोऽनिलश्लेष्ममेदोजेष्वर्बुदादिषु ॥ २२ ॥
मध्येष्वेवं च मध्योऽन्यः पित्तासृग्गुदजन्मसु।
बलार्थं क्षीणपानीये क्षाराम्बु पुनरावपेत् ॥ २३ ॥

योज्य इत्यादि। तीक्ष्णः क्षारो वातश्लेष्ममेदस्समुत्थेष्वर्बुदादिषु योज्यः। महत्स्वेव योज्यः मध्येषु क्षारान्तरविधानात्। आदिग्रहणादन्येष्वपि तत्साध्येषु रोगेष्वयं क्षारो योज्यः। मध्येष्विति। एष्वेव अनिलकफमेदोजेष्वर्बुदादिषु मध्येषु नोत्कृष्टबलेषु नापि हीनेषु मध्यः क्षारो योज्यः। अन्यो मृदुः क्षारः पित्तरक्तसमुत्थेषु अर्शस्सु योज्यो न तीक्ष्णमध्यौ क्षारौ। क्षीणपानीये क्षीणजले क्षारे बलाधानाय पुनर्भूयः क्षाराम्बु-क्षारविप्लुतं जलमावपेत् दद्यात् ॥ २३ ॥

क्षारगुणानाह—

नातितीक्ष्णो मृदुः श्लक्ष्णः पिच्छिलः शीघ्रगः सितः।
शिखरी सुखनिर्वाप्यो न विष्यन्दी न चातिरुक् ॥ २४ ॥
क्षारो दशगुणः शस्त्रतेजसोरपि कर्मकृत्।

नातीत्यादि। श्लक्ष्ण इति पृथक्पदम्। शीघ्रं गच्छत्याशु व्याप्नोतीति शीघ्रगः। शिखरी उपरिष्टात् पीठिकाकारः। उपर्युपरि स्थापिते तिष्ठतीति भायशोऽर्थः। हाटकोऽपि—'शिखरी घनत्वेन शिखराकारः पातितो भवति इत्याह। 'शिखरी शिखरयुक्त' (ಶಿಖರಿ ಶಿಖರಯುಕ್ತ) इति पाठ्यकारः। सुखेन काञ्जिकादिना निर्वाप्यते शीतीक्रियते [इति] सुखनिर्वाप्यः। न विष्यन्दी न विष्यन्दवान्। न चातिरुक्। नातितीक्ष्णादयो दश गुणाः यस्य स दशगुणः। शस्त्रस्य यत् कर्म छेदनादि यत् तेजसोऽग्नेरपि कर्म दाहः तत् करोति। सङ्क्षेप क्षारस्य दशैव दोषाः कथिताः। यथा—"अत्युष्णोऽतिशीतोऽतितीक्ष्णोतिमृदुरतिघनोऽतिपिच्छिलः कृच्छ्रनिर्वाप्यो विसर्पी हीनौषधो हीनपाकश्च" इति।

अधुना देहनिपातादातुरानुभवद्वारेण क्षारस्य गुणानाह—

चूषयन्निव संरम्भाद्गात्रमापीडयन्निव ॥ २५ ॥

सर्वतोऽनुसरन् दोषानुन्मूलयति मूलतः ।
कर्म कृत्वा गतरुजः स्वयमेवोपशाम्यति ॥ २६ ॥
क्षारसाध्ये गदे छिन्ने लिखिते स्रावितेऽथवा ।
क्षारं शलाकया दत्त्वा प्लोतप्रावृतदेहया ॥ २७ ॥
मात्राशतमुपेक्षेत तत्रार्शःस्वावृताननम् ।
हस्तेन यन्त्रं कुर्वीत वर्त्मरोगेषु वर्त्मनी ॥ २८ ॥
निर्भुज्य पिचुनाच्छाद्य कृष्णभागं विनिक्षिपेत् ।
पद्मपत्रतनुः क्षारलेपो घ्राणार्बुदेषु च ॥ २९ ॥
प्रत्यादित्यं निषण्णस्य समुच्चाम्याग्रनासिकाम् ।
मात्रा विंधार्याः पञ्चाशत् तद्वदर्शसि कर्णजे ॥ ३० ॥

चूपयन्नित्यादि । संरम्भात् क्षोभात् गात्रं चूपयन्निव । आचूपन्निवेति वा पाठः तथा आपीडयन्निव तत सर्वतः सर्वस्मिन् अनुसरन् गच्छन् दोषांस्तत्साध्यान् मूलत उन्मूलयति । तया कर्म स्वीयं कृत्वा गतरुजः पुरुषस्य स्वयमेव यत्नं विनैव उपशाम्यति । क्षारेत्यादि । क्षारसाध्ये व्याधौ अर्शोऽर्बुदादौ प्राक् यथायोगं छेदादौ कर्मणि कृते क्षारो योज्यो नाकृते छेदादाविति क्षारस्य विषयो दर्शितः । क्षारं शलाकया दत्त्वा मात्राशतमुपेक्षेत । न काञ्चिकादिना निर्वापण कार्यमित्यर्थः । किंभूतया शलाकया, प्लोतेन चेरम्बण्डेन प्रावृतोऽवगुण्ठित स्थगितो देहः परिमण्डलो यस्या. सैवम् । तत्र क्षारसाध्येष्वर्शस्सु क्षारपातनं कृत्वा मात्राशत यावत् तावदस्तेन यन्त्रमावृताननं छादितमुखं कुर्यात् । क्षारसाध्येषु वर्त्मरोगेषु वर्त्मनी निर्भुज्य कुटिलीकृत्य तत. क्षारस्पर्शपरिहाराय पिचुना कार्पासादिमयेन कृष्णभागमाच्छाद्य क्षारं विनिक्षिपेत् । तत्र च पद्मपत्रतनुः क्षारलेपो देयः । न गुदार्शःस्विव घन. । पद्मपत्रमिव तनुरिति "उपमानानि सामान्यवचनैः" इति समासः । घ्राणार्बुदेषु च स एव पद्मपत्रतनुः क्षारलेपो योज्यः । कथं तत्र क्षेपो देय. । प्रत्यादित्यं रविसम्मुखं निषण्णस्य सिनस्य तथा ऋजे नासिका अग्रनासिका आग् उन्नाम्य उत्क्षिप्य । कियन्त कालं क्षेपो धार्य इत्याह—मात्राः पञ्चाशद्विधार्याः । वर्त्मसु चाल्पतरा मात्रा । स्थानस्य सुकुमारत्वात् सुकुमारत्वाच्च । कर्णनेऽर्बुदे तद्वत् तेन घ्राणार्बुदेन तुल्य स एव पद्मपत्रतनु. क्षारलेप । तावेव पञ्चाशन्मात्रा धार्या इत्यर्थः ॥३०॥

क्षारं प्रमार्जनेनानु परिमृज्यावगम्य च ।
सुदग्धं घृतमध्यक्तं तत्पयोभस्तुकाश्चिकैः ॥ ३१ ॥

निर्वापयेत्ततः साज्यैः स्वादुशीतैः प्रदेहयेत् ।
अभिष्यन्दीनि भोज्यानि भोज्यानि क्लेदनाय च ॥ ३२ ॥

यदि च स्थिरमूलत्वात्क्षारदग्धं न शीर्यते ।
धान्याम्लबीजयष्ट्याह्वतिलैरालेपयेत्ततः ॥ ३३ ॥

तिलकल्कः समधुको घृताक्तो व्रणरोपणः ।
पङ्कजम्बासितं मद्यं सम्यग्दग्धं विपर्यये ॥ ३४ ॥

ताम्रता तोदकण्ड्वाद्यैर्दुर्दग्धं, तं पुनर्दहेत् ।
अतिदग्धे स्रवेद्रक्तं मूर्छादाहज्वरादयः ॥ ३५ ॥

गुदे विशेषाद्विण्मूत्रसंरोधोऽतिप्रवर्तनम् ।
पुंस्त्वोपघातो मृत्युर्वा गुदस्य स्रातनात् ध्रुवम् ॥ ३६ ॥

नासोष्ठा नासिकानंशदरणाकुञ्चनोद्भवः ।
भवेच्च विषयाज्ञानं तद्वच्छ्रोत्रादिकेष्वपि ॥ ३७ ॥

विशेषादत्र सेकोऽम्लैर्लेपो मधुघृत तिलाः ।
वातपित्तहरा चेष्टा सर्वैव शिशिरा क्रिया ॥ ३८ ॥

क्षारमित्यादि अनु पश्चात् क्षारलेपनियमितकालधारणादनन्तर क्षारं प्रमार्जनेन चेलादिना परिमृज्य शोधयित्वा सुदग्धं तत् क्षारस्थानमर्शोऽर्बुदादधिष्ठानमवगम्य सम्यग्लक्षणेन ज्ञात्वा क्षारदग्धं स्थानं घृतमधुलेपितं कृत्वा क्षीरमृत्तिभिर्निर्वापयेत् शीतीकुर्यात्। निर्वापणम् (ल०७८क)। ततोऽनन्तरं स्वादुशीतैर्द्रव्यैर्मधुयष्टिकादिभिः सघृतैर्लेपयेत् । अभिष्यन्दीनि। गुरूपश्लेष्मकारीणि भोज्यानि अन्नपानानि माषदध्यादीनि भोज्यानि भोज्यानि भक्षयितव्यानि । योज्यानि इति वा पाठः । किमर्थं, क्लेदनाय क्षारदग्धस्थानविशरणार्थम् । यतः क्षारदग्धं क्लिन्नं सत् शीर्यते । यदि च क्षारदग्धमभिष्यन्दिभिरपि च भोज्यैरुपयुक्तैः स्थिरमूलत्वात् रोगाधिष्ठानं न शीर्यते ततो धान्याम्लबीजादिभिरालेपयेत् । धान्याम्लस्य बीजं धान्याम्लबीजं काञ्जिकस्याघोषनम् (ल०७८ख)। "धान्या-

ग्लबीजेन मधुघृताभ्यां च लेपयेत्" इत्यरुणदत्तः। तिलकल्को यष्टियुक्त-घृतान्वितो व्रणस्य रोपणः। पक्वजम्बूफलत्वक्सिद्धं कृष्णम्। सौश्रुते चोक्तम्—

'तस्मिन् निपतिते व्याधौ कृष्णता दग्धलक्षणम्'।

इति। तथा सक्थं निम्नं सम्यग् दग्धं स्थानं विद्यात्। विपर्यये पक्वजम्बू-सित्वादिलक्षणविपर्यये तथा ताम्रादिभिश्च दुर्दग्धं जानीयात्। आदिग्रहणा-च्छोफविस्फोटादिपरिग्रहः। तमामृतं तं पुनर्दहेत्। भूयस्तत्र क्षारं पात-येद् दाहाय। अतिदग्धे सति रक्तं स्रवेत्। तथा मूर्च्छादयो जायन्ते। आदिग्रहणाद् विसर्पविस्फोटादयोऽपि। गुदेऽतिदग्धे विशेषेण विण्मूत्रयोः संरोधः तथा अतिप्रवर्तनं कदाचित् तयोरेवातिप्रवृत्तिर्भवति। विशेषग्रहणात् पूर्वो-क्तरक्तस्रावादयोऽपि। तथा पुंस्त्वोपघातः कान्तागमनासामर्थ्यं शुक्रक्षय इत्यर्थः। तथा गुदस्य विशरणाद् विदारणानिश्चयेन मृत्युर्वा भवेत्। नासार्यां क्षाराविदग्धायां नासिकावंशस्य दरणाकुञ्चनोद्भवः। वंशः नासान्तरास्थि। तथा विषयाज्ञानं गन्धस्याज्ञानं भवेत्। क्षाराविदग्धेषु श्रोत्रादिकेषु श्रोत्रचक्षुरघ्रनेषु स्थानेषु विषयाज्ञानं स्यात्। तस्मिन् क्षारदग्धे विशेषेणाम्लैः काञ्जिकादिभिः सेको हितः। मधुघृततिललेपोऽपि हितः। तथा सर्वत्र शिशिरा क्रिया वातपित्तहरा इष्टा। सङ्ग्रहे चोक्तम्—

"पाययेत्तत्रियोगे तु तच्छीघ्रं ससितं दधि।
सगुडं वा दधिसरं तैलं वा ससितोपलम्॥"। इति।

'अम्लो हि शीतः स्पर्शेन क्षारस्तेनोपसंहितः।
यात्याशु स्वादुतां तस्मादम्लैर्निर्वापयेत्तराम्॥ ३९॥

अम्ल इत्यादि। यस्मादम्लः शीतस्पर्शः तेन चाम्लेन क्षारं उप-संहितो युक्तः आशु एव कटुकलवणमूर्च्छितां त्यक्त्वा स्वादुतां याति। तस्माद्धेतोः क्षारदग्धमम्लैः काञ्जिकादिभिर्निर्वापयेत्तराम्। स्वादुता यातीति मधुरत्वादामेयमपि क्षारं शीतवीर्यं भवतीत्यर्थः। तरांग्रहणेनातिशयेनाम्लै-र्निर्वापयेत् 'कदाचिद्देशसात्म्यानुरोधेन क्षीरादिभिरपीति दर्शयति। अभि-प्रेतस्य क्षारस्य शमनत्वमम्लस्यायुक्तमामेयत्वादिति केचित्। न वह्नि-शीतत्वात्। उक्तं हि विश्वामित्रीये —

---

१. 'प्रभवस्य' इति च पाठान्तरम्।

"यस्मादुष्णतरः क्षारः शैत्यं चाम्लरसेऽधिकम् ।
तस्मात् सेकप्रदेहाभ्यामम्लं क्षारनिवर्तनम् ॥" इति ।

भोजेनाप्युक्तमन्यथा —

"रौक्ष्यात्तत्रानिलः क्रुद्धो वीर्यं क्षारस्य पुष्यति ।
तस्मात् स्नेहाम्लमधुरं वायोः क्रुद्धस्य निग्रहः ॥" इति ।

अग्निः क्षारादपि श्रेष्ठस्तद्दग्धानामसम्भवात् ।
भेषजक्षारशस्त्रैश्च न सिद्धानां प्रसाधनात् ॥ ४० ॥

अग्निरित्यादि । अग्निः क्षारादपि श्रेष्ठः प्रशस्यतरः । ननु 'सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठः' इत्युक्त्वा पुनरग्नेः श्रैष्ठ्यं कथमिति । अग्निप्रयोगाशक्तेषु पुरुषेषु प्रयुज्यते इति पुरुषावस्थामुद्दिश्य क्षारस्य सर्वश्रैष्ठ्यमुक्तम् । सम्प्रति तीक्ष्णतामुद्दिश्यैवाग्नेः प्राधान्यं ब्रूते । अथवा औषधेभ्यः क्षारो गुरुरित्युक्तः । ततः क्षारात् अग्निः श्रेष्ठ इत्यर्थः । येषु रोगेषु क्षाराग्न्योः प्राप्तिस्तेष्वेवेयं चिन्ता । 'इतरत्र क्षारेण ज्वलनेन वा' इत्येवमादिषु क्षाराग्न्योः किं तुल्यफलत्वम् उत वा गरीयस्त्वमिति जिज्ञासायामग्निः क्षारादपि श्रेष्ठ इति प्रतिज्ञा । ततः, तद्दग्धानां तेनाग्निना दग्धानां रोगाणामर्शःप्रभृतीनामसम्भवाद् इति हेतुः । भूयोऽग्निदग्धो रोगः प्ररोहं न याति मूलादुन्मूलनादित्यर्थः । भेषजक्षारशस्त्रैर्ये रोगा न सिद्धा न शान्ताः तेषां प्रसाधनाच्च ज्वलनो जयायान् । सारकृदप्याह — "क्षारप्रकरणे 'सर्वशस्त्रानुशस्त्राणां क्षारः श्रेष्ठः' इत्युक्तत्वादग्नेरपि क्षारस्य प्राधान्यसिद्धेर्व्याघातदोषः" इति । उच्यते । नायं दोषः । यथाविषयं प्राधान्यसिद्धेः । कथम् । अर्जुनात् कर्णः प्रधानः दृढवेधित्वात् । कर्णादप्यर्जुनः प्रधानः दूरवेधित्वात् उक्तं च —

"केशवे लक्ष्यलक्षत्वं दूरवेधित्वमर्जुने ।
दृढप्रहारता कर्णे तानि त्रीण्यपि सात्यकौ ॥" इति ।

एवं छेद्यादिकर्मकरणत्वात् त्रिदोषघ्नत्वाच्चाग्नेः क्षारः प्रधानः । अग्निदग्धानां रोगाणामपुनर्भवत्वात् क्षाराशक्तयाना साधनत्वाच्चाग्निः क्षारात् प्रधानः इति । अथवा 'सर्वशस्त्रानुशस्त्राणां क्षारः' श्रेष्ठ इत्युत्सर्गः । 'अग्निः क्षारादपि श्रेष्ठ' इत्यपवादः । इतश्च क्षारादग्निः प्रधानः औषधशस्त्रशरीरशक्तयानां साधनाच्च । अत्राह — युक्तमेतत् क्षाराशक्तयाना साधनात् क्षारादग्निः प्रधान इति

वक्तुन् । किं तर्हि, शस्त्रौषधाभ्यामशक्यानां साधनात् क्षारादग्निः प्रधान इति नोपपद्यते । न ह्यन्यहेत्वपदेशमन्यो लभत इति । उच्यते । अग्निरौषधं शस्त्रं क्षार इत्येवं सर्वं स्थावरजङ्गमं चतुर्धा विभज्य तेष्वग्नेः प्राधान्यं सिषाधयिषुरसमाचार्य एवमाह लाघवार्थं प्रसङ्गतः । औषधशस्त्राभ्यामप्यग्निः प्रधानतमः । कस्मात् । औषधशस्त्राभ्यामशक्यानां व्याधीनां साधनात् औषधशस्त्राभ्यामग्नेः प्राधान्यम् । उक्तं च —

"ये नैव शक्याः क्षारेण शस्त्रेण च भिषग्जितम् ।
स्वेदैरालेपनैर्वापि तेषामग्निक्रियेतमम् ॥
उपक्रमेषु सर्वेषु प्रशस्तोऽयमुपक्रमः ।
पशूनां पक्षिणां नृणामेतद् भैषज्यमुत्तमम् ॥" इति ।

त्वचि मांसे सिरास्नायुसन्ध्यस्थिषु स युज्यते ।
मषाङ्गम्लानिमूर्धार्तिमन्थकीलतिलादिषु ॥ ४१ ॥
त्वग्दाहो वर्तिगोदन्तसूर्यकान्तशरादिभिः ।
अर्शोभगन्दरग्रन्थिनाडीदुष्टव्रणादिषु ॥ ४२ ॥
मांसदाहो मधुस्नेहजाम्बवोष्ठगुडादिभिः ।
श्लिष्टवर्मन्यसृक्स्रावनील्यसम्यग्व्यधादिषु ॥ ४३ ॥
सिरादिदाहस्तैरेव न दहेत्क्षारवारितान् ।
अन्तःशल्यासृजो भिन्नकोष्ठान् भूरिव्रणातुरान् ॥ ४४ ॥
सुदग्धं घृतमध्वक्तं स्निग्धशीतैः प्रदेहयेत् ।

त्वचीति । स अग्निदाहः त्वगादिषु युज्यते । (तत्र मषादिषु) रोगेषु त्वग्दाहो वर्त्यादिभिः कार्यः । वर्त्तिः पिचुवर्त्ति. । आदिग्रहणादन्येष्वपि क्षुद्ररोगाध्यायोक्तेषु त्वग्दाहो योज्यः । शरादिभिरित्यादिग्रहणादन्यैरपि देशान्तरप्रसिद्धैस्त्वग्दाहः कार्यः । अर्शःप्रभृतिषु रोगेषु मधुस्नेहादिभिर्मांसदाहः कार्यः । आदिशब्दादर्बुदगण्डमालादयो गृह्यन्ते । मधुस्नेहादीनामन्यतमेन दाहः कार्यः । तत्र कदाचिन्मधुना कदाचित् पृथक् स्नेहैः कदाचिज्जाम्बवोष्ठेन । जाम्बवोष्ठः शलाकाविशेषो यन्त्रविधावुक्त येन क्षारो दीयते । कदाचिद् गुडेन यदाचिदेवंविधेनान्येनापि द्रव्यविशेषप्रसिद्धेन । श्लिष्टवर्मादिषु सिरादिदाहः कार्यस्तैरेव मधुस्नेहादिभि. । आदिग्रहणाव

स्नायुसन्ध्यस्थ्नां ग्रहणम् । क्षारवारितान् न दहेत् ।[1] न केवलमेतान् यावदन्तःशल्यान् तथान्तर्लोहितान् तथा शस्त्रादिना भिन्नकोष्ठान् तथा भूरिभिर्व्रणैरार्तान् । सुदग्धमग्निना रोगाधिष्ठानं ज्ञात्वा घृतमधुभ्यामभ्यक्तं कृत्वा स्निग्धशीतैर्मधुयष्टिशालिमूलादिभिः प्रलेपयेत् ।

तस्य लिङ्गं स्थिते रक्ते शब्दवल्लसिकान्वितम् ॥ ४५ ॥
पक्वतालकपोताभं सुरोहं नातिवेदनम् ।
प्रमाददग्धवत्सर्वं दुर्दग्धात्यर्थदग्धयोः ॥ ४६ ॥

तस्येत्यादि । तस्येत्यनेन सुदग्धं स्थानं परामृश्यते । तस्य सम्यग्दग्धस्थानस्य लिङ्गं लक्षणं स्थिते रक्ते दह्यमानावस्थाप्रवृत्तेऽस्रजि निवृत्ते सति । शब्दवत् बुद्बुदशब्दवत् तत्स्थानं भवेत् । तथा तत् स्थानं लसिकान्वितं च । लसिका कुशशस्त्रादिविक्षते प्रथमं या दृश्यते जललवाकृतिः । (ಒಳಸುಲಿ೦೦) इति भाषा । तथा त्वग्दग्धं पक्वतालफलसदृशं कदाचित् कपोतसदृशम् । सुखेन रोहति [इति] सुरोहम् । तथा नातिवेदनं न तीव्ररुक् । केचिदाहुः — 'शब्दवल्लसिकान्वितं' इत्यनेन त्वग्दग्धलक्षणं ब्रवीति इति । उक्तं च सौश्रुते — 'तत्र शब्दप्रादुर्भावो दुर्गन्धिता त्वक्सङ्कोचश्च त्वग्दग्धे भवन्ति' इति । 'पक्वतालकपोताभं' इत्यनेन मांसदग्धलक्षणम् । उच्च तत्रैवोक्तम् — 'कपोतवर्णतालुवक्षयथुवेदनता शुष्कसङ्कुचितव्रणता च मांसदग्धे' इति । एवं चेत् किं सिरादिदग्धलक्षणमिति । अनन्तरापदेशान्मांसदग्धलक्षणमेव तद्दग्धलक्षणम् । किञ्चान्यत् । व्याध्यपनुत्तेश्चोपलब्धिः । इह तु सिरादिषु स्थितानां व्याधीनामग्निकर्मणा यदापनुत्तिर्भवति तदा सिरादीनि सम्यग्दग्धानीत्यवगन्तव्यानि । उक्तं च भोजेन —

